CC-0. In Public Domain. Digitization by eGangotri

ISSN : 2795-1960

ब्रह्मप्रज्ञा

(विज्ञसमीक्षिता, अनुसन्धानात्मिका पत्रिका)

BrahmaPrajna

(A Peer-Reviewed Journal)

वर्षम् ३ पूर्णाङ्कः ४ वि.सं. २०८०

वेदान्तविभागः

वाल्मीकि-विद्यापीठम्
नेपाल-संस्कृत-विश्वविद्यालयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मप्रज्ञा

(विज्ञसमीक्षिता अनुसन्धानात्मिका पत्रिका)

BrahmaPrajna

(A Peer-Reviewed Journal)

वर्षम् : ३ पूर्णाङ्कः ४ वि.सं. २०८०

सम्पादक

प्रा.डा. नुरापति पोखरेल

प्रा.डा. ध्रुवप्रसाद भट्टराई

वेदान्तविभागः

वाल्मीकि-विद्यापीठम्

नेपाल-संस्कृत-विश्वविद्यालयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मप्रज्ञा

(विज्ञसमीक्षिता अनुसन्धानात्मिका पत्रिका)

Brahma-Prajna

(A Peer-Reviewed Journal)

वर्षम् ३ पूर्णाङ्कः ४ वि.सं. २०८०

अस्यां पत्रिकायां प्रकाशिता निबन्धा लेखकानां स्वाध्ययनानुसन्धानाधारेण लिखिता इति तत्राभिव्यक्तानां विषयाणामुत्तरदायित्वमपि लेखकेष्वेव भविष्यति।

प्रकाशकः—

वेदान्तविभागः

वाल्मीकिविद्यापीठम्

नेपाल-संस्कृत-विश्वविद्यालयः

vedantavibhag@gmail.com

प्रकाशनतिथिः : २०८०।१२।०७ विषुवद्दिनम्

ISSN : 2795-1960

मूल्यम् : ३२५।-

मुद्रकः : कञ्चनप्रेसमुद्रणालयः

बागबजारः,

☏ ४२३००९७, ४२५३४२७,

kanchanpress@hotmail.com

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीयम्

'ऋते ज्ञानान्न मुक्ति'रिति श्रुतिपथमनुसरन्तो जनास्तत्पिपासाशमनाय अहरहो यत्नरता दृश्यन्ते स्वेप्सितं ज्ञानमधिगम्य सुखञ्चानुभवन्ति । लोकोऽनादिकालतोऽनयैव दिशा गतिमान्नस्ति । ज्ञानस्यापरिहार्यत्वं नास्ति केषामप्यविदितं परं ज्ञानस्यानैकत्वादिह जिज्ञासा समुदेति यत् किञ्च ज्ञानं किञ्च सज्ज्ञानं कश्चैतस्य लाभ इति। यत् त्रितापतप्तानां जनानां चिच्छोधनं करोति सर्वविधं दुःखञ्च सर्वथाऽपाकरोति तदेव सज्ज्ञानमिति शास्त्रसरणिर्वर्तते। श्रुत्या **'सा विद्या या विमुक्तये'** यदुपदिष्टं तदेव सज्ज्ञानस्य स्वरूपम्। सज्ज्ञानमैहिकामुष्मिकं सुखमादत्ते श्रेयश्च वितनोति। अज्ञानं दुःखमेव परं ज्ञानमिह सुखं जनयति चेत् सज्ज्ञानं पारलौकिकसुखस्यापि हेतुरिति प्रसिद्धिः। लोकः सुखेन जीवितुमीहते तदर्थं नैकानुपायाँश्चावलम्बते। तत्र ज्ञानमन्यतम उपायो वर्तते । सज्ज्ञानं तदन्तरं बिभर्ति। सज्ज्ञानं तादृशं परमौषधमेतदन्तरान्तकालोऽपि सुखसन्तोषावहो भवितुं नार्हति । म्रियमाणो जीवोऽन्यानि वस्तूनि विहाय केवलं सज्ज्ञानपीयूषधाराभिर्विसेक्तुं शक्यते। सज्ज्ञानं कुतोऽवगन्तव्यमित्यपि चिन्तनीयं भवति। चिरकालतस्त्रिकालदर्शिभिस्तत्त्वाभिनिवेशिभिश्चर्षिमहर्षिभिर्भूयो भूयो विचिन्त्य परिशील्य सम्परीक्ष्य च लोकहिताय प्रतिपादितं मनोमार्जकं ज्ञानमेव सज्ज्ञानपदमावहति। तत्प्रतिपादितशास्त्रानुशीलनम्, मनोवाक्कायकर्मशोधनम्, सत्सङ्गतिः, सतताभ्यासश्च सज्ज्ञानस्याधारसोपानं वर्तते। सोपानमिदं पारङ्गतः सज्ज्ञानी एव सुखेन जीवनं यापयति जागतिकदुःखान्मृत्योश्च न बिभेति। तदवस्थामवाप्तुं जिज्ञासोः काचिदर्हता चाऽऽवश्यकी जायते। तादृश्यर्हता विद्यासाधनायत्नेनैवावाप्यते, नान्यथा। एतदेव विचिन्त्य सुखेप्सूनां निःश्रेयसाभिलाषिणाञ्च साहाय्यसौकर्याय, अनुसन्धित्सूनां जिज्ञासाशमनाय, प्राज्ञेषु सन्निहितप्रतिभावितननाय चोद्यमोऽयं नैरन्तर्येण कृतोऽस्ति। एतदीयसंस्करणे बहुविषयावलम्बिनो-ऽनुसन्धानसरणिं समाश्रिता लेखाः समाविष्टाः सन्ति, ये सर्वेषां लाभाय भवेयुरिति विश्वस्यते।

तिथिः २०८०।१२।०५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमणिका

सम्पादकीयम् ग

संस्कृतखण्डः

त्रिप्रश्नाधिकारस्य वैशिष्ट्यम् — सहप्रा. मुरलीधरदाहालः १

शाङ्करवेदान्ताभिमतजीवस्वरूपविवेकः — उपप्रा.डा. उमेशप्रसादघिमिरे १३

शास्त्रेषु धर्मविवेचना — उप्रा.डा. प्रकाशढकालः २१

ध्वन्यालोकप्रथमद्वितीयोद्योतगतवैशिष्ट्यानुशीलनम् — उपप्रा. भरतभट्टराईः ३१

बौद्धदर्शनाभिमतस्य क्षणभङ्गवादस्य विवेचनम् — उपप्रा.डा. राजनारायणठाकुरः ३८

भीष्मप्रकृतिप्रयोगदृष्ट्या ऋतुसंहारखण्डकाव्यस्य वर्षावर्णनम् — मुकुन्द घिमिरे ४६

धर्मशास्त्रदृष्ट्या आश्रमधर्मस्वरूपविमर्शः — विष्णुप्रसाद शर्मा ५४

नेपालीखण्ड

शुक्लयजुर्वेदको प्रकृति–विकृतिपाठ विमर्श — सहप्रा. तेजप्रकाश पौडेल ६६

तन्त्र र नाथपरम्पराको सहसम्बन्ध — सहप्रा.डा. माधवप्रसाद लामिछाने ७७

महावाक्यमा प्रातिपदिकार्थको महत्त्व — डा. चेतमणि न्यौपाने ८५

वैशेषिकदर्शन प्रतिपादित द्वित्वको उत्पत्ति र विनाश प्रक्रिया — उपप्रा. अर्जुनबाबु दाहाल ९१

राष्ट्रनिर्माता खण्डकाव्यमा काव्यतत्त्व र जीवनदर्शन — उपप्रा. चिन्तामणि भट्टराई ९६

न्यायावयव वाक्यका विषयमा न्याय र मीमांसा दर्शनको साम्य–वैषम्य निरूपण — उपप्रा.डा. सीताराम खतिवडा १०३

पुरुषोत्तम दाहालको 'शान्ता' उपन्यासमा प्रस्तुत मानवीय चेत — सीता अधिकारी ११९

अङ्ग्रेजीखण्ड

Multiplication and HCF of Polynomials: Unveiling Vedic Techniques — Arjun Adhikari १२९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्रिप्रश्नाधिकारस्य वैशिष्ट्यम्

सहप्रा. मुरलीधरदाहालः
वाल्मीकिविद्यापीठम्

शोधसारः

प्रस्तुते शोधलेखे ज्यौतिषशास्त्रान्तर्गत त्रिप्रश्नाधिकारस्य वैशिष्ट्यं प्रदर्शनमेव। विशेषतः सिद्धान्तज्यौतिषे ग्रहगणितान्तर्गत अनेकाधिकाराः सन्ति। तेषां मध्ये त्रिप्रश्नाधिकारस्य विशिष्टमहत्त्वात् सर्वे सिद्धान्तग्रन्थे उपस्थापनं विहितमस्ति।

मध्यमाधिकारे ग्रहाणां मध्यमकालमुक्तम्। स्पष्टाधिकारे तिथ्यादि पञ्चाङ्गरूपः कालः प्रतिपादितः। चन्द्र-सूर्यग्रहणाधिकारयोः स्पर्शमध्यमोक्षकालज्ञानं स्पर्शसम्मीलनोन्मीलनमोक्षदिग्ज्ञानञ्च व्यक्तीकृतम्। उदयास्ता-धिकारे तदनुरूपकालः प्रतिपादितः। ग्रहयुतौ ग्रहसमागमादिकालज्ञानमुदीरितम्। भग्रहयुतौ फलादेशार्थं नक्षत्र-ग्रहयोगकालज्ञानं वर्णितम्। तथा च शृङ्गोन्नतौ शुभाशुभफलसंस्थानेन तदात्मक कालज्ञानं प्रदिष्टम्। पाताधिकारे क्रान्तिसाम्यसमयः समीरितः सूर्यपर्वसदृशो मुनीश्वरै इत्याद्युपयुक्तं पातास्थित्यादिकालज्ञानं निगदितम्। परन्तु त्रिप्रश्नाधिकारे तु त्रयाणां दिग्देशकालानां प्रश्ना विद्यन्ते यत्रासौ स त्रिप्रश्नस्तत्प्रतिपादकोधिकारस्त्रिप्रश्नाधिकार इत्यर्थः। अस्मिनधिकारे दिग्देशकालसम्बन्धिप्रश्नानां साधनप्रकाराः निर्दिष्टाः। अन्येष्वधिकारेषु केवलं कालावगममेव। त्रिप्रश्ने तु दिग्देशकालानां त्रयाणामपि ज्ञानमिति तावदस्य वैशिष्ट्यम्।

यस्मिन् अधिकारे दिग्देशकालावगमः स्यात्। दिशां देशानां तत्सम्बन्धी पदार्थानां चावगमः। अत्र अस्मिन् प्रकरणे त्रयाणां दिग्देशकालानां प्रश्नाः विद्यन्ते यत्रासौ त्रिप्रश्न एतदेव नाम यस्येति त्रिप्रश्ननाम्नि। अतः अन्येष्वधिकारेषु कालाः त्रिप्रश्नेषु दिग्देशकालानां त्रयाणामपि ज्ञानमिति सुतरां वैशिष्ट्यं तनाशेषसारत्वमस्य युक्तियुक्तमितिभावः।

शब्दकुञ्जी– त्रिप्रश्नाः , दिक् , शङ्कुः , पलभा , अक्षांशः , रेखादेशः , निरक्षदेशः , देशान्तरम् , भुजः, कोटिः, कर्णः।

विषयप्रवेशः

समग्रं ज्ञानं वेदेषु सन्निहितमस्ति। वेदस्यास्य ज्ञानप्रवर्तकानि तत्षडङ्गभूतानि शिक्षा- कल्प- व्याकरण- ज्यौतिष- निरुक्त- छन्दः शास्त्राणि प्रचक्षन्ते। षडङ्गेषु ज्यौतिषस्य परिगणनं वर्तते। मुख्यतत्त्वमपि निगदितम्। मुनिना लगधेन वेदाङ्गज्योतिषे वेदाङ्गेभ्यो ज्यौतिषस्य वरिष्ठता प्रतिपादिता वर्तते। उक्तञ्च-

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि संस्थितम्॥

यस्मादिदं सिद्धं यद् वेदाङ्गेषु ज्यौतिषशास्त्रस्य सर्वातिशायि श्रेष्ठत्त्वं वरीवर्ति। अस्य शास्त्रस्य त्रिस्कन्धात्मकं नारदमुनिना नारदसंहितायां प्रतिपादिम्। यथा-

सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुर्ज्योतिशशास्त्रमनुत्तमम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनेन ज्यौतिषशास्त्रस्य त्रयो विभागाः सन्तीति विज्ञायते। प्रस्तुतः शीर्षकमपि सिद्धान्तज्यौतिषसम्बन्धीति। सिद्धान्तज्यौतिषमपि सिद्धान्त- तन्त्र- करणभेदात् त्रिखण्डात्मकम्। सिद्धान्तज्यौतिषे ग्रहगणितान्तर्गत अनेकाधिकाराः सन्ति। तेषां मध्ये त्रिप्रश्नाधिकारस्य महत्त्वं सर्वे सिद्धान्तग्रन्थे उदीरितम्। अन्वेषुधिकारेषु केवलं तदनुरूपकालः प्रतिपादितः। परन्तु त्रिप्रश्नाधिकारे तु त्रयाणां दिग्देशकालानां ज्ञानमिति तावदस्य वैशिष्ट्यम्।

समस्याकथनम्

प्रस्तुतेऽनुसन्धनात्मके लेखे निम्नाङ्किताः समस्याः प्रस्तुयन्ते।

(क) दिग्ज्ञानं कथम् ?

(ख) स्वदेशीयकरणं कथम् ?

(ग) इष्टकालसाधनं कथम् ?

एते प्रमुखा विषयाः समस्यारूपेण उपस्थापिताः सन्ति।

अध्ययनस्योद्देश्यम्

अस्मिन् लेखे पूर्वोक्तसमस्यायाः समाधानार्थमुद्देश्यानि निर्धारितानि सन्ति। तानि च –

(क) दिग्ज्ञानप्रकारप्रदर्शनम्।

(ख) स्वदेशस्य निरूपणम्।

(ग) इष्टकालसाधनप्रकारप्रदर्शनम्।

सामग्रीसङ्कलनविधिः

प्रस्तुतलेखस्योपस्थापने सामग्रीसङ्कलनाय पुस्तकालयीयाध्ययनविधिरेव प्रमुखो भविता। शोधकार्यस्यैतस्य सामग्रीसङ्कलनार्थं विविधपुस्तकालयानामुपयोगो विधास्यते। तथा च प्रयोगशालीयं विधिः, विषयसम्बद्धविद्वद्भिः सह परामर्शः, अन्तरजालमाध्यमेन सामग्रीणामन्वेषणं भविता।

अध्ययनविश्लेषणविधिः

प्रस्तोष्यमाणे अनुसन्धानात्मकलेखे तावद् निगमनात्मकविधेः प्रयोगं विधाय व्याख्यात्मको विधिर्विश्लेषणात्मको विधिश्च प्रयोक्ष्यते। तत्र यथावश्यकं पुस्तकालयीयविधिश्च प्रयोक्ष्यते। पुस्तकालयं गत्वा विभिन्नानि पुस्तकान्यवलोक्य तेभ्यः मधुकरपद्धत्या तत्रस्थानां विषयवस्तूनां सङ्कलनं विधाय आवश्यकसामग्रीणां सङ्कलनं तथैव गद्यांशस्य सन्दर्भप्रदाने लेखक–मितिपद्धतिः(ए.पि.ए.) प्रयुक्ता चेत् आवश्यकश्लोकानामुद्धरणे तु प्राचीनपद्धत्यानुसारं प्रदत्ताः सन्ति।

दिग्ज्ञानम् (प्रथमप्रकारः)

जलेन समीकृतायां भूमौ इष्टप्रमाणं वृत्तं अभीष्टकर्कटेन विलिख्य तस्य केन्द्रे द्वादशाङ्गुलशङ्कुं निवेश्य तस्य छाया तस्मिन् वृत्ते यत्र प्रविशति पूर्वाह्णे पराह्णे यतो निर्गच्छति ते द्वे चिह्ने वृत्तपरिधावङ्किते कार्ये। तच्चिह्नद्वयगामिनी रेखैव वास्तविक पूर्वापररेखायाः समानान्तरा रेखा भवति। अत एव वृत्तकेन्द्रतस्तस्याः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समानान्तरा रेखा यदि विधीयते तदा वास्तविक पूर्वापरारेखा जायते इति। तत्र पश्चिमपूर्वदिशौ किलः भवतः। परन्तु यस्मिन् काले छायाप्रवेशो जायते यस्मिन् काले च निर्गमस्तात्कालिकयोसूर्ययोः क्रान्तिज्या साध्ये। तयोरन्तरात् तस्याश्छायायाः कर्णेन गुणिताल्लम्बज्यया भक्तात् यल्लब्धमङ्गुलादिकं फलं तेनैन्द्री दिगुत्तरतश्चालिता स्फुटा प्राची। अन्यथा स्थूलदिक्को भवति। तस्या मत्स्याकरणेन याम्योत्तरा रेखापि जायते। मत्स्याकरणं नाम लम्बार्धकरणम्। तन्मत्स्याद्याम्यसौम्ये दिशौ भवतः। अनयोः सहाय्येन विदिशानामाग्नेय–नैऋत्यादिनाञ्च ज्ञानं कर्तुं शक्यते। यथा द्रष्टव्यं क्षेत्रम्–

रश= द्वादशाङ्गुलशङ्कुः।

छा= प्रवेशकालिकछायाग्रम्।

या= निर्गमकालिकछायाग्रम्।

छाश= प्रवेशकालिक छायाप्रमाणम्।

याश= निर्गमकालिक छायाप्रमाणम्।

छाया= पूर्वापररेखायाः समानान्तरारेखा (छायाप्रवेश–निर्गमकालिकछायाग्रगता रेखा)।

पपू= वास्तविक पूर्वापरारेखा।



द्वितीयप्रकारः

ध्रुवताराऽवलम्बकसूत्रेण विद्ध्वा ध्रुवाभिमुखकीलकः उत्तरदिक्। स्वस्थानकीलको दक्षिणदिक्। तन्मत्स्यात् पूर्वापरे भवतः। यथा द्रष्टव्यं क्षेत्रम्–

ध्रु= ध्रुवतारा।

दृ= दृष्टिस्थानम्।

दृल= अवलम्बकसूत्रम्।

मत= अन्योऽवलम्बकसूत्रम्।



तृतीयप्रकारः

प्रथमं भाद्वयाग्रदर्शनेन दिग्ज्ञानमुक्तम्। इदानीमथवैकस्मादपि भाग्रतोऽपि दिग्ज्ञानं कथ्यते। तच्चैवम्। अभीष्टकाले शङ्कोर्भाग्रं चिन्हयित्वा भुजकोटिञ्चानीय भुजकोटिमिते शलाके गृहित्वा शङ्कुमूलाद् यथादिग्गतां कोटिशलाकां छायाग्राद्वयस्तद्दिग्गतां भुजशलाकां च भूवि तथा न्यसेत् यथा शलाकाग्रयोः संयुतिः स्यात्। एवं कृते सति कोटिः प्राच्यपरा दिग्भवति। बाहुस्तु याम्योत्तरा दिग्भवतीति सुस्पष्टमेव।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आधुनिकप्रकारः

आधुनिकास्तु एकस्मिन् दिने केवलं मध्याह्नकालपर्यन्तं छायापरीक्षणं विधायापि दिक्साधनं कुर्वन्ति। तद्यथा- प्रातः काले छाया दीर्घा दृश्यते। ततः प्रतिक्षणं छाया ह्रासः दृश्यते। मध्याह्णे च सा छाया लघुतमा भवति। लघुतमा छाया यद्दिङ्मुखी तद्दिक्का याम्योत्तरा। यस्मिन् देशे परम क्रान्त्यंशतोऽक्षांशाः अधिकास्तस्मिन् देशे मध्याह्नकालिकी छाया उत्तराभिमुखी दृश्यते। परं यस्मिन् देशे परमक्रान्त्यंशतः अक्षांशानां न्यूनत्वं यावत्कालपर्यन्तं भवति तावत्कालपर्यन्तं मध्याह्नकालिकी छाया दक्षिणाभिमुखी दृश्यते। तेनाक्षांशानुरोधेन मध्याह्नकालिकी छायातो दक्षिणोत्तरारेखा अवगन्तव्येति दिक्। यथाऽह भास्करः-

वृत्तेम्भः सुसमीकृतक्षितिगते केन्द्रस्थशङ्कोः क्रमाद्
भागं यत्र विशत्यपैति च यतस्तत्रापरैन्द्र्यौ दिशौ।
तत्कालापमजीवयोस्तु विवराद्भाकर्णमित्याहता-
ल्लम्बज्याप्तमिताङ्गुलैरयनदिश्यैन्द्री स्फुट्य चालिता॥

तन्मत्स्यादथ याम्यसौम्यककुभौ सौम्या ध्रुवे वा भवे-
देकस्मादपि भाग्रतो भुजमितां कोटीमितां शङ्कुतः।
न्यस्येद्यष्टिमृजुं तथा भुवि यथा यष्ट्यग्रयोः संयुतिः
कोटिः प्राच्यपरा भवेदिति कृते बाहुश्च याम्योत्तरा॥[1]

स्फुटदिग्ज्ञानार्थं सूर्यसिद्धान्तर्गत त्रिप्रश्नाधिकारेऽपि वर्णितमस्ति। यथाऽह सूर्यसिद्धान्ते-

शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे।
तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत्॥

तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्वादशाङ्गुलम्।
तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः॥

तत्र विन्दू विधायोभौ वृत्ते पूर्वापराभिधौ।
तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोत्तरा॥

याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा।
दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि॥[2]

दिग्ज्ञानार्थं छायातः कर्णं, कर्णाच्छायां कथ्यते।

छायावर्गात् द्वादशवर्गयुतान्मूलं कर्णो भवति। कर्णवर्गात् द्वादशवर्गविहीनमूलं छाया भवति। अत्र द्वादशाङ्गुलशङ्कुकोटिः। छाया प्रमाणं भुज :। छायाग्राच्छङ्कुशीर्षयावत् कर्णः। अस्मिन् जात्यत्रिभुजे कयोरपि द्वयोर्भुजयोर्ज्ञानात् तृतीयभुजस्य ज्ञानं सुगममेव। भुजकोटिज्ञानेन भाग्राद्दिक्साधनमुक्तमधुना दिग्ज्ञाने सति भाग्राद्दोकोटिज्ञानमुच्यते। पूर्वापरयाम्योत्तरदिक्सूत्रयोः सम्पातस्थले स्थापितस्य शङ्कोः छायाग्रप्रवेशपूर्वापर-सूत्रयोरन्तरमेव भुज इत्युच्यते। तस्य छायायाश्च वर्गान्तरमूलं कोटिर्भवतीति सुस्पष्टमेव। यतो हि छाया प्रमाणं तत्र कर्णः भुजच्छायाग्रपूर्वापरसूत्रस्यान्तररूपः, कोटिस्तु पूर्वापरा पूर्वापरसूत्रगतैव भवतीति। भास्करः कथयति-

१ सिद्धान्तशिरोमणिः, ग्रहगणिते त्रिप्रश्नाधिकारः, श्लोकौ ८,९

२ सूर्यसिद्धान्तः, त्रिप्रश्नाधिकारः, श्लोकाः १-४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दिक्सूत्रसंपातगतस्य शङ्कोश्छायाग्रपूर्वापरसूत्रमध्यम्।
दोर्दोः प्रभावर्गवियोगमूलं कोटिर्नरात् प्रागपरा ततः स्यात्॥

भाकृतीनकृतिसंयुतेः पदं स्याच्छ्रुतिः श्रुतिकृतीनवर्गयोः।
अन्तराद्रवियुतोनकर्णयोराहतेश्च यदि वा पदं प्रभा॥[३]

छायातः कर्णानयनं कर्णतश्छायानयनार्थं तत्र द्वादशाङ्गुलशङ्कुच्छाययोः वर्गयोगात् पदं छायाकर्णः स्यात्। छायाकर्णस्य वर्गात् शङ्कुवर्गं विशोध्य यद् मूलं तद् छाया भवतीति। यथाऽह सूर्यसिद्धान्ते–

शङ्कुच्छायाकृतियुतेर्मूलं कर्णोऽस्य वर्गतः।
प्रोज्भ्य शङ्कुकृतिं मूलं छाया शङ्कुर्विपर्ययात्॥[४]

दिशोऽपि स्थूलसूक्ष्मभेदात् द्विविधोस्ति। तत्र स्थूलदिशो यात्रादौ गृह्यन्ते। स्थूलदिग्ज्ञानं तु ...यत्रोदितोऽर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठम् इति वचनात् भवति। तत्र रविक्रान्तेर्वैलक्षण्यादुदयास्तबिन्दूनां प्रतिदिनं भिन्नत्वाच्च रवेरुदयास्तबिन्दूस्थूलपूर्वापरौ भवतः। परन्तु याज्ञिककुण्डमण्डपगृहादीनां निर्माणे सूक्ष्मदिशां प्रयोजनत्वात् सूक्ष्मदिग्ज्ञानमावश्यकं भवति। दिशां सूक्ष्मत्वे प्रथमं भुवः समत्वमपेक्षितम्। तेन प्रथमं येन केनापि प्रकारेण भुवः समीकरणमुचितमेव। ततः समभूतले मध्याह्नकालिकीच्छाया वृत्तवहिर्गता यथा न भवेत् तथा शङ्क्वङ्गुलैरेकं दिग्ज्ञानोपयोगि वृत्तं समुचितम्।

अत्र मध्याह्नकालिकछायया रविज्ञानं आवश्यकं भवति। मध्याह्ने खमध्याद् रविविम्बावधि याम्योत्तरे नतांशा भवन्ति। एवमेव याम्ये खमध्यान्निरक्षखमध्यं यावदक्षांशाः। अतो दिक्साम्ये अनयोरन्तरेण दिग्भेदे च योगेन क्रान्त्यंशा भवन्ति। अस्याज्या क्रान्तिज्या। परमक्रान्तिज्यया त्रिज्या भुजः स्यात् तदानया केतीष्य सायनार्कभुजज्या तद् चापः क्रियते चेत् सायनार्कभुजः। भुजस्य चतुर्षु पदेषु तुल्यवात् प्रथमपदे मेषादित्रये सूर्यस्यैव भुजत्वाद्भुज एव सूर्यः। कर्कादित्रये द्वितीयपदे षड्भादूनस्य अर्कस्य भुजत्वात् भुजोनषड्भमर्कः। एवं तृतीयपदे तुलादित्रये षड्भेन हीनार्कस्य भुजत्वात् षड्युतो भुजोऽर्कः। चतुर्थपदे मकरादित्रये सूर्योनभगणस्य भुजत्वात् भुजोनभगणोऽर्क इति वैपरीत्यात् सुगममेव। यथाऽह–

स्वाक्षार्कनतभागानां दिक्साम्येऽन्तरमन्यथा॥

दिग्भेदेऽपक्रमः शेषस्तस्य ज्या त्रिज्यया हता।
परमापक्रमज्याप्ता चापं मेषादिगो रविः॥

कर्कादौ प्रोज्भ्य चक्रार्धात् तुलादौ भार्धसंयुतात्।
मृगादौ प्रोज्भ्य भगणान्मध्याह्नेऽर्कः स्फुटो भवेत्॥[५]

एकस्मिन् दिने रविक्रान्तिचलनं परमाल्पप्रमाणात्वाच्छून्यसमं स्वीक्रियते तदैकास्मिन् दिने रवेर्भ्रमणमेकस्मिन्नेवाहोरात्र वृत्ते भवेत्। छायायाः सूर्यस्य विपरीतदिशि भ्रमणात् पूर्वकाले स्थिते रवौ यावति नतांशे शङ्कुच्छायाग्रमपरदिशि वृत्तं प्रविशति परकपाले तावत्येव नतांशे स्थितेः रवौ शङ्कुछायाग्रं प्राचीदिशि[६] वृत्ताद्

---

३ भास्कराचार्यः, सिद्धान्तशिरोणिः, त्रिप्रश्नाधिकारः, श्लोकौ १०, ११

४ सूर्यसिद्धान्तः, त्रिप्रश्नाधिकारः, श्लोकः ८

५ सूर्यसिद्धान्तः, त्रिप्रश्नाधिकारः, श्लोकाः १७ – १९

६ सिद्धान्तशिरोमणिः, गोलाध्याये मध्यगति वासना, श्लोकः २४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बहिर्गच्छति। तत्र कपालद्वयेऽपि नताशयोस्तुल्यत्वादुभयत्र छायाग्रपूर्वापरसूत्रान्तररूपौ ज्यात्मकौ भुजौ तुल्यौ भवतः। अतः छायाप्रवेशनिर्गमविन्दुद्वयगता रेखा तद्वृत्तस्य पूर्णज्यारूपा सा क्षितिजकेन्द्रगतवास्तवपूर्वापररेखासमानान्तरा पूर्वापरारेखारूपा स्यात्। ततो विन्दुद्वयकेन्द्रवशाद् यद् रेखा करणेन या मत्स्याकृतिर्भवति सा रेखा वास्तवदक्षिणोत्तरा स्यादेव। एवं सूक्ष्मपूर्वादिदिक्चतुष्टयस्य ज्ञानात् पूर्वोत्तरबिन्दुभ्यां मत्स्याकरणेन ईशाननैऋत्यविदिशौ तथा पूर्वदक्षिणबिन्दुभ्यां मत्स्याकरणेन आग्नेयवायव्यविदिशौ च भवेताम्। इदं दिग्ज्ञानं तदैव समीचीनं भवति यदा रवेः क्रान्तिः स्थिरा स्यात्। अर्थात् यदि रविरयनद्वयगतः (सायनमिथुनान्तधनुरन्तयोरन्यतरगतः) स्यात्तदा क्रान्तिगतेः शून्यत्वादनेन विधिना दिग्ज्ञानं समीचीनं भवेत्। अन्यथा तु क्रान्तेः प्रतिक्षणं वैलक्ष्यण्यात् छायाग्रप्रवेशनिर्गम–कालिकनतांशयोः साम्येऽपि रवेः क्रान्त्योरग्रयोश्च न्यूनाधिकत्वात् तद्वशाज्जायमानौ प्रवेशनिर्गमकालीनौ छायाग्रपूर्वापरसूत्रान्तररूपौ भुजौ न्यूनाधिकावेव। अतो भुजाग्रद्वयगता रेखा वास्तवपूर्वापररेखा समानान्तरा न भवेत्। तेन दिग्ज्ञानं समीचीनं न भवति।

देशज्ञानम्

भूमण्डले किमप्येकं स्थानं मध्यस्थानं स्वीकृत्य तस्मात् स्थानादभीष्टस्थानं कुत्र कीयदन्तरे अस्तीति ज्ञानं कर्तुं शक्यते। मध्यरेखाया ज्ञानाभावात् ततोऽभीष्टस्थानं प्राक्पश्चाद् वा अस्तीति ज्ञानं भवति। अतः प्राचीनज्योतिविद्भिः या रेखा लङ्कोज्जयिनी कुरुक्षेत्रादिदेशान् स्पृशन्ति मेरुपर्यन्तं गच्छति सा मध्यरेखा भूमध्यरेखा वा कल्पिता।

यल्लङ्कोज्जयिनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत्।
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः॥

आदौ प्रागुदयोऽपरत्रविषये पश्चाद्धि रेखोदयात्।
स्यात्तस्मात्क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलम्॥[६]

ध्रुवस्थानाद् नवत्यंशेन कृतं वृत्तं नाडीवृत्तं भवति। तदेव वृत्तं विषुववृत्तं, कालवृत्तं च कथ्यते। नाडीवृत्ते अक्षांशाभावात् तस्य निरक्षवृत्तं नाम। नाडीवृत्तस्य धरातलगतो देशो निरक्षदेश इति कथ्यते। यतस्तत्र देशे अक्षांशा–ध्रुवतारोन्नतांशा च न भवति। नाडीवृत्तस्य धरातलगतोदेशो निरक्षदेश इति कथ्यते। निरक्षदेशे लङ्कास्ति तदा याम्योत्तरवृत्तमेव रेखावृत्तमुच्यते। तद् धरातलस्थदेशो रेखादेश इति कथ्यते। रेखायां ये देशा गतास्ते रेखादेशा ज्ञेयाः। ते लङ्कायाम्योत्तरवृत्रे गताः। याम्योत्तरवृतं प्रधानं कृत्य गणितं कुर्वन्ति। प्राचीनकाले गणितव्यवहारे लङ्काप्रदेश एव मुख्यस्थानमासीत्। इदानीमपि अयमेव मुख्यस्थानमामनन्ति ज्यौतिर्विदः। आधुनिकभूगोले लङ्का साक्षदेशीया। लङ्कानाम्ना स एव देशो विज्ञायते यत्र निरक्षविन्दुः, तत्रैव ग्रहा आगच्छन्ति। ते ग्रहाः लङ्कोदयकालिका भवन्ति। सूर्यसिद्धान्ते तु अर्धरात्रिका।

ध्रुवस्थानान्नवत्यंशैर्नाडीवृत्तं तदुच्यते।
तदेव विषुवं वृत्तं कालवृत्तमपीरितम्॥

तद् धरातलगतो देशो निरक्षः कथ्यते यतः।
न सन्त्यक्षभवास्तत्र ध्रुवतारोन्नतांशकाः॥[७]

---

७ गोलपरिभाषा, श्लोकौ २३, २४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निरक्षदेशे लङ्कास्ति, तदा याम्योत्तरवृत्तमेव रेखावृत्तमुच्यते। तद् धरातलस्थदेशो रेखादेश इति कथ्यते। यथाऽह–

लङ्का निरक्षदेशेऽस्ति तद्याम्योत्तरमण्डलम्।
रेखाख्यं तत्र यो देशो रेखादेशः स उच्यते॥[८]

यदि स्वदेशं रेखाादेशात् पूर्वस्यां दिशि तदा रेखादेशे यदर्कोदयस्तत्कालात् पूर्वमेव स्वदेशेर्कोदयः, यदि पश्चिमे तदा रेखोदयकालादनन्तरमर्कोदयः। पूर्वापरस्यान्तरं चन्द्रग्रहणाधारेऽपि ज्ञानं कर्तुं शक्यते। यथाऽह–

प्राग्भूविभागे गणितोत्थकालादनन्तरं प्रग्रहणं विधोः स्यात्।
आदौ हि पश्चाद्विवरे तयोर्या भवन्ति देशान्तरनाडीकास्ताः॥[९]

प्राचीनज्योतिर्विद्भिः पलभातोऽक्षांशाः, अक्षांशतश्च पलभासाधनं विभिन्नप्रकारेण कृतम्। अक्षांश–पलभयोर्ज्ञानं परस्परसापेक्षम्। पलभाज्ञानाय सूर्यसिद्धान्तोक्तपद्यम्।

एवं विषुवती छाया स्वदेशे या दिनार्धजा।
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा॥[१०]

विषुवद्दिनं तदेव यदा दिनरात्रीमाने समाने भवतः। तथात्वं सायनमेषादौ सायनतुलादौ च भवति। तद्दिने यदा रविर्याम्योत्तरवृत्तगतो भवति तदा दिङ्मध्यस्थद्वादशाङ्गुलशङ्कोश्छाया पलभाख्या। एवमन्यैरप्याचार्यै पलभासाधनमकारि। पलभातोऽक्षांशस्य ज्ञानं जायते। पलभातोऽक्षांशज्ञानं ग्रहलाघवग्रन्थे कथितम्।

...अक्षच्छायेषुघ्न्यक्षभाया कृतिदशमलवोना यमाशाः पलांशाः।[११]

तथा भास्करोक्ताष्टाक्षक्षेत्रेषु प्रथमद्वितीययोरक्षक्षेत्रयोरनुपातेनाक्षांशपलांशयोर्ज्ञानं सुखेन भवति।

भुजोऽक्षभा कोटिरिनाङ्गुलोना कर्णोऽक्षकर्णः खलु मूलमेतत्।
क्षेत्राणि यान्यक्षभवानि तेषां विद्येव मानार्थयशः सुखानाम्॥

लम्बज्यका कोटिरथाक्षजीवा भुजोऽत्र कर्णस्त्रिभुजे त्रिभज्या।
कुज्या भुजः कोटिरपक्रमज्या कर्णोऽग्रका च त्रिभुजं तथेदम्॥[१२]

$$\frac{\text{अक्षज्या} \times \text{पलकर्णः}}{\text{त्रिज्या}}$$

$$\frac{\text{पलभा} \times \text{त्रिज्या}}{\text{पलकर्णः}}$$

---

८ गोलपरिभाषा, २५ श्लोकः

९ सिद्धान्तशिरोमणिः, मध्यमाधिकारे भूपरिध्याद्यध्यायः, श्लोकः ४

१० सूर्यद्धान्तः, त्रिप्रश्नाधिकारः, श्लोकः १३

११ ग्रहलाघवम्, त्रिप्रश्नाधिकारः, श्लोकः ६

१२ सिद्धान्तशिरोमणिः, त्रिप्रश्नाधिकारः, श्लोकौ १३, १४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रथमाक्षक्षेत्रे पलभा भुजः, द्वादशाङ्गुलशङ्कुः कोटिः, पलकर्णः कर्णः। द्वितीयाक्षक्षेत्रे अक्ष्यज्या भुजः, लम्बज्या कोटिः, त्रिज्या कर्णः। अनयोरक्षक्षेत्रयोः साजात्यादनुपातेनाक्षज्या-पलभा ज्ञानं भवति। केशवदैवज्ञेन ग्रहकौतुके, रामदैवज्ञेन रामविनोदे, सदाशिवआप्टेमहोदयेन सर्वानन्दकरणे, केतकरेण केतकीग्रहगणिते तथाऽन्यैराचार्यैरपि स्वकीये ग्रन्थे पलभाक्षांशयोः साधनविधयः प्रदर्शिताः।

कमलाकरेण तुलांशः(दैर्घ्यांशः) ज्ञानद्वारा देशान्तरसाधनप्रकार उपस्थापितः तद्यथा।

स्पष्टभूपरिधौ स्वीयं स्थानं यावच्च योजनैः।
स्वीयं देशान्तरं ज्ञेयमथ तच्चोच्यतेऽन्यथा॥[१३]

स्वरेखादेशात् स्पष्टभूपरिधौ स्वीयस्थानं योजनैर्यावदन्तरितं यावत् स्वीयं देशान्तरं ज्ञेयम्। रोमकाख्यात् पुरात् पश्चिमे भागे द्वाविंशत्यंशैर्व्यक्षे निरक्षे स्थितम् "...खालदत्त" संज्ञं पुरमस्ति, तल्लङ्कातः ९०+२२ =११२ अशैः पश्चिमायां दिशीति। तद्गतं "...मेरुद्वयस्थानसक्तरेखावृत्तम्" निरक्षीययाम्योत्तरवृत्तं यत्, तत् स्पष्टभूपरिधौ यत्र लग्नं ततः स्वदेशावधि स्पष्टभूपरिधौ स्वकीयस्तुलांशकाः स्युः। एवं स्वरेखानगरे अर्केन्दवः ११२ तुलांशाः सदैव सन्ति। यतो लङ्कारोमकान्तरं नवत्यंशाः। रोमकखालदात्तारन्तरं द्वाविंशत्यंशाः। अतो लङ्काखालदात्तयोरन्तरम् ११२ एतन्मिता अंशा साध्यन्ते। मध्यरेखायामप्यभीष्टस्थानं मुख्यस्थानमाश्रित्य गणका गणितं कुर्वन्ति। यथा आधुनिकैः ज्योतिर्विद्भिः ..."ग्रीनवीच" प्रदेशात् स्वदेशस्य पूर्वापरदेशान्तरं गणितेन साध्यते। ग्रीनवीच रेखात् रेखांशाः अक्षांशाश्च भौगोलिकमानचित्रेऽङ्किताः सन्ति। यथा यवनपरिभाषया उच्यते।

पश्चिमे रोमकाख्याच्च द्वि-द्वि भागै पुरं किल।
खालदात्ताभिधं तस्य व्यक्षस्थं तद्गतं किल॥

लङ्कास्थानसक्तरेखावृत्तं च यत्ततः।
स्वदेशावधितुलांशाः स्पष्टभूपरिधौ स्वकाः॥

स्वरेखानगरे तुलांशाश्च सदैव हि।
अर्केन्दवोऽथ साक्षाः स्वस्वदेशस्थानजा इमे॥[१४]

स्फुटभूपरिध्यानयनं देशान्तराफलानयनं तत्संस्कारात् स्वदेशीया ग्रहा भवन्ति। यथा द्वादश-पलभयोर्वर्गयोर्मूलमक्षकर्णः। अनेन द्वादशगुणिता त्रिज्या भक्ता फलं लम्बज्या भवति। लम्बज्या गुणितो भूपरिधिस्त्रिज्यया भक्तः फलं स्वदेशसम्बन्धी स्पष्टो भूपरिधिः स्यात्। ग्रहस्य गतिः स्वरेखादेश स्वदेशयोरन्तरम् (देशान्तरम्) गुणिता तेन स्पष्टेन भूपरिधिना भक्ता फलं कलादिकं तत् फलं प्राच्यां स्वरेखादेशात् स्वदेशस्य पूर्वदिग् भागस्थितत्वे ग्रहेभ्यः कलादिस्थाने परिशोधयेत्। स्वरेखादेशात् पश्चिमदिग् भागस्थिते स्वदेशे ग्रहेभ्यः कलादिस्थाने योजयेत्। ते सिद्धाग्रहाः स्वदेशीया भवन्ति। यथाऽह-

लम्बज्याघ्नस्त्रिजीवाप्तः स्फुये भूपरिधिः स्वकः।
तेन देशान्तराभ्यस्ता ग्रहभुक्तिर्विभाजिता॥

---

१३ सिद्धान्ततत्त्वविवेकः, पृ. ६९

१४ सिद्धान्ततत्त्वविवेकः, पृ. ६९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कलादि तत्फलं प्राच्यां ग्रहेभ्यः परिशोधयेत्।
रेखाप्रतीचीसंस्थाने प्रक्षिपेत् स्युः स्वदेशजाः॥[१५]

कालज्ञानम्

छायातः कालज्ञानार्थं उन्मण्डलकर्णाच्चरज्यया गुणितात् अथवा मध्याह्नकर्णादन्त्यया गुणितादिष्टकर्णेन भक्ताद् यत् फलं लभ्यते सा इष्टान्त्या भवति। अर्थाद् त्रिज्यावर्गः पलकर्णेन गुण्यः। द्युज्याया इष्टकर्णस्य च घातेन भाज्यः। यत् फलं लभ्यते सा इष्टान्त्या। तयेष्टान्त्यया रहिताया अन्त्याया यच्छेषं तस्योत्क्रमेण धनुः कार्यम्। तस्य धनुषो यावत्यः कालास्तावन्तस्तस्मिन् काले नतासवो ज्ञेयाः। तैर्नतासुभिरुनीकृता दिनदलासव उन्नतासवः स्युः। यथा कथयति भास्करः।

उद्वृत्तकर्णाच्चरशिञ्जिनीघ्नाद्दिनार्धकर्णादथवान्त्यकाघ्नात्।
इष्टेन कर्णेन हृताद्यदाप्तमिष्यन्त्यका सैव पृथक् पृथक् स्यात्॥

पलश्रुतिघ्नस्त्रिगुणस्य वर्गोद्युज्येष्टकर्णाहतिहृद्भवेद्वा।
इष्यन्त्यका तद्रहितान्त्यकाया भवन्ति या उत्क्रमचापलिप्ताः॥

नतासवास्ते स्युरहर्दलं तैरुनीकृतं चोन्नतकाल एवम्।[१६]

छायातो अर्कानयनार्थं मध्याह्नच्छाया त्रिज्यया गुण्या। मध्याह्नच्छायाकर्णेन भाज्या। यत् फलं लभ्यते तस्य चापांशाः नतांशा भवन्ति। यद्युत्तरं छायाग्रं तदा दक्षिणा। यदि दक्षिणं तदोत्तराः। एवं दिनार्धे ये नतांशा भवन्ति ते यदि दक्षिणास्तदा पलांशैर्वियुक्ताः। यद्युत्तरास्तदा पलांशैर्युताः तदा क्रान्त्यंशा भवति। ततः क्रान्तितो वैपरीत्येन रविर्भवतीति गोले ज्ञेये। यथा कथयति भास्करः।

दिनार्धद्युतेस्त्रिज्यकाघ्न्या हृतायाः स्वकर्णेन चापांशकाः स्युर्नतांशाः।

दिनार्धे वियुक्ता युतास्ते पलांशैरुदग्दक्षिणे भाग्रकेऽर्कापमः स्यात्॥

ततः क्रान्तितो वैपरीत्येन भानुर्भवेदेतदन्यश्च गोले प्रवक्ष्ये।[१७]

एवं छायातो ये नतांशा ज्ञातास्तेषां क्रान्त्यांशानां च दिक् साम्येऽन्तरं दिग्भेदे योगः पलोभवति। यथाऽह–

नतांशापमांशान्तर तुल्येदिक्त्वे युतिर्भिन्नदिक्त्वे पलांशा भवेयुः।[१८]

इदानीं कालज्ञानार्थम्

सृष्ट्यादौ लङ्कानगर्यां कालस्य प्रवृत्तिः अभवत्। यथाऽह–

लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव।
मधोः सितादेर्दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः॥[१९]

---

१५ सूर्यसिद्धान्तः, मध्यमाधिकारः, श्लोकौ ६०, ६१

१६ सिद्धान्तशिरोमणिः, त्रिप्रश्नाधिकारः, श्लोकौ ६६, ६७

१७ सिद्धान्तशिरोमणिः, त्रिप्रश्नाधिकारः, श्लोकः ७०१२

१८ सिद्धान्तशिरोमणिः, त्रिप्रश्नाधिकारः, श्लोकः ७१

१९ सिद्धान्तशिरोमणिः, मध्यमाधिकारे कालमानाध्यायः, श्लोकः १५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र निश्चयेन नवसङ्ख्याकानि कालमानानि सन्ति। तत्र प्रथमं ब्राह्ममानम्। द्वितीयं देवमानम्। तृतीयं पितृणां मानम्। चतुर्थं प्राजापत्यं मानम्। तथा बृहस्पतेः मानं पञ्चमम्। सौरं षष्ठं मानम्। सावनं सप्तमं मानम्। चान्द्रमानमष्टमम्। नाक्षत्रं मानं नवमम्। एतान्यपि तत्रैवोक्तानि।

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।
सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव॥[२०]

विशेषतः भारतवर्षे सौरचान्द्रार्क्षसावनैश्चतुर्भिमानैः व्यवहरन्ति। यतो लोके चतुर्भिरेव मानैर्व्यवहारः प्रवर्तते। यथाऽह–

चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः।
बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यस्तु नित्यशः॥[२१]

वर्षायनर्तुयुगादिकं सौरमानात् व्यवहरन्ति लोके। मासास्तिथयश्च चान्द्रात्। व्रतोपवासचिकित्सित–सूतकवासराद्यार्कसावनात्। घटिकादिकं नाक्षत्रादेव। एवं सौरचान्द्रसावननाक्षत्रमानैश्चतुर्भिर्मिश्रितैमनुष्यमानम्।

सौरमानम्

रविर्यावता कालेनैकराशिं भुनक्ति तावत्प्रमाणं सौरमासमुच्यते। तथा तस्य त्रिंशत्तमो भाग सौरदिनम्। मासैर्द्वादशभिर्वर्षम्। व्यवहारे सौरमानस्योपयोगो भवति। वर्षायनर्तुयुगादिकालस्य गणनायामस्योपयोगो जायते। सौरमानस्योपयोगविषये सूर्यसिद्धान्ते।

सौरेण द्युनिशोर्मानं षडशीतिमुखानि च।
अयनं विषुवच्चैवं संक्रान्तेः पुण्यकालता॥[२२]

चान्द्रमानम्

शुक्लपक्षीयप्रतिपदमारभ्यः दर्शान्तावधिकाभिस्त्रिंशत्तिथिभिः चान्द्रो मासः। स्वकक्षायां स्वगत्या गच्छतोश्चन्द्रसूर्ययोर्द्वादशांशान्तरे एका तिथिर्जायते। "...दर्शसूर्यन्दूसंगमः" इति वचनात् दर्शान्ते चन्द्रार्कयोर्युतिर्भवति। प्रथमयुतिकालादन्ययुतिकालपर्यन्तं भांशतुल्यमन्तरं तत्र त्रिंशत्तिथयो भुक्ता भवन्ति। यथोक्तं भास्कराचार्येण–

"...रविन्दोर्युतेः संयुतिर्यावदन्या विधोर्मास एतच्च पैत्रं द्युरात्रम्"।[२३]

तिथिकरणम्, विवाहः, क्षौरकर्मम्, सर्वक्रियाः(जातकर्मचौलोपनयनादिका सकलाःक्रियाः) व्रतोपवास–यात्राणां क्रियाः चान्द्रेण मानेन गृह्यते। उक्तेषु कर्मसु तिथिरेव प्राधान्यं भवतीति विषये यथाऽह–

तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा।
व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते॥[२४]

---

२० सूर्यसिद्धान्तः, मानाध्यायः, श्लोकः १

२१ सूर्यसिद्धान्तः, मानाध्यायः, श्लोकः २

२२ सूर्यसिद्धान्तः, मानाध्यायः, श्लोकः ३

२३ सिद्धान्तशिरोमणिः, मध्यमाधिकारे कालमानाध्यायः, श्लोकः १९

२४ सूर्यसिद्धान्तः, मानाध्यायः, श्लोकः १३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सावनमानम्

..."उदयादुदयं भानोर्भूमिसावनवासरः" इति सौरोक्त कथनानुसारेण सूर्यस्यैकस्मादुदयाद् द्वितीयमुदयं यावत् यत् कालप्रमाणं तत्सावनदिनमुच्यते। तदेव वासरसंज्ञया लोके प्रचलति। सावनदिनविषये भास्कराचार्यः कथयति।

इनोदयद्वयान्तरं तदर्कसावनं दिनम्।
तदेव मेदिनीदिनं भवासरस्तु भभ्रमः ॥[२५]

सावनमानस्योपयोगिता व्यवहारे प्रचलिताः सन्ति। सूतकानिजननमरण सौचानि आदिशब्दात् चिकित्सितचान्द्रायणव्रतादि, तेषां निर्णयः, तथा दिनमासाब्दपाः दिवसपतिर्मासपतिर्वर्षपतिश्च सावनमानैनैव ग्राह्या। अपि च मध्यमा ग्रहभुक्तिः सावनेनैव ग्राह्या।

सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते ॥[२६]

नाक्षत्रमानम्

प्रवहगत्या नक्षत्रमण्डलस्यैकं परिभ्रमणं यावताः कालेन भवति, तावत् कालं नाक्षत्रदिनम्। नक्षत्रमुदयानन्तरं प्रवहगत्या पुनर्यावता कालेनोदेति तावत् कालो हि नाक्षत्रदिनं भवति। यथाऽह-

भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः ॥[२७]

अथ दिनगतघट्याद्यानयनम्

प्रायः सर्वे प्राचीनाचार्यैः यन्त्राणामुपयोगेन दिनगतघट्यादिज्ञानं कृतम्। यत्रं विना दिनगतादिकालं ज्ञातुमशक्यमतोक्तं भास्करेण।

दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः।
वक्ष्ये यन्त्राणि ततः स्फुटानि संक्षेपतः कतिचित् ॥[२८]

निष्कर्षः

ज्योतिषविद्या प्रयोगप्रधानचाक्षुषविद्याऽस्ति। स्वशरीरस्थचक्रद्वारा वाह्यजगतां पदार्थानां पिण्डानाञ्च स्वानुभवेन साक्षात्कृत्य श्रुतिस्मृत्यादिषु वर्णनेनास्माकं आर्षपरम्परायां वर्णनं दृश्यते। **'ऋषयो मन्त्रद्रष्यरो नतु कर्तारः'** इति। एवं योगबलेन महर्षयोः ज्योतिर्विज्ञानस्य यं सर्वोत्तमं कोशमस्मभ्यं प्रायच्छन् तस्य शोधानुसन्धानमिदानीमप्यवशिष्टं विद्यत एव। वर्तमाने संसाधननां सुलभतयापि ज्योतिर्विज्ञानस्याद्भूतं रहस्यं

---

२५ सिद्धान्तशिरोमणिः, मध्यमाधिकारे कालमानाध्यायः, श्लोकः २०

२६ सूर्यसिद्धान्तः, मानाध्यायः, श्लोकः १९

२७ सूर्यसिद्धान्तः, मानाध्यायः, १५ श्लोकः

२८ सिद्धान्तशिरोमणिः, गोलाध्याये यन्त्राध्यायः, श्लोकः १

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
सहस्रभागस्यैकांशमपि ज्ञातुमशक्ता वयम्। अन्येष्वधिकारेषु केवलं तदनुरूपकालः प्रतिपादितः। परन्तु त्रिप्रश्नाधिकारे तु दिग्देशकालानां त्रयाणामपि ज्ञानमिति सुतरां वैशिष्ट्यं तमशेषसारत्वमस्य युक्तियुक्तमितिभावः।

सन्दर्भग्रन्थसूची

आचार्यः, भास्करः (ई.१९६४) सिद्धान्तशिरोमणिः, (सम्पादकः केदारदत्त जोशी), वाराणसी : काशीहिन्दूविश्वविद्यालयः।

शर्मा, कल्याणदत्त (ई.१९९२) म.म. श्रीसुधाकर द्विवेदी वेधशाला परिचय, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

गणेशदैवज्ञः (ई.१९९४) ग्रहलाघवम्, (व्याख्याकारः केदारदत्त जोशी, द्वितीय संस्करणम्), दिल्ली : मोतीलाल वनारसीदास।

आचार्यः, भास्करः (ई.१९९८) सिद्धान्तशिरोमणिः,(सम्पादकः डा. मुरलीधरचतुर्वेदः, द्वितीय संस्करणम्), वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय।

श्रीरङ्कनाथः (ई.२००२) सूर्यसिद्धान्तः, गूढार्थप्रकाशिका (सम्पादको व्याख्याकारश्च : प्रो. रामचन्द्रपाण्डेयः), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

शर्मा, विनोदकुमार (ई.२००६) यन्त्रपरिचय, जयपुर : हंसा प्रकाशन।

दहालः आचार्यलोकमणिः (ई.२००९) भारतीयज्योतिषशास्त्रस्येतिहासः, वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।

शर्मा, श्रीसीतारामः (वि.सं.२०७१) गोलपरिभाषा, (व्याख्याकारः मुरलीधर दाहालः), काठमाडौं : एक्मी ग्लोबल पब्लिकेशन प्रा.लि.।

निरौला, नारायणप्रसादः (वि.सं.२०७८) शोधप्रबन्धः, दाङ : नेपालसंस्कृतविश्वविद्यालयः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शाङ्करवेदान्ताभिमतजीवस्वरूपविवेकः

उपप्रा.डा. उमेशप्रसादघिमिरे

वाल्मीकिविद्यापीठम्

शोधसारः

जीवब्रह्मैक्यप्रतिपादनपरकमद्वैतवेदान्तदर्शनं पौरस्त्यदर्शनेषु प्रधानं दर्शनमस्ति। अद्वैतदर्शने जीवात्मनो वैशद्येन विवेचनं विहितमस्ति। निर्गुणो निष्क्रियोऽकर्ताऽभोक्ताऽप्रमाता सन्नप्यात्मैव मायाशक्तिवशाज्जगत्सृजति लौकिकवैदिककर्माणि च व्यवस्थापयति। कर्तारं भोक्तारं प्रमातारञ्चान्तरा कर्मव्यवस्था न सप्रयोजना अतस्तत्प्रयोजनवत्त्वे कर्तृत्वभोक्तृत्वस्वरूपस्य चेतनस्याऽऽवश्यकता भवति। परमात्मनस्तु मायातत्कार्यातीतत्वा-दसङ्गत्वाच्चाकर्तृत्वमभोक्तृत्वञ्च स्वत एव सिद्धम्। कस्तर्हि कर्तृत्वादिधर्मविशिष्टो भवेत्? येन सृष्टेर्वैदिक-कर्मणाञ्च सार्थक्यं सिद्ध्येत्। अर्थात् कर्तृत्वभोक्तृत्वविशिष्टचेतनाभावे सृष्टिव्यवस्थाया एव वैयर्थ्यं स्यादिति समस्यायाः समाधानाय दर्शनेषु कर्तृत्वभोक्तृत्वादिविशिष्टं चित्तत्वमेकं परिकल्पितम्, तदेव चेतनतत्त्वमद्वैतदर्शने जीवनामधेयम्। तस्य च जीवस्य विषयोऽत्र सम्यग्विवेचितोऽस्ति। अथापि जीवपरमात्मनोर्द्वयोरेव चेतनयोरस्तित्वे द्वैतापात्तिरिति नैव शङ्कनीयम्। एकैव परमात्माऽविद्यावशाज्जीवत्वं कर्तृत्वादिकं वा भजत इति तस्य जीव-स्वरूपेणावस्थानमज्ञानजमवास्तवञ्चेति प्रतिपादयितुं शाङ्करवेदान्तदर्शने विकसितानां प्रतिबिम्बावच्छेदाभास-वादानां दृष्ट्या जीवस्वरूपविवेचनपुरस्सरं तस्य मिथ्यात्वं च साधयित्वा ***"जीवो ब्रह्मैव नापरः"*** *इति सिद्धान्तोऽस्मिन् लेखे दृढीकृतः।*

प्रमुखशब्दाः (शब्दकुञ्जी)– माया, अविद्या, ब्रह्म, जीवः, प्रतिबिम्बवादः, अवच्छेदवादः, आभासवादः।

विषयपरिचयः

पौरस्त्यदर्शनेषु शाङ्करवेदान्तदर्शनं महनीयं दर्शनम्। आत्मज्ञानादेव मोक्षः सम्भवतीति शाङ्कर-दर्शनराद्धान्तः। कर्ता भोक्ता प्रमाता वाऽऽत्मा? कर्तृत्वादिविशिष्यत्मज्ञानादेव मोक्षो भवतीति नैव युक्तः। अतो जीवस्य वास्तविकं स्वरूपं किम्? कर्तृत्वादिविशिष्टस्य जीवचेतनस्य कथं ब्रह्मणा सहाभेदः? अर्थात् तदैक्यं कथं सम्भवतीति जिज्ञासासमाधानाय शाङ्करवेदान्तपरम्परायां विकासितान् विवरणभामतीवार्तिकप्रस्थानान्तर्गतान् प्रतिबिम्बावच्छेदाभासवादानाश्रित्य जीवस्वरूपमत्र विमृश्यते।

समस्याकथनम्

शाङ्करवेदान्ते जीवस्वरूपं किमिति प्रधाना समस्या विद्यते। शाङ्करदर्शनपरम्परायां विकसितेषु प्रमुखवादेषु जीवस्वरूपनिरूपणे को मतभेदः? इत्यादिजिज्ञासाऽपरा समस्याऽस्ति।

अध्ययनस्योद्देश्यम्

समस्याकथने समुपन्यस्तसमस्यासमाधानमेवास्य शोधलेखस्य मुख्यमुद्देश्यम्। अतोऽस्मिन्नालेखे शाङ्कर-वेदान्तान्तर्गतप्रमुखप्रस्थानेषु प्रतिपादितजीवस्वरूपविवेचनम्, तत्सम्बद्धान्यसमस्यासमाधानञ्चोद्देश्यम्।

अध्ययनविधिः

प्रस्तुतालेखे सामग्रीणां सङ्कलनाय मुख्यतया पुस्तकालयः प्रयुक्तोऽति। जीवसम्बद्धसैद्धान्तिकाधारस्य स्पष्टीकरणाय शाङ्करवेदान्तसम्बद्धा उपनिषद्गीताब्रह्मसूत्रादिग्रन्थाः प्रमुखतया आधृताः सन्ति। तत्सम्बद्धसैद्धान्तिक-विवेचनाय प्रमुखरूपेण वर्णनात्मकविधिरवलम्बितश्चेदावश्यकतानुरूपो विश्लेषणात्मकविधिश्चात्र प्रयुक्तोऽस्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सीमाङ्कनम्

पौरस्त्यदर्शनान्तर्गताद्वैतवेदान्तदर्शनसम्मतमेव जीवस्वरूपमत्र विवेचितम्। अद्वैतान्यदर्शनाभिमत-जीवस्वरूपं नैवात्र विश्लेषितमस्ति। वेदान्ताभिमतजीवस्वरूपविवेचनक्रमे प्रतिबिम्बावच्छेदाभासवादाभिमत-जीवस्वरूपमत्र प्रदर्शितम्। तत्तद्वादाभिमतजीवस्वरूपविचाराणां तुलनात्मकमध्ययनन्तु नैव विहितमित्यस्य शोधलेखस्य सीमा विद्यते।

विषयप्रवेशः

संसारेऽस्मिन्नैतादृशाः सन्ति केऽपि खलु ये स्वात्मनाऽपरिचिताः स्युः। न केवलं मनुष्या अपि तु पशुपक्षि-प्रभृतयः प्राणिनोऽप्यात्मानं सम्यगवबुध्यन्ते। "अहं जानामि" "अहं करोमि" "अहं खादामि" "ममेदमस्ति" इत्यादि-प्रमातृत्वकर्तृत्वभोक्तृत्वरूपैः क्रियापदैरहर्निशं व्यवहरन्ति। तदर्थमेव चानेकभयत्रासादिकं वहन्त्यपि। सर्वापेक्षया स्वात्मानमेव प्रियतमत्वेनानुभवन्ति। अहमस्मि न वेत्यादिरूपायां स्वसत्तायां केषाञ्चित् विप्रतिपत्तिर्नास्ति किन्तु तत्स्वरूपविषये त्ववश्यमेव वैमत्यं विद्यते। श्रुतिस्मृतीतिहासपुराणादिष्वात्मनः (जीवस्य) स्वरूपं बहुधा समुप-वर्णितमस्ति। तत्र सर्वाण्यपि चार्वाकजैनबौद्धसाङ्ख्ययोगन्यायवैशेषिकमीमांसावेदान्ताख्यानि नास्तिकान्यास्ति-कानि च पौरस्त्यदर्शनानि स्वस्वसिद्धान्तानुसारेण जीवस्वरूपं विवेचयन्ति। तेष्वपि विशेषरूपेण जीवस्वरूप-प्रतिपादनायोपनिषन्मूलकं वेदान्तदर्शनं सम्प्रवृत्तम्। तत्र वेदान्तदर्शनान्तर्गता अद्वैत-विशिष्टाद्वैत-शुद्धाद्वैतादयः सर्वेऽपि सम्प्रदायाः खलु जीवस्वरूपनिरूपणे प्राधान्येनैव प्रवृत्ताः सन्तीति जानन्ति सर्वे शास्त्रचिन्तकाः। तत्राऽप्यद्वैतवेदान्तदर्शनं तत्त्वम्पदार्थनिरूपणपूर्वकं जीवब्रह्मणोरैक्यं प्रतिपादयितुं सर्वथा समर्पितमिति जीवस्वरूप-विवेकाय शाङ्कराद्वैतवेदान्तदर्शनमेवास्माभिरनुशीलनीयम्। तत्राद्वैतवेदान्तदर्शने जीवस्वरूपनिरूपणक्रमेऽनेके वादाः विकसिताः सन्दृश्यन्ते। तत्तद्वादसम्बद्धानां प्रमुखाचार्याणां मतान्यवलम्ब्यात्र जीवस्वरूपं सङ्क्षेपेण विविच्यते।

जीवलक्षणविवेकः

जीवस्य स्वरूपं किमिति साम्प्रतं विचार्यते। तत्र जीव प्राणधारणे इत्यस्मात् धातोः 'क'प्रत्यये कृते जीवशब्दो निष्पद्यते। जीवतीति जीवः इति व्युत्पत्त्या प्राणधारी जीवशब्दवाच्यः। प्राणवत्त्वम्, चेतनत्वम्, ईक्षणत्वम्, कर्तृत्वञ्चेति तस्य मुख्यं लक्षणम्। तदुक्तं शङ्कराचार्येण- **"जीवो नाम चेतनः शरीराध्यक्षः प्राणानां धारयिता तत्प्रसिद्धेर्निर्वचनाच्च"** (ब्रह्मसूत्रम् १।१।६, शाङ्करभाष्यम्)। **"जीवत्वं प्राणधारणात्"** (पञ्चदशी- ४।१०) इति कथयता विद्यारण्यमुनिनाऽपि प्राणधारण एव जीवस्य जीवत्वमङ्गीकृतम्। यथोक्तं जीवलक्षणम् -

> **चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः।**
> **चिच्छाया लिङ्गदेहस्था तत्सङ्घो जीव उच्यते॥** (विद्यारण्यः, पञ्चदशी- ४।११)

अर्थाद् विद्यारण्यमते लिङ्गदेहकल्पनाधारभूतं चैतन्यम्, तत्र कल्पितो लिङ्गदेहः, लिङ्गदेहे वर्तमानश्चिदाभासश्चेति त्रयाणां समुदायो जीव इत्युच्यते। अविद्यायां प्रतिबिम्बितं चैतन्यमेव जीवः। परेषां मते दर्पणस्थमुखप्रतिबिम्बवद् बुद्धौ विद्यमानस्य चैतन्यस्य प्रतिबिम्बो जीव इति (राधाकान्तदेवः, शब्दकल्पद्रुमः पृ.५३९)। एवमेव वेदान्तसारकृता सदानन्देनापि जीवस्य लक्षणमित्थं प्रदर्शितम्- **"अयं कर्तृत्व-भोक्तृत्व-सुखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी व्यावहारिको जीवः"** (वेदान्तसारः, खण्डः १३)। तत्रैव टीकायां रामतीर्थेन च यथा लक्षणं प्रतिपादितम्- **"अयं विज्ञानमयकोशावच्छिन्नश्चिदात्मा जीवः"** (वेदान्तसारः, विद्वन्मनोरञ्जनीटीका, पृ.१०२) इति। एतावता कर्तृत्वभोक्तृत्वप्रमातृत्वमेव जीवस्य लक्षणमिति निश्चीयते।

प्रमुखवादाभिमतजीवस्वरूपविवेकः

"जीवो ब्रह्मैव नापरः" इति वेदान्तराद्धान्तः। एतदर्थं वेदान्ते त्रयः पक्षाः (वादाः) समाश्रिताः सन्ति- १. प्रतिबिम्बवादः, २. अवच्छेदवादः ३. आभासवादश्च। तत्तद्वादानुसारं जीवस्वरूपमत्र संक्षेपेण विविच्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रतिबिम्बवादाभिमतजीवस्वरूपविवेकः

अद्वैतवेदान्तपरम्परायां प्रसिद्धे विवरणप्रस्थाने प्रतिबिम्बवादः समर्थितो विद्यते। श्रीपद्मपादाचार्या-ऽनुयायिनामस्मिन् मते जीवो नाम ब्रह्मण एव प्रतिबिम्बमिति स्वीक्रियते। एते प्रतिबिम्बवादिन आचार्याः खलु बिम्बभूताद् ब्रह्मचैतन्यात् प्रतिबिम्बभूतस्य जीवस्य पृथक्त्वं नैवाङ्गीकुर्वन्ति। यथा दर्पणे प्रतिबिम्बितं मुखं बिम्बभूतान्मुखान्नैव भिन्नं तथैव बुद्धौ प्रतिबिम्बितश्चिदात्मा बिम्बभूतात् चिद्रूपाद् ब्रह्मणो नैव भिन्नोऽस्ति। अन्तःकरणे प्रतिबिम्बितं च चैतन्यं जीव इति मन्यते। एवमज्ञानोपाधिरहितं बिम्बचैतन्यं शुद्धमस्तीति संक्षेपशारीरककारमतम्। सर्वज्ञात्ममुनिरयं प्रतिबिम्बवादी विद्यते। एतन्मते जीवेश्वरयोः प्रतिबिम्बत्वमेव। समष्ट्यज्ञाने प्रतिबिम्बितं चैतन्यमीश्वरोऽस्ति चेद् व्यष्ट्यज्ञानकार्यभूतानेकबुद्धौ प्रतिबिम्बितं चैतन्यं जीव इत्युच्यते। प्रतिबिम्बश्चायं नैव बिम्बादन्यः, तस्मात्प्रतिबिम्बोऽपि पारमार्थिक एवेति विवरणप्रस्थानानुयायिमतम्।

प्रतिबिम्बस्यापि सत्यत्वम्

प्रतिबिम्बवादिन आचार्याः प्रतिबिम्बमपि सत्यमामनन्ति। विवरणकारस्य संक्षेपशारीरककारस्य च मते जीवश्चैतन्यस्यैव प्रतिबिम्बो विद्यते। बिम्बापेक्षया प्रतिबिम्बस्य पृथक् सत्ता न विद्यते, न च तन्मिथ्यापि। बिम्बरूपेण तत्प्रतिबिम्बोऽपि परमार्थिक एव। यथा शुक्ले शङ्खे नेत्रदोषात् पीतत्वं कल्प्यते तथैव बिम्बे प्रतिबिम्बः कल्प्यते। दर्पणमवलोक्य मम मुखं मलिनम्, मया मुखं दृष्टम् इत्याद्यनुभवव्यवहारादपि बिम्बप्रतिबिम्बयोरभिन्नत्वं सिद्ध्यति। भेदव्यवहारस्त्वौपचारिकः (सिद्धान्तलेशसङ्ग्रहः, पृ.३२२ इति, मौर्यः, अद्वैतवेदान्तः, पृ.१३६)। एतेन प्रतिबिम्बवादे प्रतिबिम्बस्यापि सत्यत्वन्तथा बिम्बानन्यत्वञ्च स्वीक्रियते। यदि प्रतिबिम्बो बिम्बाद् भिन्नो मिथ्या वा स्यात् तर्हि **"तत्त्वमसि" "अहं ब्रह्मास्मि"** इत्यादिवेदान्तवाक्येषु प्रतिपादितस्य जीवब्रह्मैक्यस्य सिद्धिरेव न भवतीति तन्मतम्। यतो हि वेदान्ते जीवब्रह्मणोरैक्यमङ्गीकृतम्, ब्रह्मरूपत्वाज्जीवस्य नित्यत्वं शुद्धत्वञ्च प्रतिपादितम्। नित्यशुद्धरूपस्य जीवस्य बिम्बाद् भिन्नत्वमङ्गीकृत्य मिथ्यात्वेऽङ्गीकृते सति श्रुतिवाक्यानामेवानर्थक्यं भवति। अतस्तत्सङ्गत्यै प्रतिबिम्बस्यापि बिम्बाभिन्नत्वं सत्यत्वं वाऽङ्गीकरणीयं भवतीति विवरणप्रस्थानानुयायिनामाचार्याणां मतम्।

जीवस्य प्रतिबिम्बत्वे प्रमाणविवेकः

जीवस्य प्रतिबिम्बत्वे किं प्रमाणमिति जिज्ञासायां विद्यारण्यमुनिः श्रुतिस्मृतिसूत्रवचनानि प्रमाणत्वेनोप-स्थापयति। यथा- **"न च जीवस्य प्रतिबिम्बत्वे मानाभावः, श्रुतिस्मृतिसूत्रेभ्यस्तत्सिद्धेः। 'रूपं रूपं प्रतिरूपो बभूव' इति श्रुतिः। 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' इति स्मृतिः। 'अत एव चोपमा सूर्यकादिवत्' इति सूत्रम्"** (विवरणप्रमेयसङ्ग्रहः- १।१, पृ.२३१)। एवमेव **"रूपं रूपं प्रतिरूपो बभूव। तदस्य रूपं प्रतिचक्षमाणः"** (बृहदारण्यकोपनिषद्-२/५/१९), **"एक एव स भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्"** (ब्रह्मबिन्दूपनिषद्- १२) **"स एव इह प्रविष्टः"** (बृहदारण्यकोपनिषद्- १/४/७) **"स एतमेव सीमानं विदार्यैतयाद्वारा प्रापद्यत"** (ऐतरेयोपनिषद् ३/१२) **"तत्सृष्ट्वा तदेवानुप्राविशत्"** (तैत्तिरीयोपनिषद् २/६/१) **"आभास एव च"** (ब्रह्मसूत्रम् ३/२/१८) इत्यादिश्रुतिस्मृतिसूत्राणि जीवस्य परमात्मप्रतिबिम्बत्वे प्रमाणानि समुपलभ्यन्ते।

अवच्छेदवादाभिमतजीवस्वरूपविवेकः

अवच्छेदवादोऽयं श्रीवाचस्पतिमिश्रमतानुयायिनां सिद्धान्तः। एतद्वानुसारमन्तःकरणावच्छिन्नं चैतन्यं जीवः। मायावच्छिन्नं चैतन्यमीश्वरः। ईश्वरस्योपाधिर्माया, जीवस्योपाधिरन्तःकरणमिति विशेषः। जीवब्रह्मणोः सम्बन्धः घटाकाशमहाकाशयोरिव विद्यते। **"अंशो नानाव्यपदेशात्"** (ब्रह्मसूत्रम् २/३/४३) इत्यादिसूत्रेषु परमात्मनोंऽशत्वेन जीवस्वरूपकथनादयमवच्छेदवादोंऽशवादो वा सूत्रकाराणामभिप्रेतोऽर्थः। **"ममैवांशो जीवलोके जीवभूतः सनातनः"** (गीता- १५/७) इति स्मृतिवाक्यमपि जीवस्य ब्रह्मांशत्वं प्रतिपादयतीति भामतीप्रस्थानानुयायिनः स्वीकुर्वन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अवच्छेदवादिनः खलु "सर्वगतस्य ब्रह्मणः प्रतिबिम्बासम्भवः" इति कथयन्ति। ब्रह्मणः सूर्यवत् प्रतिबिम्बत्वे न किञ्चिदपि तात्पर्यम्। भामतीपतिना वाचस्पतिना नीरूपस्य चैतन्यस्य नीरूपेऽन्तःकरणाद्युपाधौ प्रतिबिम्बनं निराकृतम्। तथा चोक्तम्- **"रूपवद्धि द्रव्यमतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात्। चिदात्मा त्वरूपोऽविषयो न विषयच्छायामुद्ग्राहयितुमर्हति। यथाहुः- "शब्दगन्धरसादीनां कीदृशी प्रतिबिम्बता"** (अध्यासभामती)।" उदके गगनस्य न प्रतिबिम्बः, किन्त्वालोकस्य नक्षत्रादीनामेव वेति प्रतिबिम्बवादो नैवोपयुक्त इत्यवच्छेदवादस्य तर्कः। अवच्छेदवादे घटाकाशादिदृष्टान्ताः समुपयुज्यन्ते। **"अवस्थितेरिति काशकृत्स्नः"** (ब्रह्मसूत्रम्-१/४/१२) इति सूत्रभाष्यव्याख्यानावसरे वाचस्पतिः कथयति यत्- **"न जीव आत्मनोऽन्यो नापि तद्विकारः किन्त्वात्मैवाविद्योपाधानकल्पितावच्छेदः, आकाश इव घटमणिकादिकल्पितावच्छेदो घटाकाशो न तु परमाकाशादन्यस्तद्विकारो वा। ततश्च जीवात्मनोपक्रमः परमात्मनैवोपक्रमस्तस्य ततोऽभेदात्"** (ब्रह्मसूत्रम् - १/४/२२; भामती- प्रथमभागः, पृ.११४-११५)। अर्थाद् यथा महाकाशाद् घटाकाशो न भिद्यते तथैव ब्रह्मणो जीवो न भिद्यते। "जीवो ब्राह्मैव नापरः" इति मतं स्पष्टमेवावलोक्यते। अस्मिन् वादे जीवानामुत्पत्तिप्रलयौ न भवतः। तथा च श्रुतिः- **"स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति"** (बृहदारण्यकोपनिषद् २/१/२०) एवञ्च **"यस्मादात्मनः स्थावरजङ्गमं जगदिदमग्निविस्फुलिङ्गवद् व्युच्चरत्यनिशम्, यस्मिन्नेव च प्रलीयते जलबुद्बुदवत्, यदात्मकं च वर्तते स्थितिकाले"** (बृहदारण्यकोपनिषद् २/१/२०, शाङ्करभाष्यम्, पृ.४५७)। ययोर्णनाभिरेक एव प्रसिद्धः सन् स्वात्माप्रविभक्तेन तन्तुनोच्चरेत्, न चास्ति तस्योद्गमने स्वतोऽतिरिक्तं कारकान्तरम्। यथा चैकरूपादग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति, तथा सर्वे वागादयः प्राणाः, भूरादयो लोकाः, सर्वाणि कर्मफलानि, सर्वेऽधिष्ठातारो देवाः, सर्वाणि प्राणिजातानि समुत्पद्यन्त इति मन्त्रार्थोऽवगन्तव्यः।

एवमेव **"यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः"** (मुण्डकोपनिषद् २/१/१), यथा च **"सुदीप्तात् पावकादिति ब्रह्मणो जीवानामुत्पत्तिं तत्राप्ययञ्च साक्षाद् दर्शयति न जीवो म्रियते"** (छान्दोग्योपनिषद्-६/११/३)। यथा च **"स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म"** (बृहदारण्यकोपनिषद् ४/४/२५) इत्यादिश्रुतिप्रमाणेभ्यश्च जीवस्योत्पतिप्रलयौ न भवत इत्यवच्छेदवादमतं समर्थितम्।

जीवस्यावच्छेदपक्षे प्रमाणविवेकः

एकस्मादपरिच्छिन्नात् परब्रह्मणो मायाकृतोपाधिवशात् सकलप्रपञ्चः परिच्छिद्यते। यथा- अपरिच्छिन्नादाकाशादुपाधिवशाद् घटाकाशपटाकाशादयः परिच्छिद्यन्ते। तथा चोक्तं भगवता शङ्कराचार्येण- **"सत्यमेवैतत्, पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते, यथा घटकरकाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते तद्वत्"** (ब्रह्मसूत्रम् १/२/६, शाङ्करभाष्यम्, पृ.२७४) एवमेव **"ईक्षतेर्नाशब्दम्"** (१/१/५) **"स्मृतेश्च"** (१/२/६) **"शारीरश्चोभयेऽपि हि भेदेनैनमभिधीयते"** (१/२/२०), **"स्थित्यदनाभ्यां च"** (१/३/७) इत्यादिब्रह्मसूत्राणां शाङ्करभाष्येऽयमवच्छेदवादः सङ्केतितोऽस्ति। तत्तच्छूत्रशाङ्करभाष्यव्याख्यानावसरे भामतीपतिना वाचस्पतिनाऽयं वादो भृशं प्रतिपादितोऽस्ति। अज्ञानविषयीभूतं चैतन्यमीश्वरश्चेदज्ञानाश्रयीभूतं चैतन्यञ्च जीव इति वाचस्पतिमिश्रमतम्। **"यथा सुदीप्तात् पावकाद् विष्फुलिङ्गाः"** (मुण्डकोपनिषद् २/१/१), **"यथा सुदीप्तात् पावकाद् ..."** (छान्दोग्योपनिषद् ६/११/३), **"स वा एष महानजः"** (बृहदारण्यकोपनिषद् २/१/३०) **"ममैवांशो जीवलोके जीवभूतः सनातनः"** (गीता १५/७) इत्यादिश्रुतिस्मृतिसूत्रप्रमाणेभ्योऽयं वादः समर्थितः। अस्मिन् पक्षेऽज्ञाननानात्वाद् जीवनानात्वमङ्गीक्रियते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आभासवादाभिमतजीवस्वरूपविवेकः

आभासवादः श्रीसुरेश्वराचार्याभिमतः सिद्धान्तोऽस्ति। आभासवादानुसारं बुद्धौ चैतन्यस्याभास एव जीवः। अर्थादविद्यायां चैतन्यस्याभास ईश्वरस्तथा बुद्धौ चैतन्यस्याभासो जीव इति। किन्त्वाभासत्वादुभावेव मिथ्याभूतौ, न तु वास्तविकौ। अनेनाभासेनैव निर्गुणं निर्विकारं निष्कलं निरंशञ्च ब्रह्माविद्यासाचिव्येन जीवभावापन्नं जगद्भावापन्नं च भवति। कौन्तेयस्य राधेयत्ववदविकृतस्य ब्रह्मण एवाविद्यया जीवभावः। व्याधकुल-संवर्धितराजकुमारदृष्टान्तेन ब्रह्मैव स्वाविद्यया संसरति, स्वविद्यया च मुच्यत इत्याभासवादसम्मतं मतम्। आभासशब्दस्यार्थो ब्रह्मसूत्रभाष्ये, भामतीग्रन्थे परिमलकल्पतरुग्रन्थे च विशेषेण विमृष्टो विद्यते। अध्यासलक्षणप्रदर्शनक्रमे शङ्कराचार्येण **"स्मृतिरूपः परत्र पूर्वदृष्यवभासः (अध्यासः)"** इत्युक्तम्। तत्र लक्षणव्याख्यानक्रमे भामतीकारणोक्तं यत्- **"अवसन्नोऽवमतो वाभासोऽवभासः"** पुनश्च तत्रैव कल्पतरुकारेण चोक्तं यत्- **"अवसाद उच्छेदः। अवमानो यौक्तिकस्तिरस्कारः"** पुनश्च परिमलकारेण प्रोक्तं यत्- **"तिरस्कार इच्छाप्रवृत्त्यादिकार्याक्षमत्वापादनम्"** (ब्रह्मसूत्रशाङ्करभाष्यम्, भामतीकल्पतरुपरिमलसहितम्, पृ.१८)। एवं समेषामप्याचार्याणामभिप्रायोऽयम्- यस्याः प्रतीतेरुत्तरकाले तिरस्कारो बाधो वा भवति सैव प्रतीतिराभास इति। शङ्कराचार्येणापि माण्डूक्यकारिकाभाष्यक्रमे कल्पितस्य वस्तुनोऽवभासनमेवाभास इति स्वीकृतम्। तथा चोक्तम्- **"जीवो हि नाम देवताया आभासमात्रम्"** (छान्दोग्योपनिषद् ६/३/२, शाङ्करभाष्यम्, पृ . ५६७)। यथा च- **"आभास एव चैष जीवः। परमात्मनो जलसूर्यादिवत् प्रतिपत्तव्यः"** (ब्रह्मसूत्रम् २/३/५०, शाङ्करभाष्यम्)। तथाचोक्तमानन्दगिरिणापि- **"आभिमुख्येनाहमित्यपरोक्षेण भासत इत्याभासः प्रत्यक्चितो भासो नामाभासः"** (बृ.उ.भा., वा. २/१/२१६ समुद्धृतम्, शाङ्करवेदान्तकोषः, पृ. ११९)। एतावताऽभासस्य मिथ्यात्वमवबुध्यते। यथा मुखभासस्य मिथ्यात्वन्तथाचिदाभासस्यापि मिथ्यात्वमेव। तथा चोक्तं शङ्कराचार्येण- **"मुखाभासो यथादर्श आभासश्चोदितो मृषा"** (उपदेशसाहस्री २/१८/८८)। एवमाभासपक्षे आभासस्य न चितो भिन्नत्वमभिन्नत्वं तदुभयरूपत्वं वा, अतोऽनिर्वचनीयत्वमित्याभासस्य मिथ्यात्वमङ्गीक्रियते। तथा चोक्तं विद्यारण्यमुनिना- **"नायं दोषश्चिदाभासः कुटस्थैकस्वभाववान्। आभासत्वस्य मिथ्यात्वात् कूटस्थत्वावशेषणात्"** (पञ्चदशी ७/१५) **"ईषद्भासनमाभासः प्रतिबिम्बस्तथाविधः। बिम्बलक्षणहीनः सन् विम्बवद् भासते हि सः"** (पञ्चदशी ८/३२) इत्थञ्चाभासश्चैतन्यगतसत्त्वादिलक्षणहीनोऽपि सत्त्वादिरूपतया प्रतीयते, यथा मुखलक्षणहीनोऽपि मुखाभासो मुखधर्मवान् भासते। एवं मुखाभासो मिथ्यानिर्वचनीय आपातरमणीयो ज्ञेयः।

आभासभेदविवेकः

आभासस्य त्रैविध्यं माण्डूक्यकारिकायां यथा प्रतिपादितमवलोक्यते- **"जात्याभासं चलाभासं वस्त्वाभासं तथैव च। अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम्"** (४/४५) अर्थात्- अजाति सज्जातिवदवभासत इति जात्याभासम्। तद्यथा देवदत्तो जायत इति। चलाभासं चलामिवाभासत इति। यथा- स एव देवदत्तो गच्छतीति। वस्तु द्रव्यं धर्मि तद्वदवभासत इति वस्त्वाभासम्। यथा- **"स एव देवदत्तो गौरो दीर्घ इत्येमवभासते। परमार्थतस्त्वज-मचलमवस्तुत्वमद्रव्यञ्च। जात्यादिरहितत्वाद्विज्ञानं शान्तम्, अत एवाद्वयं तदित्यर्थः"** (मा.का.४/४५ शाङ्कर-भाष्यम्)। एकमेव ब्रह्मचैतन्यमज्ञानवशाज्जीवजगदीश्वररूपेण भासत इत्याभासवादाभिमतं मतम्। अज्ञानोपहित आत्माज्ञानातादात्म्यापन्नः स्वचिदाभासाविवेकाज्जीवः कर्ता भोक्ता प्रमातेति च कथ्यत इति वार्तिकारः सुरेश्वराचार्यो मनुते। प्रतिदेहं च बुद्धीनां भिन्नत्वात् तद्गतचिदाभासभेदेन तदविविक्तं चैतन्यमपि भिन्नमिव प्रतीयते। मुख्यतः कारणाभासः कार्याभासभेदेनाभासस्य द्वैविध्यमङ्गीक्रियते। तदनुसारमविद्यायां यश्चैतन्याभासः सः कारणाभासः, अहङ्कारात्मिकायां बुद्धौ यश्चैतन्याभासः स कार्याभास इत्युच्यते। कारणाभासोऽज्ञानगतः कार्याभासश्चाज्ञानजन्यवस्तुगतः। कारणाभासस्योपादानं चैतन्यम्, कार्यभासस्योपादानमविद्या मन्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आभासस्य मिथ्यात्वे दृष्यन्तविवेकः

कौन्तेयस्यैव राधेयत्ववदविकृतस्य ब्रह्मण एवाविद्यया जीवभावप्राप्तिरिति दृष्यान्तप्रदर्शनपूर्वकं जीवभावस्याभासमात्रत्वं मिथ्यात्वमसत्यत्वं वाऽऽभासवादे प्रदर्शितम्। तथा च सङ्कलितमप्ययदीक्षितेन- **"राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते। तथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः।"** इति वार्तिकोक्तेश्च (सिद्धान्तलेशसङ्ग्रहः, पृ.१५८)। अर्थात् यथा राजकुले जातः कश्चन जन्मप्रभृति व्याधकुल एव संवर्धितस्तज्जातीयैः सहवासादिजनितभ्रान्तिलक्षणाविद्यया स्वात्मानं व्याधपुत्रं मन्यते। न तु स्वतः सिद्धमपि राजपुत्रत्वमनुभवति, ततश्च बहुविधदुःखं प्राप्नोति। स च कदाचित् केनापि- त्वं राजपुत्रोऽसि न तु व्याधपुत्र इत्युपदेशं कुर्वता स्मारितनिजरूपः सन् तया स्मृत्याऽविद्याकृतस्य व्याधपुत्रत्वादेः निवृत्तौ सत्यां नानाविधदुःखं त्यक्त्वा राजपुत्रत्व-स्मृतिप्रयुक्तं श्रेयः प्राप्नोति। तथा ब्रह्माप्यनादिसिद्धया स्वाविद्यया आवृतनिजरूपं सत् जीवभावं प्राप्य स्वतःसिद्धनित्यनिरतिशयानन्दस्वरूपानुभावात् प्रच्युतं भवति ततश्च संसरति। एवं संसरत् ब्रह्म कदाचित् स्वप्नदशायामिव स्वविद्याकल्पितेन गुरुणा शास्त्रेण चोत्पादितया स्वगोचरविद्यया जीवभावादिप्रयोजका-विद्यानिवृत्तौ मुच्यते। नित्यनिरतिशयानन्दमनुभवति। स्वरूपचैतन्येनैवेति। (तत्रैव जीवानन्द-विद्यासागर-सङ्गृहीतायां व्याख्यायाम्, पृ.१५८-१५९), अर्थात् गुरूपदिष्टतत्त्वमस्यादिवाक्यजन्यज्ञानेनाज्ञाननिवृतौ सत्यामात्मनो जीवभावो निवर्तत इति भावः।

जीवस्याभासत्वे प्रमाणविवेकः

अवच्छेदवादस्य तथा प्रतिबिम्बवादस्य मूलभूताति तत्त्वानि यथा शाङ्करभाष्ये समुपलभ्यन्ते तथैवाभासवादस्यापि प्राप्यन्ते। अस्मिन् सन्दर्भे शङ्कराचार्यस्य अधोलिखितानि वाचनान्येव प्रमाणानि सन्ति। यथा- **"आभास एव च"** (ब्रह्मसूत्रम्- २/३/५०) इत्यस्य सूत्रस्य भाष्ये शङ्कराचार्यो लिखति- **"आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः, न स एव साक्षात्। नापि वस्त्वन्तरम्। अतश्च यथा नैकस्मिन् जलसूर्यके कम्पमानं जलसूर्यकान्तरं कम्पते, एवं नैकस्मिन् जीवे कर्मफलसम्बन्धिनि जीवान्तरस्य तत्सम्बन्धः"** (ब्रह्मसूत्रम् २/३/५०, शाङ्करभाष्यम्, पृ. ६२५-६२६)। एवमेव **"कार्यकारणताभावाज्जन्यजनकत्वानुपपत्तेरभावरूपत्वादचिन्त्यास्ते यतः सदैव"** (माण्डूक्यकारिका ४/५१/५२, शाङ्करभाष्यम्)। पुनश्च **"नात्माभासत्वसिद्धश्चेदात्मनो ग्रहणात् पृथक्। मुखादेश्च पृथक्सिद्धिरिह त्वन्योऽन्यसंश्रयः॥"** (उपदेशसाहस्री १८/११५) इत्यादीनि शङ्कराचार्यवचनान्याश्रित्यैव सुरेश्वरप्रभृतिभिराचार्यैराभासवादः प्रवर्तितो विकसितश्चावलोक्यत इत्याभासपक्षे प्रमाणविवेकः।

जीवस्यैकत्वानेकत्वविवेकः

जीवस्यैकत्वेऽनेकत्वे च वेदान्तदर्शने महान् विवादो विद्यते। तत्र केचिदाचार्या एकजीववादं समर्थयन्ति चेत् केचिदाचार्या अनेकजीववादं समर्थयन्ति। येषां मतेऽविद्याया एकत्वम्, तन्मते तदुपाधिकं जीवचैतन्यमेकमेवेत्येकजीववादः समर्थ्यते। येषाञ्च मतेऽविद्याया नानात्वं तथाऽविद्याया एकत्वेऽप्यन्तःकरणानां नानात्वेन तदुपाधिको जीवोऽपि नानैवेति स्वीक्रियते। तत्रैकजीववादस्यानेकजीववादस्य च सङ्क्षेपेण चर्चा क्रियते।

एकजीववादविवेकः

अद्वैतवेदान्ते ज्ञानस्य जीवोपाधित्वात् तस्य चैकत्वात् तदुपाधिक आत्मा जीवो भवन्नेक एव भवतीति कथयन्त आचार्या एकजीवादिनः सन्ति। अविद्याया एकत्वे **"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमाना सरूपाः", "तरत्यविद्यां वितताम्"** इत्यादिश्रुतिवाक्यानि प्रमाणानि सन्तीत्येकजीववादिनां मतम्। तस्मादेक एव जीवस्तेन चैकमेव शरीरं सजीवमन्यानि स्वप्नदृष्टशरीराणीव निर्जीवानि। तदज्ञानकल्पितं सर्वं जगत्, तस्य स्वप्नदर्शनवत् यावदविद्यं सर्वो व्यवहारः। बद्धमुक्तव्यवस्थापि नास्ति, जीवस्यैकत्वात्। (सिद्धान्तलेशसङ्ग्रहः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रथमपरिच्छेदः पृ.१६०)। एकजीववादेऽविद्याप्रतिबिम्बो जीवः (वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.३८३) अर्थादविद्याया एकत्वात् तत्र प्रतिबिम्बितं जीवचैतन्यमप्येकमेवेति सिद्धान्तः।

अनेकजीववादविवेकः

यत्रान्तःकरणमुपाधिस्तत्रानेकान्यन्तःकरणान्यनेके च जीवाः सन्तीत्यनेकजीववादः। तथा चोक्तं धर्मराजाध्वरीन्द्रेण- **"एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यं प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम्। बिम्बप्रतिबिम्बकल्पकोपाधिश्चैकजीववादेऽविद्या, अनेकजीववादे त्वन्तःकरणान्येव। उपाधिकृतदोषाश्च प्रतिबिम्बे जीव एव न तु बिम्बे परमेश्वरे। उपाधेः प्रतिबिम्बपक्षपातित्वाद्"** (वेदान्तपरिभाषा, विषयपरिच्छेदः, पृ.३८१-३८२)। अन्तःकरणादीनां जीवोपाधित्वाभ्युपगमेनानेकजीववादमाश्रित्यैव बद्धमुक्तव्यवस्थापि सम्भवति। (द्रष्टव्यः, सिद्धान्तलेशसङ्ग्रहः प्रथमपरिच्छेदः, पृ.१६६) अतस्तत्रानेकजीववादेऽन्तःकरणप्रतिबिम्बमेव जीव इत्युच्यते। तत्राशङ्का समुत्पद्यते- नानाजीवानां किमेकाविद्या कल्पिका? उत प्रतिजीवं भिन्ना? यद्येकैवाविद्या कल्पिकेत्युच्यते चेदेकमुक्तौ सर्वमुक्तिप्रसङ्गः, न च प्रतिजीवं भिन्ना, कल्पनागौरवात्। प्रस्तुताशङ्कानिवारणार्थं चित्सुखमुनिना निष्कर्षरूपेणायं श्लोकः समुपस्थापितः, नानाजीववादेऽनेकाविद्याकल्पनमपि नैव दोषायेति च समर्थितम्- **"अविद्या कल्प्यतेऽनेका जाग्रत्स्वप्नविभेदिनी। यथा तथैव कल्प्यन्तामनन्ताः सति कल्पके॥"** (तत्त्वप्रदीपिका, चतुर्थपरिच्छेदः पृ.५९४)। अर्थादनन्तजीवानां प्रतिभासनात् तदुपपत्तये तत्तद्धेतुभूतानेकाविद्याभ्युपगमेऽपि न दोष इति नानाजीववादसम्मतो निष्कर्षः।

जीवब्रह्मणोरभेदविवेकः

यद्यपि ब्रह्म पूर्णानन्दस्वरूपम्, जीवस्तु तिरोहितानन्दस्वरूप इति द्वयोर्भेदः स्पष्ट एवाभाति, तथापि तयोरुभयोर्जीवब्रह्मणोरानन्दरूपत्वेन साम्यादैक्यमेवेति सिद्धम्। अद्वैतदर्शने ब्रह्मैकमात्रं परमार्थतत्त्वमस्ति। अविद्याप्रभावतो जीवभावो भासते। समुदितायां ब्रह्मविद्यायां ब्रह्ममात्रमवशिष्यते। अयमेवाद्वैतसिद्धान्तो गौडपादाचार्येण यथा प्रतिपादितः- **"अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा"** (माण्डूक्यकारिका-१/१६) एवं **"तत्त्वमसि" "अहं ब्रह्मास्मि"** इत्यादिश्रुतिप्रमाणैर्जीवब्रह्मणोरभेदः प्रतिपादितः। अत एव ब्रह्मविद् ब्रह्मैव भवतीति श्रुतिः सङ्गच्छते। ब्रह्मज्ञानद्वाराऽविद्यानिवृत्तौ ब्रह्मस्वरूपस्याभिव्यक्तौ च जीवस्य ब्रह्मत्वं सम्पद्यते। तदुक्तं भगवता श्रीकृष्णेन- **"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्"** (गीता ५/१६) अर्थाज्ज्ञानद्वारा तद्विरोधिनोऽज्ञानस्य निवृत्तौ ज्ञानमादित्यवत् प्रकाशितं भवति। तदा ब्रह्मण्यल्पीयानप्यविद्यासम्बन्धो नावशिष्यते।

निष्कर्षः

पौरस्त्यदर्शनेष्वद्वैतवेदान्तदर्शनं सर्वातिशायि दर्शनमस्ति। "जीवो ब्रह्मैव नापरः" इति शाङ्करसिद्धान्तः। तत्सिद्धान्तस्यावबोधाय सर्वैरपि प्राणिभिरहन्त्वेनानुभूतस्य जीवस्य स्वरूपं ज्ञातव्यं भवति। जीवस्वरूपविवेचनाय जीवस्य ब्रह्माभिन्नत्वप्रतिपादनाय वा वेदान्तदर्शने प्रतिबिम्बवादः, अवच्छेदवादः, आभासवादश्चेति त्रयः पक्षा अवलम्बिताः सन्ति। तत्र प्रतिबिम्बवादानुसारं प्रतिबिम्बोऽपि जीवो न बिम्बभूताद् ब्रह्मचैतन्याद् भिन्नः। अर्थाद् बिम्बभूतब्रह्मचैतन्यं यथा सत्यं तथैव प्रतिबिम्बभूतं जीवचैतन्यमपि सत्यमेव। यथा दर्पणस्थं मखं पृथग्रूपेण मिथ्या, बिम्बरूपेण सत्यमिति तथैव जीवचैतन्यमपि पृथग्रूपेण मिथ्यास्ति चेद् बिम्बरूपेण सत्यमित्यङ्गीकृतम्। अतस्तत्त्वमसि, अहं ब्रह्मास्मीत्यादिजीवब्रह्मैक्यसाधकान्युपनिषद्वाक्यानि प्रतिबिम्बवादे साधु सङ्गच्छन्त इति निष्कर्षो निष्पन्नः। तत्रावच्छेदवादानुसारमुपाध्यवच्छिन्नोऽपि जीवो न ब्रह्मभिन्नः। उपाधिवशाद् भिन्नोऽपि जीवः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पारमार्थिकरूपेण ब्रह्मैव। यथा घटाकाशो न महाकाशाद् भिन्न इति वक्तुं शक्यते तथैवोपाध्यवच्छिन्नोऽपि जीवो वस्तुतः पारमार्थिकं ब्रह्मैवेति सिद्धान्तः स्थापितः। आभासस्यावभासमात्रत्वादाभासवादानुसारं जीवो नाम न किमपि किन्त्वाभासमात्रम्। आभासस्याध्यासरूपत्वादज्ञानदशायामेव तत्प्रतीतिः। सा च प्रतीतिः ज्ञानदशायां नावशिष्यते। आभासस्य मिथ्यात्वादेकं ब्रह्मैव परमार्थं सदिति शाङ्कराद्वैतराद्धान्तः समीचीन इति निष्कर्षः सम्प्राप्तः। एवं जीवस्वरूपविवेचनादद्वितीयात्मचैतन्यवादोऽत्र साधितः। अतो निःशङ्कतया वक्तुं शक्यते यत्-जीवो वस्तुतो न ब्रह्मभिन्नः, जीवस्य स्वरूपं ब्रह्मैव। स्वस्वरूपावाप्तिस्तथा स्वस्वरूपेणावस्थानमेवाद्वैतदर्शनस्य परमं प्रयोजनमिति दिक्।

सन्दर्भग्रन्थसूची

१. अद्वैतवेदान्त (२००९), मौर्यः श्यामवृक्षः, दिल्ली : सत्यम् पाप्लिशिंग हाउस।

२. अद्वैतवेदान्त का ऐतिहासिक विवेचन (२०११), मिश्रः हृदयनारायणः, लखनऊ : उत्तर प्रदेश हिन्दीसंस्थान।

३. अद्वैतवेदान्ते भामतीप्रस्थानस्य तुलनात्मकमध्ययनम् (ई. २०१३), एम् वसन्ता, दिल्ली : नाग पाब्लिशर्स।

४. ईशादि नौ उपनिषद् (२०६८), शाङ्करभाष्येण हिन्द्यनुवादेन च समन्विता, गोरखपुर : गीताप्रेस।

५. ईशादि दश उपनिषद् (२०७३) व्या. गिरिः रामानन्दः, देवघाटधाम : महेश-संस्कृत-गुरुकुलम्।

६. छान्दोग्योपनिषत् (२०६९) शाङ्करभाष्यसमन्विता, गोरखपुर : गीताप्रेस।

७. तत्त्वप्रदीपिका (ई.२००५), मुनिः चित्सुखः, वाराणसी : चौखम्बा विद्याभवन।

८. तुलनात्मकदृशा दर्शनान्तराद्वैतदर्शनाभिमतमोक्षतत्त्वविवेकः (२०८०), घिमिरे उमेशप्रसादः, (अप्र.वि.शो.प्र.), दाङ : अनुसन्धानकेन्द्रम्, नेपाल-संस्कृत-विश्वविद्यालयः।

९. पञ्चदशी (तत्त्वविवेकप्रकरणव्याख्या, २०७०) व्याख्याकारः- कौण्डिन्न्यायनः सुमोदवर्धनः, काठमाडौं : विद्यार्थी पुस्तक भण्डार।

१०. पञ्चदशी (ई २०१२), हिन्दी अनुवाद, सङ्कलक- दशोरा नन्दलाल, हरिद्वार : रणधीर प्रकाशन।

११. बृहदारण्यकोपनिषत् (२०६८), शाङ्करभाष्यसमन्विता, गोरखपुर : गीताप्रेस।

१२. ब्रह्मसूत्रम् (ई. १९९६), शाङ्करभाष्यसहितम्, दिल्ली : परिमल पब्लिकेशन्स।

१३. भारतीय दर्शन (२०११), उपाध्याय बलदेव, वाराणसी : शारदा मन्दिर।

१४. वल्लभवेदान्तशाङ्करवेदान्तदृष्ट्या अद्वैतसिद्धिमण्डनम् (२०६५), मिश्रः, सुधाकरः, वाराणसी : सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः।

१५. विवरणप्रमेयसङ्ग्रहः, (ई. २०१२) हिन्दी व्याख्या, व्याख्याकार- ललित प्रसाद, वाराणसी : भारतीय विद्या प्रकाशन।

१६. वेदान्तपरिभाषा (ई. १९८३), धर्मराजाध्वरीन्द्रः, व्याख्याकार शास्त्रीगजानन., वाराणसी : चौखम्बा विद्याभवन।

१७. वेदान्तसारः (१९७५), जेकब, जी.ए. (सम्पा.) वाराणसी : चौखम्बा अमरभारती प्रकाशन।

१८. वेदान्तसिद्धान्त, (२०७१), घिमिरे उमेशप्रसाद, रामेछाप : नितु घिमिरे।

१९. शाङ्करवेदान्तकोशः (ई. १९९८), पाण्डेयो मुरलीधरः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

२०. श्रीमद्भगवद्गीता, (२०७२), शाङ्करभाष्यसमन्विता, वाराणसी : दक्षिणामूर्तिमठ प्रकाशन।

२१. संक्षेपकशारीरकम् (पञ्चप्रक्रियासहितम्, ई.१९८७), सर्वज्ञात्ममुनिः, वाराणसीः षड्दर्शनप्रकाशन प्रतिष्ठान,

२२. संस्कृत वाङ्मयका बृहद् इतिहास (२०६४), रथः श्रीनिवासः, उत्तरप्रदेश संस्कृत संस्थान।

२३. सिद्धान्तबिन्दुः (ई. १९७८), श्रीगौडब्रह्मानन्दसरस्वती, वाराणसी : महेश-अनुसन्धान-संस्थानम्।

२४. सिद्धान्तलेशसङ्ग्रहः (ई. १९९२), दीक्षितः, अप्पय्यः, (द्वि.सं.), वाराणसी : चौखम्बा विद्याभवन।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रेषु धर्मविवेचना

उप्रा.डा. प्रकाशढकालः

वाल्मीकिविद्यापीठम्

लेखसारः

अस्मदीयैः प्राचीनैर्महर्षिभिः प्रतिपादितस्तथा अस्माभिः आचरितः परिपालितो वा सनातनधर्मः एव वास्तविकधर्मो वर्तते। इममेव धर्मं सनातन धर्मः इति मत्वा वयम् अनुसरणं कुर्वन्तः स्मः। सनातनधर्मः एव अस्मान् परमात्मनः स्वरूपं दर्शयति। भारतवर्षे हिमालयकक्षे ऋषिभिर्मुनिभिर्वा सेवितो वेदादिशास्त्रनिर्दिष्टो धर्मः एव सनातनो वैदिकश्च धर्मो वर्तते। अस्मिन् एव सनातनधर्मे विभिन्नाः आश्रमाश्च प्रतिपादिताः (निर्दिष्टाः) सन्ति। शास्त्रोदिताश्रमधर्मानुसारेण विभिन्निवर्णयुताः मानवाः स्वधर्मप्रतिपालनपूर्वकं जीवनयापनं कुर्वन्ति। अस्यां रचनायां सनातनधर्मस्य वर्णनमस्ति। तथैव सनातनधर्मे प्रतिपादितानां चतुर्णामाश्रमाणां (ब्रह्मचर्याश्रम-गृहस्थाश्रम-वानप्रस्थाश्रम-सन्यासाश्रमाणां) विविधधर्माणां (वर्णधर्माऽऽश्रमधर्म-वर्णाश्रमधर्म-गुणधर्म-निमित्त-धर्म-साधारणधर्माणां) च वर्णनं वर्तते। तथैव महर्षिणा मनुना निगदितेषु धर्मेषु धृतिः, क्षमा, दमः, अस्तेयम्, शौचम्, इन्द्रियनिग्रहः, धीर्, विद्या, सत्यम्, अक्रोधः एतादृशानां आचरणानां कृत्यानां वा विवेचना अस्ति।

शब्दकुञ्जिका— आचारसंहिता, अग्निपरिचरणम्, पञ्चमहायज्ञः, भूतयज्ञः, अवष्टम्भः।

विषयप्रवेशः

धर्मशब्दः धृधातोः निर्मितः वर्तते। अस्यार्थः धारणं पोषणं वा भवति। धर्म एवास्माकं जीवनपद्धतिरस्ति। जन्मतः मृत्युपर्यन्तं क्रियमाणानि कर्तव्यानि एव धर्मः। मानवेन कर्तव्यं यत् किमपि कार्यं नियमे स्थित्वा परिपालनीयम्। कार्यकरणसमये कर्तव्यमपि बोद्धव्यम्। कर्तव्यबोधः एव धर्मः अस्ति। धर्मः इति मानवजीवनस्य दैनिकी कथं सुसंस्कृता व्यवस्थिता च करणीया इत्यस्मिन् विषये प्राचीनकालादेव कृतं चिन्तनमेव।

सामान्यतया धर्मेण सदाचारः, सत्कर्म, पुण्यकर्म वा इति ज्ञायते। ईश्वरसत्तायां विश्वासः अथवा ईश्वरस्य आराधनासम्बन्धिगतिविधयः एव धर्मः। परम्परायाः प्रचलितस्तथा कैश्चन महापुरुषैः प्रतिपादितः आचरितो वा सम्प्रदायो मतं वा धर्मः। अनेन वचसा हिन्दुः, बौद्धः इस्लामः इसाई इत्यादयो धर्माः वर्तन्ते। प्राणीषु वस्तुषु च सदा स्थितो गुणः स्वभावः मूलप्रकृतिश्च धर्मः एव।[२९] धर्मस्य विभिन्नप्रसङ्गानुसारेण अर्थाः प्रतिपादिताः सन्ति तथापि अस्मिन् अनुसन्धाने (शोधकार्ये) समाजे परम्परायाः प्रचलितस्था कैश्चन महापुरुषैरपि आचरितो निर्दिष्टो वा, ईश्वरस्य आराधनासम्बद्धं मतं सम्प्रदायो वा धर्मः अस्ति। न केवलं मानवस्य किन्तु अखिलस्य चराचरजगतः कल्याणं भवति इति सम्बन्धे कृतानां चिन्तनानामाचारसंहिता एव धर्मः। यथा— गृहस्थेन आचरितव्यो धर्मः, शासकेन पालनीयो धर्मः, शिक्षकस्य धर्मः, विद्यार्थिनः धर्मः इत्यादयाः विविधाः धर्माः वर्तन्ते। सामान्यतया धर्मः षड्विधो वर्तते। ते च यथा—

१) वर्णधर्मः २) आश्रमधर्मः ३) वर्णाश्रमधर्मः ४) गुणधर्मः ५) निमित्तधर्मः ६) साधारणधर्मः।[३०] एताः धर्माः स्मार्तः धर्मः इति कथितः।

---

१. नेपाल प्रज्ञा-प्रतिष्ठान, नेपाली बृहत् शब्दकोश,वि.सं. २०६७ सातौं सं.,काठमाडौं : नेपाल प्रज्ञा-प्रतिष्ठान, पृ. ६४७।

२. धर्मशब्दः षड्विधस्मार्तधर्मविषयः। तद्यथा-वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मः साधारणधर्मश्चेति।१।१॥ याज्ञवल्क्यस्मृति मि.टीका।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समस्याकथनम्

वैदिकः सनातनश्च धर्मः सर्वप्राचीनो धर्मो वर्तते। अस्मिन् धर्मे मानवजीवने आवश्यकानि विभिन्नानि व्यवहारिकानि विषयवस्तूनि प्रतिपादितानि सन्ति। इदानीं समाजे शास्त्रनिर्दिष्टानां वर्णधर्मादीनां नाचरणेन विविधाः समस्याः दृष्टयः सन्ति। तेन समाजे शास्त्रोदितायाः धर्ममर्यादायाः स्थापनार्थं आचरितव्यानां कार्याणामध्ययनं, विश्लेषणं विवेचनञ्च अस्यानुसन्धानस्य समस्याकथनमस्ति।

अध्ययनोद्देश्यम्

प्रस्तुतशोधस्य निम्नलिखितानि उद्देश्यानि सन्ति–

क) धर्मशास्त्रे उल्लिखितस्य धर्मस्य धार्मिकसामाजिकाचरणयोः ज्ञानप्रदानम्।

ख) चत्वाराश्रमास्तथा तेषु आश्रमेषु परिपालनीयानां नियमानां व्यवहारिकपक्षस्य विवेचनम्।

शोधविधिः

शोधकार्ये बहूनि पुस्तकादीनि सामग्रीवस्तूनि आवश्यकानि भवन्ति। तथैव प्रस्तुतानुसन्धानाय प्राथमिकसामग्रीरूपेण धर्मशास्त्रस्य स्मृतिग्रन्थाः सूत्रग्रन्थाश्च गृहीताः सन्ति। एष्वतिरिक्तानां वेदेतिहासपुराणादिग्रन्थाः सहायकसामग्रीरूपेण गृहीताः वर्तन्ते। धर्मशास्त्रस्य विविधानां ग्रन्थानां टीका, भाष्यम्, वृत्तिरपि सामग्रीरूपेण प्रयुक्ताः सन्ति। सामग्रीसङ्कलनाय पुस्तकालयविधिः प्रयुक्तो वर्तते। सङ्कलितानां सामग्रीणां वर्णनात्मक–विश्लेषणात्मक–विवेचनात्मक–तुलनात्मकविधिषु स्थित्वा अध्ययनं कृतमस्ति। धर्मशास्त्रस्य विशिष्टविद्वद्भिः सह कृताः प्रश्नोत्तराः अपि शोधकार्ये समाविष्टाः वर्तन्ते।

धर्मशब्दस्य परिचयः

धृ धारणे इत्यस्माद् धातोः ध्रियते लोकः अनेन इति धर्मः। धरति धारयति वा लोकमिति धर्मः। धर्मशब्दस्य अर्थविषये नैकमतं दृश्यते। अनेकैः विद्वद्भिः अनेकेषु ग्रन्थेषु धर्मस्यार्थनिरूपणं स्वतन्त्ररूपेण कृतमस्ति। धारणम्, अवलम्बनम्, पालनम्, पोषणम्, धार्मिकक्रिया, संस्कारः, कर्तव्यम्, जातिः, सम्प्रदायः आचारः व्यवहारः, प्रायश्चित्तः, दानम्, विधिः, प्रचलनम्, अधिकारः, औचित्यम्, पवित्रता, नैतिकता, प्रकृतिः स्वभावः, चरित्रम्, विशेषता, समानता, अहिंसा, यज्ञः, सत्सङ्गः, भक्तिः, रीतिः, सत्यम्, ज्येष्ठः पाण्डवः युधिष्ठिरः, मृत्योर्देवता यमराजः इत्यादयः धर्मस्यार्थाः ऋषिभिर्मुनिभिः पौरस्त्यविद्वद्भिर्वा स्वरचितेषु धार्मिकग्रन्थेषु वर्णिताः। धर्मशब्दः प्रथमतया ऋग्वेदे प्रयुक्तोऽस्ति। तत्र धर्मशब्दः धार्मिकविधिः, व्रतम्, आचारः इति विविधेषु अर्थेषु प्रयुक्तो वर्तते। श्रीमद्भगवद्गीतायां श्रीकृष्णः अर्जुनं प्रति धर्मस्य महत्त्वं दर्शयति।[३] सम्यग् आचरितात् परधर्मात् गुणरहितः अपि स्वधर्मः श्रेष्ठो भवति। किञ्च स्वधर्मे मरणमपि श्रेयः। परधर्मस्तु अनर्थजनको भवति।

सनातनपरम्पराया अपर नामः हिन्दु

हीनं दूषयति इति व्युत्यत्त्यनुसारेण हिन्दुशब्दस्य निर्माणं भवति। सदाचाराणां धर्मशास्त्रैः निर्दिष्टाचाराणां वा या अपालकास्तथा असदाचाराणां निन्दिताचाराणां धर्मशस्त्रैर्निषिद्धाचाराणां वा पालकास्तान् यः दूषयति स हिन्दुरित्यर्थः। 'हिनस्ति दुर्गुणान् यो हि स वै हिन्दुः प्रकीर्तितः' इत्यस्माद् हिनस्ति दुर्गुणान् इति व्युत्पत्त्यापि हिन्दुशब्दः निर्मितो भवति। असदाचार–अनाचार–भ्रष्टाचार–दुराचार–कदाचार–हिंसा–स्तेय–काम–क्रोध–लोभ–

३. श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ श्रीमद्भगवद्गीता ३/३५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मद-मोह-मार्त्सयादीन् दुर्गुणान् यः दूषयति हिनस्ति वा तथा सदाचार-अहिंसा-अस्तेयादीन् सद्गुणान् आचरति पालयति वा स हिन्दुरिति कथ्यते।[३२]

अनेन श्लोकेन सनातनधर्मः कः इति उच्यते। अर्थात् सर्वेषु भूतेषु मनसा वाचा कर्मणा द्रोहरहितभावेन दयानुग्रहदानादिकरणमेव सनातनधर्मः। सनातनधर्मः एव हिन्दुधर्मः अस्ति। ये मनुष्याः ओङ्कारमन्त्रमूलाः गोभक्ताः देवपूजकाः सदाचारणतत्पराः ते हिन्दवः कथ्यन्ते।[३३] एवमेव भगवती पार्वती भगवन्तं शिवं प्रति अध्यात्मरामायणस्य बालकाण्डे सनातनशब्देन सम्बोधनं करोति।[३४] सा तत्र शिवं पृच्छति यद् भगवतः श्रीरामस्य सनातनतत्त्वं किमिति? तद् मां वदतु। तेनैव प्रकारेण श्रीमद्भगवद्गीतायामपि श्रीकृष्णः सनातनधर्मस्य स्वरूपमस्तीति अर्जुनः कथयति।[३५] भगवान् श्रीकृष्णोऽपि अस्मिन् संसारे वर्तमानेषु प्राणिषु ममैवांशः वर्तते इति कथयन् जीवात्मानं सनातनः इति सम्बोधयति।[३६] सारतः सनातनपरम्पराया अपर नामः इति हिन्दुः।

सनातनधर्मस्यावश्यकता

शास्त्रेषु चतुर्भ्यः वर्णेभ्यः चतुर्भ्यः आश्रमेभ्यश्च धर्ममर्यादा प्रतिपादिता वर्तते। धर्ममर्यादा पालनीया। तदेव शास्त्रप्रतिपादितः स्वधर्मः वर्तते। यः स्वधर्मनिषिद्धाचरणं करोति सः पापभुग् भवति। तस्मात् कल्याणाभिलाषिभिः जनैः स्वधर्मः पालनीयः। धर्मे वर्धिते आत्मन उन्नतिः वर्धते। धर्मे ह्रसिते चेद् आत्मन उन्नतिरपि हीयते। तेन कारणेन मनुजैः कदापि धर्मलोपो न करणीयः। सदा धर्मकार्यं कर्तव्यम्।

सर्वे जनाः सुखम् अभिलषन्ति। तथापि ते जनाः दुःखमात्रमभवत् इति वदन्ति। वस्तुतः सुखं धर्माचरणेन प्राप्यते। तेन सर्वै एव जनैः निजवर्णाश्रमव्यवस्थायाः स्वस्वधर्मपालनं कर्तव्यम्, तत्पश्चादेव सुखं लभ्यते। केनापि प्रकारेण कैश्चन मनुजैः धर्महानिः न करणीया। तद् ऋते यथाशक्त्यानुसारेण धर्माचरणं कृत्वा धर्मो वर्धनीयः। यतः धर्मतः सुखम् आनन्दानुभूतिश्च प्राप्यते चेद् अधर्माद् दुःखं मनसि ग्लानिश्चोपपद्यते।

धार्मिकाणां सत्वरं विनाशं दुःखप्राप्तिञ्च दृष्ट्वापि अधर्मः न पालनीयः। धर्मं कर्तुं काठिनता जातापि धर्मः न त्यजनीयः। स्वाचरितं पापं क्षेत्रे रोपितबीजसदृशं वर्तते। तत् त्वरितं फलं न ददाति, शनै शनैः फलयुक्तं भूत्वा पापकर्तुः मूलमेव विनश्यति। अर्थाद् अधर्मः समूलं पापकर्तारं विनश्यति। अधर्मेणार्जितं धनम् आदौ सुखानुभूतिं कारयति। तत्र सम्पत्यादिवैभवानां वृद्धिरपि भवति। शत्रुरपि जीयते। परन्तु समये आगते सति अधर्मकर्तुः नाशं भवति। अधर्मकर्ता बहूनि दुःखानि च प्राप्नोति। सः विविधैः दुःखै पीडितो भवति।

मनुस्मृति-याज्ञवल्क्यस्मृत्यादीनां धर्मशास्त्रग्रन्थानामनुसारेण धर्मः पञ्चविधो वर्तते। तद्यथा— १. वर्णधर्मः २. आश्रमधर्मः ३. वर्णाश्रमधर्मः ४. नैमित्तिकधर्मः ५. गुणधर्मश्चेति। एतानि धर्माणि विषये व्याख्या प्रारभ्यते।

---

४. अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा। अनुग्रहश्च दानं च सतां धर्मः सनातनः॥ १२।१६० शान्तिपर्व, महाभारत।

५. ओङ्कारमन्त्रमूलाश्च गोभक्ता देवपूजकाः। कथ्यन्ते हिन्दवस्ते हि सदाचारणतत्पराः॥
सिन्धवो हिन्दवस्ते जाताः सिन्धुर्हिन्दुरिहोच्यते।भाषायां सिन्धवः सर्वे हिन्दवः परिकीर्तिताः॥
पृष्ठ ३,हिन्दु संस्कार परिचय र विमर्श, डा. लक्ष्मीकान्त पन्थी।

६. नमोऽस्तु ते देव जगन्निवास सर्वात्मदृक् त्वं परमेश्वरोऽसि। पृच्छामि तत्त्वं पुरुषोत्तमस्य सनातनं त्वं च सनातनोऽसि॥ ७।१ बालकाण्ड रामायण।

७. सनातनस्त्वं पुरुषो मतो मे ११।१८ श्रीमद्भगवद्गीता।

८. ममैवांशो जीवलोके जीवभूतः सनातनः। ७।१५ श्रीमद्भगवद्गीता।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्णधर्मः

अस्मदीयेषु शास्त्रेषु मानवाः ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेषु चत्वारवर्णेषु विभाजिताः वर्तन्ते। वर्णव्यवस्था एव समाजस्याधारो वर्तते। धर्मः इति कर्तव्यं कर्म वा। चतुर्णामेव वर्णानां कर्म संस्कारश्च वर्णधर्मः। हिन्दुधर्मातिरिक्तान्यधर्मेष्वपि विविधाः सम्प्रदायाः (स्कन्धाः) वर्तन्ते। यथा इस्लामधर्मे द्वौ स्कन्धौ स्तः। तत्र सियासुन्नीनामकौ स्कन्धौ वर्तेते। क्रिश्चियनधर्मे तु क्याथोलिक प्रोटेस्टेन्ट इति नामकौ स्तः। किन्तु हिन्दुधर्मस्य वर्णव्यवस्था कर्मानुसारिणी वर्तते। ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां कर्तव्यानि वेदादिशास्त्रेषु स्पष्टतया वर्णितानि सन्ति।

ब्राह्मणधर्मः

भगवतः विष्णोः मुखाद् ब्राह्मणाः सञ्जाताः इति मन्यते।[३७] हिन्दुसमुदाये ब्राह्मणस्य स्थानं सर्वोपरि वर्तते। यथा— गुरुग्निद्विजातीनां वर्णानां ब्राह्मणो गुरुः इति। अर्थात् सर्वेषु वर्णेषु ब्राह्मणः श्रेष्ठः। धर्मशास्त्रकारैः अध्ययनम्, अध्यापनम्, यजनम्, याजनम्, दानम्, प्रतिग्रहमिति ब्राह्मणधर्माः कथिताः।[३८] शास्त्रोदितानि नित्यकर्माणि ब्राह्मणानां मुख्यधर्माः।[३९] वेदाध्ययनम्, सर्वेषु मित्रवदाचारणमपि ब्राह्मणस्य प्रमुखाः धर्माः। ब्राह्मणेन स्वधर्मः, स्वं, अन्या जनाश्च रक्षणीयाः। ब्राह्मणस्य मुख्यधर्मः शास्त्राध्ययनं विधाय शास्त्रस्य गुह्यं रहस्यं च ज्ञानं सर्वेभ्यः जनेभ्यः प्रदानम् इति। यः मानवः स्ववाणीद्वारा अर्थात् प्रवचनेन अध्यापनेन च जीवति सः ब्राह्मणः कथ्यते। ब्रह्म कर्मविषये श्रीमद्भगवद्गीतायां यदुल्लिखितं वर्तते।[४०] मनोनिग्रहः, बाह्येन्द्रियनिग्रहः, विविधं व्रतम्, शुचित्वम्, क्षमा, अवक्रता, ज्ञानम्, विज्ञानम्, आस्तिक्यं च ब्राह्मणनां स्वभावात् जातम् इति। वर्तमानसमये वर्णधर्मं काश्चन मानवाः न पालयन्ति तथापि बहवः जनाः वर्णधर्मानुसरणं कृत्वा जीवनं यापयन्ति। जीवनसाफल्यार्थं ते जनाः वर्णधर्माः साधनरूपेण स्वीकुर्वन्ति।

क्षत्रियधर्मः

भगवतः नारायणस्य बाहुभ्यां समुत्पन्नः क्षत्रियः इति मन्यते।[४१] क्षत्रियः स्वहस्तेन जीवति। अर्थात् क्षत्रियं राजदण्डं धृत्वा शास्ति। परन्तु तद्दण्डस्य प्रयोगं केवलं नियमानुसारेण एव कुर्वन्ति न तु स्वेच्छया। प्रजानां सुरक्षणम्, दानम्, वेदादिशास्त्राणामध्ययनम्, राज्यसञ्चालनम्, इत्यादीनि कार्याणि क्षत्रियस्य।[४२] नाध्यापनम्, प्रजापालनम्, तस्कारादीनां ताडनं मारणं वा, रणभूमौ वीरत्वप्रदर्शनम् इत्यादयः क्षत्रियस्य धर्माः मन्यन्ते।[४३] राज्यस्य अवष्टम्भरूपेण (आधाररूपेण) क्षत्रियस्य महत्त्वं वर्णितमस्ति। मुख्यतः क्षत्रियः राष्ट्रसुरक्षणार्थं जनसेवायै च सुत्पादितो वर्णो वर्तते। शास्त्रे क्षत्रियः एव राज्ञः भवितव्यः इति कथितः। स्वशास्त्रेण शास्त्रबलेन च राज्यजनतयोः सुरक्षरणमेव क्षत्रियस्य प्रमुखो धर्मः। अधुना यः स्वबाहुबलेन ज्ञानेन च देशसेवां करोति सः एव क्षत्रियः इति

---

९. ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥१०।९।१२ ऋग्वेद।

१०. अध्यापनमध्ययने यजने याजने तथा। दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्॥ ८८/१ मनुस्मृति।

११. परिनिष्ठितकार्यास्तु स्वाध्यायेनैव ब्राह्मणः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥१२।६० शान्तिपर्व,महाभारत।

१२. शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥ ४२।१८

१३. ब्राह्मणोऽस्य........॥१०।९।१२ ऋग्वेद, पूर्ववत्।

१४. प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासत॥ ८९/१ मनुस्मृति।

१५. नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्। नित्योद्युक्तो दस्युवधे रणे कुर्यात् पराक्रमम्॥१४।६०। शान्तिपर्व,महाभारत।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मन्यते। श्रीमद्भगवद्गीतायां क्षात्रकर्मविषये यत् कथयति।[४४] विक्रमः, आत्मविश्वासः, धैर्यम्, सामर्थ्यम्, युद्धे अपराङ्मुखीभावः, दानम्, प्रभुत्वं च क्षत्रियाणां स्वभावात् जातं कर्म।

वैश्यधर्मः

भगवतः विष्णोः उरुभ्यां समुत्पन्नः वर्णः वैश्यः इति कथ्यते। मानवजीवनस्य रक्षार्थं सञ्चालनार्थं आवश्यकानां वस्तूनां विक्रयणम्, राज्याय राजस्वप्रदानम् (करप्रदानम्) चेति वैश्यस्य कर्तव्यानि निर्दिष्टानि। पशूनां रक्षणम्, दानम्, अध्ययनम्, व्यापारसञ्चालनम् इति वैश्यस्य प्रमुखाः धर्माः।[४५] व्यापाराद् स्वजीवनसञ्चालनम्, राज्याय राजस्वदानञ्च सत्कार्यमेवास्ति। क्रयणं विक्रयणं कृत्वा अभावपूर्तिकरणमेव वणिकः परमो धर्मः।[४६] साम्प्रतं राज्याय राजस्वं ददद् व्यापारमाध्यमेन जनतायाः सेवनमेव यस्य कस्यापि वणिकः परमो धर्मः अथवा एतादृशं कार्यं यः करोति सः एव वैश्यः इति। श्रीमद्भगवद्गीतानुसारेण वैश्यस्य कर्म एतादृशम्।[४७] कृषिक्षेत्रे अन्नोत्पादनादिकं विधाय अन्येषां कृते व्यापारमाध्यमेन प्रदानम्, गवादिरक्षणञ्च वैश्यवर्णानां स्वाभाविकं कर्म।

शूद्रधर्मः

भगवतः विष्णोः पद्भ्यां समुत्पन्नः वर्णः शूद्रः इति कथ्यते।[४८] अस्य वर्णस्य प्रमुखं कर्तव्यं सेवा एव वर्तते। सेवा एव शूद्रस्य धर्मो वर्तते।[४९] शूद्रस्य विशेषः कर्म सेवा इति मन्यते।[५०] नृत्यम्, गीतम्, सहयोगः, वाद्यवादन-सम्बन्धिगतिविधयः एतादृशानि कार्याणि शूद्रस्य कर्तव्यानि। सेवया एव राजा जनताश्च सुखमानन्दनञ्चानुभवन्ति। यः स्वप्रतिभया जीविकोर्पाजनं करोति, सः एव शूद्रः। यः सेवया राज्ञः स्वामिनः वा वेतनं द्रव्यं वा इच्छति सः सेवकः इति कथ्यते। सेवकस्य धर्मः शूद्रधर्मः। न केवलं हिन्दुसमाजे अपितु मुस्लिम-क्रिश्चयनादिसमुदायेऽपि जात्याधारे विभेदो दृश्यते। पुरा समाजव्यवस्थायाः मूलाधारो वर्णविभागः एव आसीत्।

आश्रमधर्मः

आश्रमव्यवस्था वैदिकधर्मस्य एको महत्त्वपूर्णो विषयो मन्यते। सामान्यतया मनुष्यः शताब्दं जीवति।[५१] शतवर्षात्मकः आयुः चतुर्धा विभाजिते सति पञ्चविंशतिवर्षात्मकः एकः आश्रमो भवति। ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्न्यासाश्रमश्चेति चत्वारः आश्रमाः भवन्ति।[५२] मानवजीवनस्य व्यावहारिक-नैतिकसामाजिकानां कार्याणामाधाररूपेण स्थितायाः आश्रमव्यवस्थायाः वर्णनं विवेचनञ्चावश्यकं दृश्यते।

---

१६. शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥४३।१८ श्रीमद्भगवद्गीता

१७. पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदं च वैश्यस्य वृष्णिमेव च॥ ९०/१ मनुस्मृति।

१८. वैश्यस्यापि हि यो धर्मस्तं ते वक्ष्यामि शाश्वतम्। दानमध्ययनं यज्ञः शौचेन धनसञ्चयः ॥२१।६०॥शान्तिपर्व,महाभारत।

१९. कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।॥४४।१८ श्रीमद्भगवद्गीता

२०. ब्राह्मणोऽस्य.........॥१०।९।१२ ऋग्वेद, पूर्ववत्।

२१. क.प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत्॥२८।६० शान्तिपर्व,महाभारत।

ख.एकमेव तु शूद्रस्य प्रभुः कर्म समादित। एतेषामेव वर्णानां शुश्रुषामनसुयया॥ ९१/१ मनुस्मृति।

२२. परिचर्यात्मकं कर्म शुद्रस्यापि स्वभावजम्।॥४४।१८ श्रीमद्भगवद्गीता

२३. शतायुरुक्तः पुरुषः सर्ववेदेषु वै यदा। नाप्नोत्यथ च तत् सर्वमायुःकेनेह हेतुना॥९।५॥ विदुर नीति॥उद्योग पर्व ३७।

२४. वानप्रस्थ भैक्ष्यचर्यं गार्हस्थ्यं च महाश्रमम्। ब्रह्मचर्याश्रमं प्राहुश्चतुर्थं ब्राह्मणैर्वृतम् ॥२॥६१। शान्तिपर्व, महाभारत।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मचर्याश्रमः

उपनयनसंस्कारानन्तरं द्विजवटुकेन वेदाध्ययनं कुर्वन् ब्रह्म चिन्तनं कर्तव्यम्। एतत् कार्यमेव ब्रह्म चर्याश्रमनाम्ना कथितम्। स्नानम्, सन्ध्योपासनम्, ब्रह्म यज्ञः, तर्पणम्, दण्डधारणम्, अग्निपरिचरणम्, भिक्षाचर्यचरणम्, गुरोः सन्निधौ तिष्ठनमित्यादीनि ब्रह्मचारिणः कर्तव्यानि कथितानि सन्ति।[५३] ब्रह्मचारिणा ब्रह्मचर्यपालनसमये मधुमांसादिसेवनं न कर्तव्यम्। स्त्रियाः सह सम्पर्कः सम्भोगश्च न करणीयः। जन्मतः पञ्चविंशतिवर्षपर्यन्तात्मककालः ब्रह्मचर्याश्रमकालः इति कथ्यते।[५४] ब्रह्मचर्याश्रमः विद्यार्जनस्य विशिष्टः आश्रमः इति मन्यते। ब्रह्मचर्याश्रमस्य महत्त्वमद्यापि सशक्तरूपेण वर्तते।

गृहस्थाश्रमः

मानवजीवनस्य पञ्चविंशतिवर्षतः पञ्चाशद्वर्षपर्यन्तं यः कालः सः गृहस्थाश्रमकालः। विवाहं कृत्वा पत्न्या साकं जीवनयापनमेव गृहस्थाश्रमः इति उच्यते। शतवर्षात्मकजीवनस्य द्वितीयः आश्रमः गृहस्थाश्रमो वर्तते।[५५] गृहस्थेन जनेन सन्तानोत्पादनं कृत्वा तथा पितृणां कृते तर्पणं श्राद्धञ्च विधाय पितृऋणात् मुक्तः भवनीयः। यथाशक्त्या होमयज्ञपूजनादिकं कृत्वा मानवः देवऋणात् मुच्यते। स्वाध्यायनेन मनुष्यः ऋषिऋणात् मुक्तो भवति। अतिथिभक्षुकादीनां सत्कारेण सेवया च मनुष्यर्णत्वात् मुच्यते। ब्रह्मयज्ञः देवयज्ञः भूतयज्ञः पितृयज्ञः मनुष्ययज्ञः एतान् पञ्चमहायज्ञान् वैश्वदेवकर्म इति उच्यते। उक्तानां कर्मणां यथाविधिना सम्पादनमेव गृहस्थाश्रमस्य धर्मः इति।

वानप्रस्थः

जीवनस्य पञ्चाशद्वर्षतः पञ्चसप्ततिवर्षपर्यन्तं यः कालः सः वानप्रस्थाश्रमकालः। सामान्यरूपेण पञ्चाशद्वयसि जाते सति वानप्रस्थाश्रमे गमनीयम्। आत्मज्ञानाय नित्यसाधनादिकर्म गृहाद् बहिरेव अर्थात् वनादिशान्तवातावरणे एव करणमुचितं भवति। तेन शास्त्रे वानप्रस्थाश्रमस्य व्यवस्था विहिता अस्ति। यदा पौत्रो जायते, तदा गृहस्थाश्रमः त्यजनीयः।[५६] शास्त्रोदितनियमानां पालनपूर्वकं भौतिकसुखादिकं विहाय पुत्रस्य पार्श्वे पत्नीमपि त्यक्त्वा वा पत्न्या साकमेव वनवासो गमनीयः।[५७] वेदाध्ययनम्, देवपूजनम्, व्रतोपवासकरणम्, तपः, तीर्थाटनम् इत्यादयः धर्माः वानप्रस्थाश्रमवासिनाम्।

सन्न्यासाश्रमः

गृहपरिवारधनद्रव्यादिकं त्यक्त्वा केवलं मोक्षाभिलाषया परमात्मनोः चिन्तनमेव सन्न्यासिनां धर्मः। पञ्चसप्ततिवर्षपश्चात् सन्न्यासाश्रमधर्मः पालनीयः। सांसारिकवस्तु विहाय मोक्षमार्गे प्रविष्टस्य मनुजस्य आश्रमः एव सन्न्यासाश्रमः। सांसारिकबन्धनात् विमुक्तो भूत्वा निष्कामभावनया परमात्मानः सततं स्मरणं चिन्तनं कुर्वन् जीवनस्योत्तरार्धं यापनार्थं उपयुक्ता अवस्था भवति तेन अस्मिन् एव आश्रमे प्राणायाम–योगाभ्यास–सत्यभाषणैः

---

२५. ब्रह्मचारी व्रती नित्यं नित्यं दीक्षापरो वशी। परिचार्य तथा वेदं कृत्यं कुर्वन् वसेत् सदा॥१९।६१। शान्तिपर्व महाभारत।

२६. चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषो भागं कृतदारो गृहे वसेत्॥ ४।१॥ मनुस्मृति।

२७. क. सर्वेषामपि चैतेषां वेदस्मृतिविधानतः। गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्विभर्ति हि॥ ८९।६॥मनुस्मृति।

ख. आश्रमास्तुलया सर्वान् धृतानाहुर्मनीषिणः। एकतश्च त्रयो राजन् गृहस्थाश्रम एकतः ॥१२।१२॥ शान्तिपर्व, महाभारत।

२८. गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥२।६॥ मनुस्मृति।

२९. संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम्। पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा॥ ३।६॥ मनुस्मृति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शरीर–मनो–बुद्धीनां पवित्रं करणीयम्। भिक्षापात्रम्, वृक्षमूले वासः, तृणवल्कलादिभिर्निर्मितवस्त्रधारणम्, एकाकिना जीवनयापनम्, प्राणीषु समभावनया दर्शनमेव सन्न्यासिनां लक्षणम्।[५८] सन्तानाः स्वजीवनयापनं शक्नुवन्ति इति निश्चिन्तो भूत्वा आत्मज्ञानाय गृहत्यागकरणं समुचितमेवास्ति। वैराग्यभावनया सन्न्यासधर्म-धारणमपि जीवनस्य शोभनः सुन्दरश्च पक्षो वर्तते।

वर्णाश्रमधर्मः

वैदिकसनातनधर्मे विभिन्ना पवित्राः संस्काराः प्रचलिताः सन्ति। ब्राह्मण–क्षत्रिय–वैश्य–शूद्राणां चतुर्णामेव वर्णानामाधारे वर्णगतसंस्कारानुरूपेण क्रियमाणाः धर्माः वर्णाश्रमधर्माः इति।[५९] षोडशेषु संस्कारेषु मध्ये उपनयनसंस्कारे ब्राह्मणेन पालशस्य दण्डं धारणीयम्। तथैव क्षत्रियकुमारेण वटस्य खादिरस्य वा दण्डं धारणीयम्। वैश्येन औदुम्बरस्य दण्डं ग्रहणीयम्। एषः एव वर्णाश्रमधर्मस्य विधिरस्ति।

गुणधर्मः

शास्त्रीयनिमानुसारेण मानवमात्रं राजा भवति। राज्ञः घोषणापश्चात् (राजनियुक्तिपश्चात्) राज्याभिषेकः कर्तव्यः। राज्याभिषेकं विना राज्ञि कान्तिशौर्यादयो गुणाः नोत्पद्यन्ते।[६०] राज्ञा प्रजापालनया आचरितव्यानि धार्मिक-सामाजिक-राजनीतिक-नैतिकादीनि कर्तव्यानि एव गुणधर्मः इति।

निमित्तधर्मः

अज्ञानेन कृतानां पापानां शुद्धिकरणाय क्रियमाणं कर्म एव प्रायश्चित्तकर्म इति कथ्यते।[६१] आसन-शयन-गमन-भोजन-स्पर्शन-पोषणादिकार्याणि सम्पादने विभिन्ना दोषाः लगन्ति। तेषां दोषाणां पापमोचनार्थं क्रियमाणं कर्म एव निमित्तधर्मः अस्ति।

साधारणधर्मः

साधारणधर्मः इति मानवेन पालनीयो धर्मः। श्राद्धयज्ञादिकाय उपयुक्तो ब्राह्मणः, उपनयनसंस्कारानन्तरं ब्रह्मचारिणा पालनीयाः नियमाः, सत्यभाषणम्, प्रियवाक्यप्रदानम् इत्यादयः सनातनधर्माः इति।[६२] धर्मः न केवलं कस्यापि मनुजस्य, समाजस्य, देशस्य एव भवति सः तु सार्वभौमिको भवति। मनुस्मृतौ उल्लिखितानां साधारणधर्माणां संक्षेपेण वर्णनमत्र क्रियते।

धृतिः

सुखं दुःखं च अवश्यमेव भोक्तव्यम्। दुःखसमये सरलरूपेण सामान्यरूपेण तिष्ठनमेव धैर्यः धृतिर्वा। कठिनसमये धैर्येण ज्ञानेन च मनुजस्थितान्तरिकशक्तेरुत्पत्तिर्भवति सा आन्तरिकी शक्तिरेव धृतिः। मनुष्यान् कर्तव्यं प्रति प्रर्वत्तिकरणमेव धृतिः। धैर्यः सन्तोषञ्च धारणीयम्। श्रीमद्भगवद्गीतायाः कर्मयोगः अवलम्बनीयः। यत् कर्म कर्तव्यं धर्मः इति मत्वा क्रियते।

---

३०. कपालं वृक्षमूलानि कुचैलमसहायता। उपेक्षा सर्वभूतानामेतावद् भिक्षुलक्षणम्॥२४५ शान्तिपर्व, महाभारत।

३१. ब्राह्मणो वैल्वुपालाशौ क्षत्रियोवाटखादिरौ। पैलवौदुम्बरौ वैश्यौ दण्डानर्हन्ति धर्मतः॥ ४५/२ मनुस्मृति।

३२. रामचन्द्र गौतम, धर्मशास्त्रीयराज्यतत्त्वविमर्शः, अप्रकाशित, विद्यावारिधि शोधप्रबन्ध, सम्पूर्णानन्द संस्कृत वि.वि. पृ. १८।

३३. रामचन्द्र गौतम,धर्मशास्त्रीयराज्यतत्त्वविमर्शः,पूर्ववत्।

३४. सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः॥ मनुस्मृति १३७१४।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षमा

क्षमाधर्मः अहिंसाधर्मादपि श्रेष्ठः उच्चश्च धर्मः अस्ति। अपराधिनं प्रति अक्रुध्य प्रसन्नतया एव अपराधसहनस्य क्षमताधारणम् एव क्षमा इति। क्षमायाः द्वेषो विनश्यते, द्वेषातिरिक्तान्यत्रापि समीचीनम् उपयुक्तं वा भवति। क्षमायाः असाध्यं किमपि नास्ति अर्थात् क्षमायाः सर्वं सिद्ध्यति।[६३] क्षमायाः भावेन सांसारिकव्यवहारेषु हानिर् न भवति तत्र लाभः एव भवतीति प्राचीनाचार्यसम्मतम्।

दमः

दमः इति अन्तरात्मानं वशीकरणमेवास्ति। सवेषां जनानां मनसि शुभाशुभभावाः भवन्ति तथापि अशुभभावनां त्यक्त्वा शुभभावनां प्रति मनसः योगः करणीयः।[६४] प्राणीनां कृते तपः अवश्यमेव कल्याणदायकं भवति। तपसः मूलं मनः तथा इन्द्रियनिग्रहः एव।[६५] इन्द्रियनिग्रहात् सर्वविधकामनाः पूर्णाः भवितुमर्हन्ति। यस्य कस्यापि वस्तुनः प्राप्त्यर्थं मननिग्रहः एव आवश्यको भवति परन्तु इदं कार्यं कठिनं वर्तते।

अस्तेयम्

अन्यायपूर्वकं कस्यापि किमपि वस्तु नग्रहणमिति अस्तेयम्। अन्येषां केषु अपि वस्तुषु स्वस्याधिकारो नास्ति चेत् तादृशं वस्तु नग्रहणीयम्। वर्तमानसमये स्वकार्यस्य वेतनातिरिक्तं धनमपि आर्जनं क्रियते, तदद्रव्यं सुखेनोपयुज्यते च। तादृशं धनमपि स्तेयिनः (चौरस्य) धनसदृशमेव वर्तते इति शास्त्रीयग्रन्थेषु वर्णितमस्ति।[६६] एवमेव महाभारतग्रन्थे अपि अन्यस्य धनस्य अन्यायपूर्वकं नग्रहणमिति सनातनधर्मः इति कथितमस्ति।[६७]

शौचम्

शौचस्यार्थः पवित्रता इति वर्तते। जलेन शरीरः शुद्ध्यति। सत्यभाषणेन मनः शुद्ध्यति। विद्यया तपसा च अखिलं जगत् शुद्ध्यति। तथैव ज्ञानद्वारा बुद्धिः शुद्ध्यति।[६८] शारीरिकशौचस्य अतीव महत्त्वम् आवश्यकता चास्तीति विषये न कापि शङ्का वर्तते। शारीरिकशौचेषु अन्तःकरणस्य शुद्धिः सर्वोच्चास्तीति धार्मिकग्रन्थेषु वर्णिता वर्तते। यस्य जनस्य अन्तःकरणमशुद्धं स्यात् तस्य सहस्रेण मृत्तिकास्नानेन, शतेन जलस्नानेन च शुद्धिर्न भवति।

इन्द्रियनिग्रहः

इन्द्रियाणां निग्रहः (विषयेषु नियन्त्रणम्) एव इन्द्रियनिग्रहः। यावद् इन्द्रियनिग्रहो न भवति तवाद् अधर्माचरणं भवति। इन्द्रियाणां सदा सत्कार्येषु कर्तव्येषु धर्मेषु शास्त्रोदिताचारणेषु च योजनमेव इन्द्रियनिग्रहस्य तात्पर्यो वर्तते। केवलं सदा भोगविलासेषु एव इन्द्रियाणि न योजनीयानि।[६९] स्तुतिं निन्दा वा श्रुत्वा, शुभं शोभनं वा अशुभम्

---

३५. मृदुना दारुणं हन्ति मृदुना हन्त्यदारुणम्। नासाध्यं मृदुना किंचित्तस्मात्तीव्रतरं मृदु॥ ।२८१२ वनपर्व, महाभारत।

३६. मानसं सर्वभूतेषु वर्त्तते वै शुभाशुभम्। अशुभेभ्यः सदाऽऽक्षिप्य शुभेष्वेवावतारयेत्॥ ३०९॥ शान्तिपर्व, महाभारत।

३७. मनो निश्रेयसं जन्तोस्तस्य मूलं शमो दमः। तेन सर्वानवाप्नोति यान्कामान् मनसेच्छति॥ ५९।२३॥ शान्तिपर्व, महाभारत।

३८. सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्। योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः॥ मनुस्मृति १०६।५।

३९. न हर्त्तव्यं परधनमिति धर्मः सनातनः॥ २५८।१२॥ शान्तिपर्व, महाभारत।

४०. अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति। विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति॥मनुस्मृति ५। १०९।

४१. इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः। अतिप्रसक्तिं चैतेषां मनसा संनिवर्त्तयेत्॥ १६।२॥ मनुस्मृति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अशोभनञ्च वस्तु स्पृष्ट्वा, सुरुपं कुरूपं वा दृष्ट्वा, मिष्टम् अमिष्टं वा भुक्त्वा, सुगन्धं दुर्गन्धं वा घ्रात्वा यः नरः न हृष्यति ग्लायति (दुःखी भवति) वा सः नरः एव जितेन्द्रियो भवति।[७०]

धीः

धीः बुद्धिरिति। यस्य उत्तमा धीर्भवति सः कर्तव्याकर्तव्यं जानाति। स्वस्य अन्येषां च क्रियाकलापाना-मनुभवानां परिणामानां समालोचनां कृत्वा तस्मात् प्राप्तं ज्ञानमादाय यः कार्यं करोति सः एव उत्तमां धियं प्राप्नोति। अत्र धीः इत्यनेन सत्वगुणयुता बुद्धिरेव गृहीतास्ति। सा धीः ब्रह्म विद्यायाः ईश्वज्ञानादपि प्राप्तुं शक्यते।

विद्या

यया जनाः विदन्ति जानन्ति वा सा विद्या। अत्र विद्या इति ईश्वरज्ञानं ब्रह्म विद्या वा अस्ति। न केवलं शास्त्रज्ञानमिति विद्या। ब्रह्मविद्यया तापत्रयं विनश्यति। ब्रह्मविद्यां प्राप्तुं वेदादिशास्त्राणामभ्यासः आवश्यको भवति। तेन अस्मदीयेषु शास्त्रीयग्रन्थेषु विद्यार्जनस्य अतीव महत्त्वं वर्तते। मानवपशोर्भेदश्च विद्यया भवति। यथा विद्याविहीन पशुः इति।

सत्यम्

न हि सत्यात् परो धर्मः इति कथनेन सत्यधर्मः एव सर्वश्रेष्ठो धर्मो वर्तते। सत्यधर्मादेव संसारस्य कल्याणं भवति। सत्यस्याचारणेन समाजस्य राष्ट्रस्य वा अस्माकं कल्याणं भवति। सर्वं सत्ये प्रतिष्ठिमिति कथितमस्ति शास्त्रे। सत्यस्य महत्त्वमित्थं प्रकटितं वर्तते—

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वायवो वान्ति सर्वं सत्ये प्रतिष्ठितम्॥

अक्रोधः

क्रोधस्याभावः एव अक्रोधः। क्रोधः जनस्य शत्रुः वर्तते यः अधर्मस्यापि मूलं कारणञ्चास्ति। श्रीमद्भगवद्गीतायां कामः क्रोधः लोभश्च आत्मानं नरकं नयन्तीति कथितमस्ति। अर्थात् कामक्रोधलोभाः नरकदायकाः भवन्ति।[७१] तेन सदैव मुनष्येण कामक्रोधलोभाः त्यजनीयाः वर्तन्ते। क्रोधेन धर्मो विनश्यते। तेन क्रोधः त्यक्तव्यः। क्रोधः शारीरिकमानिसिकहानिं च करोति। अक्रोधी मानवः संसारं जेतुं शक्नोति। अक्रोधी जनः एव सुखानुभूतिं करोतीति शास्त्रे कथितं प्रतिपादितं वास्ति।

निष्कर्षः

धर्मः व्यापको वर्तते। अस्य अभिप्रायः समाजस्य विकासेन सह स्वयमेव विकाशीलेन कर्तव्येनापि वर्तते। धर्मः यान्त्रिकनियमानां सङ्ग्रहो नास्ति। अयं धर्मः समाजविकासेन सह जनित्वा गतिशीलो भवति। अर्थात् मानवः तम् अनुसरति। इत्थं धर्मस्यार्थः सम्यग्रूपेपण कर्तव्यपालनमिति अस्ति। मनुष्यः अन्तःकरणादेव धर्ममनुभवन्ति। परन्तु, अस्यामवस्थायां अन्तः करणाय शिक्षा आवश्यकी भवति। यज्ञः, दानम्, क्षमा, सत्यम्, स्वाध्यायः, तपः,

---

४२. श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः। न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥ ९८।४॥ मनुस्मृति।

४३. त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥२१।१६॥ श्रीमद्भगवद्गीता।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संयमः, अलोभः इत्येताः धर्मस्य अष्टौ मार्गाः।[७२] धर्मस्य पालना स्वेच्छया करणीया। अन्तःकरणस्य आदेशवशात् सदैव कर्म करणीयम्। परन्तु इदं न सरलम्। अस्यार्थं अनुशासनम्, नैतिकता च आवश्यकी वर्तते। राजनीतिक-सामाजिक-धार्मिककार्याणि पूर्णरूपेण पृथक् पृथक् विभाजितुं न शक्यन्ते तथा मानवीयकार्यात् पृथग्रूपे धर्मस्यापि किमपि अस्तित्त्वं नास्ति। धर्मः मानवाय सर्वेषां कार्याणां कृते यादृशी नैतिकता प्रददाति, यां विना मानवस्य सर्वेषां कार्याणां महत्त्वं विनश्यति। मानवेन सदा सर्वत्र नैतिकता पालनीया। कस्यापि देशविशेषाय, कालविशेषाय, जातिविशेषाय, सम्प्रदायविशेषाय, धर्मविशेषाय च कृते न केवलं, संसारस्य यस्मिन् कस्मिन्नपि देशे स्थितानां जनानां कृते मान्याः एते साधारणधर्माः वर्तन्ते। यदि सर्वे जनाः एतान् धर्मान् पलायन्ति चेत् समाजे परस्परं वैरभावो न भवति, कलहश्चापि न। अस्माभिः स्वकर्तव्यं विस्मृतम्। तेन वयं परस्परं विद्वेषं कुर्मः। सर्वैरेव जनैः पालनीयो यः धर्मः वर्तते, तम् एव धर्मं हन्मः वयम्। इदमेव अनर्थस्य मूलं कारणमस्ति। साधारणधर्मस्य पालनात् समाजस्य देशस्य विश्वस्य कल्याणं भवति। तेन अन्येभ्यः दुखं न दातव्यम्। सर्वेषां जनानां कृते सहयोगः सेवा च करणीया। अतः एव शास्त्रोदितानां विविधानां धर्माणाम् अनुसरणेन मनुष्यः मनुष्यत्वं प्राप्तुमर्हतीति सर्वैरेव जनैः मननीयम्॥ इति दिक्॥

सन्दर्भ ग्रन्थसूची

ऋग्वेद.(यथारूप) अनु.डा.मोहनकृष्ण दुबे, (ई.सं.२००१).चौखम्बा ओरियण्टालिया : वाराणसी।

मनुस्मृति. मनु (वि. सं.२०४९).द्वितीय संस्करण, चौखम्बा संस्कृत संस्थान : वाराणसी।

महाभारत (आदिपर्व).(यथारूप) (सन् १९७१) सातौं संस्करण. गीताप्रेस : गोरखपुर।

महाभारत (वनपर्व). (यथारूप) (सन् १९७१) सातौं संस्करण. गीताप्रेस : गोरखपुर।

महाभारत (शान्तिपर्व).(यथारूप) (सन् १९७१) सातौं संस्करण .गीताप्रेस : गोरखपुर।

याज्ञवल्क्यस्मृति. (मिताक्षरा). याज्ञवल्क्य (तृ.सं.२०३९) चौखम्बा संस्कृत संस्थान : वाराणसी।

विदुरनीति. विदुर, अनु. मदनप्रसाद अर्याल, श्रीमती रमादेवी अर्याल (तृ.सं. २०६०) : काठमाण्डौ।

वैदिक धर्म मूल रूपमा, शिवराज आचार्य कौण्डिन्न्यायन, स्वाद्ध्यायशाला, (तृ.सं. २०८०), काठमाडौं।

हिन्दू संस्कार परिचय र विमर्श, डा. लक्ष्मीकान्त पन्थी, रत्न पुस्तक भण्डार, २०७४, काठमाडौं।

नेपाली बृहत् शब्दकोश, सम्पादक समूह, (सातौं .सं. २०६७), नेपाल प्रज्ञा-प्रतिष्ठान : काठमाडौं।

धर्मशास्त्रीयराज्यतत्त्वविमर्शः अप्रकाशित शोधप्रबन्ध, रामचन्द्र गौतम, सं. वि. वि. : वाराणसी।

श्रीमद्भगवद्गीता (यथारूप). २३ औं संस्करण, (सन् २००५). गीताप्रेस : गोरखपुर।

ढकाल, प्रकाश. महाभारतस्य शान्तिपर्वणि निर्दिष्टस्य राजधर्मस्यानुशीलनम्, अप्रकाशित शोधप्रबन्ध विद्यावारिधि, काठमाडौं, नेसंवि. अनुसन्धान केन्द्र,२०७३।

४४. इज्याध्ययनदानानि तपः सत्यं क्षमा दमः। अलोभ इति मार्गोऽयं धर्मस्याष्ट विद्यः स्मृतः॥७५।२। वनपर्व, महाभारत।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ध्वन्यालोकप्रथमद्वितीयोद्योतगतवैशिष्ट्यानुशीलनम्

उपप्रा. भरतभट्टराईः

रुरुसंस्कृतविद्यापीठम्

लेखसारः

अस्मिन्नालेखे प्रथमन्तावद् ग्रन्थकर्तुरानन्दवर्धनस्य ध्वन्यालोकग्रन्थस्य च सामान्यपरिचयः प्रस्तुतोऽस्ति। ततोऽनन्तरं शीर्षकानुसारं ध्वन्यालोक-प्रथम-द्वितीयोद्योतगत-वैशिष्ट्यानामनुशीलनं कृतमस्ति। प्रथमोद्योतगत-वैशिष्ट्यानुशीलने ध्वन्यालोकमङ्गलाचरणगतत्रिविधव्यङ्ग्यत्वम्, ध्वनिविरोधिमतपरिखण्डनम्, अर्थस्य भेदद्वयकथनमित्यादीनि द्वादश वैशिष्ट्यानि प्रदत्तानि सन्ति। द्वितीयोद्योतगत-वैशिष्ट्यानुशीलनसन्दर्भे तु रसवदलङ्कार-रसध्वन्योः पार्थक्यकथनम्, गुणालङ्कारस्वरूपकथनम्, रसादिध्वनेर्भेदानामानन्त्यकथनम्, ध्वनेरलङ्कारविचार इत्यादीनि अष्टौ वैशिष्ट्यानि सङ्गृहीतानि सन्ति। तथा चान्ते सकलैः काव्यशास्त्रिभिः साहित्यिकैः कविभिश्चास्याध्ययनं सर्वतोभावेन कर्त्तव्यमिति निष्कर्षः प्रस्तुतः।

एवम्प्रकारेणानेन ध्वन्यालोकप्रथमद्वितीयोद्योतपठनपाठने संलग्नानां समेषां महानुपकारो भवेदिति विश्वासो विधीयते।

शब्दकुञ्जी– ध्वनिः, रसध्वनिः, उपमाध्वनिः, गुणः, अलङ्कारः।

१ विषयप्रवेशः

ध्वनिसिद्धान्तप्रर्वतकस्यानन्दवर्धनस्य ध्वन्यालोक इत्याख्यो ग्रन्थः काव्यशास्त्रपरम्परायां मूर्ध्नि स्थितो वर्तते। इममेव ग्रन्थमाधारीकृत्य पश्चवर्तिभिरनेकैराचार्यैः काव्यप्रकाशसाहित्य- दर्पणादयो ग्रन्था विरचिताः। ग्रन्थस्य नाम्नैव स्पष्टीभवति यदस्मिन् कस्मिन् विषये चर्चा वर्तत इति। ग्रन्थनामधेये द्वौ शब्दौ वर्तेते। तत्राद्यः शब्दो ध्वनिः वर्तते। ध्वनिः किमिति यथोपस्थाप्यते – सामान्यतया ध्वनति यः स इति व्युत्पत्तौ व्यञ्जकः शब्दः, ध्वनति ध्वनयति वा इति व्युत्पत्तौ व्यञ्जकोऽर्थः, ध्वन्यते असौ इति ध्वनिरिति व्युत्पत्तौ व्यङ्ग्योऽर्थः, ध्वन्यते अनेनेति व्युत्पत्तौ व्यञ्जनाव्यापारः, ध्वन्यते अस्मिन् इति ध्वनिरिति व्युत्पत्तौ च ध्वनिकाव्यम् इति पञ्चस्वर्थेषु ध्वनिशब्दः प्रयुक्तो दृश्यते (ध्वन्यालोकः १।१३, लोचने)। व्याकरणशास्त्रे हि नादपदेनाभिहिता श्रूयमाणा अन्त्यबुद्धिग्राह्याः स्फोटव्यञ्जका ध्वनिशब्देन व्यपदिश्यन्ते (वाक्यपदीयम्, १।८३)। व्याकरणशास्त्रस्य सिद्धान्तममुमधिकृत्य ध्वनिवादिभिः साहित्यिकैरपि व्यञ्जके शब्देऽर्थे च ध्वनिपदस्य व्यपदेशो व्यधायि। एवञ्च आलोक इत्यनेन द्योतस्य बोधो भवति (अमरकोशः, ३।२३४१)। अतो ध्वन्याालोक इत्यनेन ध्वनिसम्बन्धी द्योतः अर्थात् प्रकाशः, प्रकाशनं, चर्चा वावबुध्यते। अस्यां ध्वनिचर्चायामत्र चत्वार उद्योताः सन्ति। तत्रापि प्रथमद्वितीयोद्योतयोस्तु ध्वनेः पृथग्वैशिष्ट्यद्योतनायैव ग्रन्थकारस्य विशेषाभिरुचिः दृश्यते।

एवम्भूतस्य ध्वन्यालोकस्य कस्मिन्नुद्योते किं वैशिष्ट्यं वर्तत इति सर्वैरपि ज्ञेयं भवति। तदर्थमेवात्र "ध्वन्यालोकप्रथमद्वितीयोद्योतगतवैशिष्ट्यानुशीलनम्" इति शीर्षकमादायायं लघ्वनुसन्धानरूप आलेखो लिख्यते। यतो हि ध्वन्यालोकस्य प्रथमोद्योते किं वैशिष्ट्यम्? द्वितीयोद्योते किं वैशिष्ट्यम्? इति प्रश्नौ समुदितः। तन्निवारणार्थमेवायं यत्नोऽनेनालेखमाध्यमेन क्रियमाणो वर्तते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. अध्ययनविधिः

अध्ययनमिदं मुख्यतया पुस्तकालयीयविधिमनुसृत्य कृतमस्ति। अत्र हि ध्वन्यालोकस्य विविधपक्षेषु समीचीनतया व्याख्यातेभ्यो ग्रन्थेभ्यः प्राप्तानि तथ्यानि सङ्कलय्य प्राप्तसामग्रीणां गहनतया विवेचनञ्च विधाय निष्कर्षः स्थापितो वर्तते। अत्र सामग्रीणां विवेचनक्रमे यथावश्यकमागमादयो विधयश्च प्रयुक्ताः सन्ति।

३. अनुसन्धानस्य क्षेत्रं सीमाङ्कनञ्च

विशेषतोऽस्यानुसन्धानस्य क्षेत्रं केवलं ध्वन्यालोकाख्यो ग्रन्थो वर्तते। ग्रन्थेऽस्मिन्नप्यनुशीलनीया नैके विषयाः सन्ति। तत्रापि प्रथमद्वितीयोद्योतयोः वैशिष्ट्यानुशीलनमेव सीमाङ्कनं विधायाध्ययनमिदं प्रवृत्तमस्ति।

४ सैद्धान्तिकपर्याधारः

अस्यानुसन्धानस्य विषयक्षेत्रं स्वतःसिद्धत्वात् तेषां सत्यापनाय सैद्धान्तिकपर्याधारस्य नास्त्यावश्यकता तथापि अस्मिन्नध्ययने भरतभामहमम्मटादिप्रणीतग्रन्थेभ्यः सामग्रीसङ्कलनं कृतमस्तीति एत एव सैद्धान्तिकाधारत्वेन अङ्गीकृता इति वक्तुं शक्यते। समालोचनक्रमे संकलिततथ्यानां सन्दर्भस्रोतःप्रदर्शनाय गद्यात्मकाधुनिकग्रन्थानां कृते लेखकमितिपृष्ठपद्धतेः (एपीएपद्धतेः), सूत्रसन्दर्भप्रदर्शनाय संस्कृतवाङ्मये बहुप्रचलिताया अध्याय-पाद-सूत्रसंख्यापद्धतेश्च प्रयोगः कृतो वर्तते।

५ प्रथमोद्योतगतवैशिष्ट्यानुशीलनम्

पश्चवर्तिनां मम्मटविश्वनाथजगन्नाथादिकाव्यशास्त्रिणामुपजीव्यभूते ध्वन्यालोके नैकानि वैशिष्ट्यानि सन्ति। मङ्गलाचरणादारभ्य ध्वनेः प्राचीनसम्मतत्त्वकथनपर्यन्तं विविधविषयान्विते प्रथमोद्योते निम्नाङ्कितानि वैशिष्ट्यानि सन्ति-

५.१ ध्वन्यालोकमङ्गलाचरणगतत्रिविधव्यङ्ग्यत्वम्

वस्त्वलङ्काररसरूप-त्रिविध-ध्वनिप्रतिपादनपरे ध्वन्यालोके मङ्गलाचरण एव ध्वनेः त्रैविध्यं स्पष्टतया दृश्यते। तन्मङ्गलाचरणन्तु यथा-

स्वेच्छाकेसरिणः स्वच्छस्वच्छायासितेन्दवः।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥ (ध्वन्यालोकस्य मङ्गलाचरणम्)

अत्र नखानां करणभूतानामपि त्राणकार्यकर्तृत्वेनोपस्थापनात्तेषां परमसामर्थ्यं ध्वनितं भवति तेनैव परमेश्वरस्य कार्यसिद्ध्यर्थं पृथक्साधनापेक्षाभावत्वञ्च सूच्यत इति वस्तुध्वनिः। स्वेच्छाकेसरिणो मधुरिपोः प्रपन्नार्तिच्छिद इति पदैर्हिरण्यकशिपुप्रभृतिदुष्टबधविषयोत्साहस्य व्यञ्जनया वीररसो ध्वन्यते। चन्द्रनखयोर्मध्ये प्रपन्नार्तिच्छेदकत्वेन नखानां वैशिष्ट्यप्रतिपादनाद् व्यतिरेकालङ्कारो व्यङ्ग्यः।

५.२ ध्वनिविरोधिमतपरिखण्डनम्

प्रथमोद्योते ध्वनिविरोधिमतानां परिखण्डनं ग्रन्थकर्त्रा सुष्ठुतया कृतं दृश्यते। तत्रादौ ग्रन्थकृत् कथयति -

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नापूर्वस्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमुचुस्तदीयं तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥ (ध्वन्यालोकः, १।१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्यां कारिकायां ध्वनिविरोधिनां त्रयः पक्षाः समुपस्थापिताः सन्ति– १. अभाववादी, २. भाक्तवादी, ३. अनिर्वचनीयतावादी। एषु त्रिषु पक्षेष्वपि अभाववादिनां त्रयो विकल्पाः सन्ति– तत्र प्रथमविकल्पेऽप्रसिद्धितो ध्वनिरपास्तो भवति, द्वितीयविकल्पे चारुत्वनिरासेन ध्वनिरस्वीक्रियते, तृतीयविकल्पे तु प्रसिद्धप्रस्थान एवान्तर्भवति। भाक्तवादिनो ध्वनिं लाक्षणिकं मन्यन्ते। अनिर्वचनीयतावादिनस्तु ध्वनेस्तत्त्वं गिरामगोचरं सहृदयसंवेद्यमिति कथयन्ति।

तस्माद् वृत्तिकारः कथयति– 'तेनैवं विधासु विमतिषु स्थितासु सहृदयमनःप्रीतये तत्स्वरूपं ब्रूमः। तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणीयसीभिः चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुत्तोलितपूर्वम्, अथ च रामायणमहाभारतप्रभृतीनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते (ध्वन्यालोकः, १।१ वृत्तौ)।

५.३ अर्थस्य भेदद्वयकथनम्

ललितोचितसन्निवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ निरूपितौ स्तः कारिकायां यथा–

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥ (ध्वन्यालोकः, १।२)

५.४ प्रतीयमानार्थस्य काव्यात्मकत्वकथनम्

द्वयोः वाच्यप्रतीयमानार्थरूपयोरर्थयोरपि प्रतीयमानार्थस्य वाच्यादुत्कृष्टता काव्यात्मकता च यथा प्रतिपादितास्ति–

वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।
रसादिपरता यत्र स ध्वनेर्विषयो मतः॥

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥ (ध्वन्यालोकः, १।४,५)

५.५ प्रतीयमानार्थस्यालोकसामान्यत्वकथनम्

प्रतीयमानार्थस्य महत्त्वं गायन्नानन्दवर्धनो निम्नकारिकायामलोकसामान्यत्वञ्च यथा प्रस्तौति–

सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥ (ध्वन्यालोकः, १।६)

५.६ काव्ये प्रतीयमानार्थस्य प्राधान्यप्रतिपादनम्

तस्यैव प्रतीयमानार्थस्य वाच्यार्थात्प्राधान्यमपि निर्दिश्य तद्व्यक्तिसामर्थ्ययोगिनौ शब्दार्थाविव यत्नतः अवगन्तव्याविति यथा निर्दिष्टमस्ति–

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥ (ध्वन्यालोकः, १।८)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५.७ काव्ये वाच्यार्थस्याप्युपादेयताप्रतिपादनम्

यथालोकार्थी सन्नपि जनो दीपशिखायां यत्नवान् भवति तथैव व्यङ्ग्यमर्थं प्रति समुत्सुकः सहृदयो वाच्येऽर्थे यत्नवान् भवतीति ग्रन्थकारो यथा सूचयति—

आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः।
तदुपायतया, तद्वदर्थे वाच्ये तदादृतः॥ (ध्वन्यालोकः, १।९)

५.८ अलङ्कारादौ ध्वनेरन्तर्भावनिरासः

अलङ्कारादौ ध्वनेरन्तर्भावं निरासयन् वृत्तिकारो ध्वनेर्वैशिष्ट्यं यथा प्रतिपादयति –

यदप्युक्तम्— 'कामनीयकमनतिवर्तमानस्य तस्योक्तालंकारादिष्वेवान्तर्भाव इति, तदप्यसमीचीनम्। वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्यव्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः? वाच्य-वाचक-चारुत्वहेतवो हि तस्याङ्गभूताः, स त्वङ्गिरूप एवेतिप्रतिपादयिष्यमाणत्वात् (ध्वन्यालोकः, १।१३ वृत्तौ)।

परिकश्लोकश्चात्र—

व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः।
वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः॥ (ध्वन्यालोकः, १।१३ परिकरश्लोके)

५.९ ध्वनेरलङ्कारादीनामङ्गाङ्गित्वकथनम्

ध्वनितत्त्वप्रतिपादनपरे ध्वन्यालाके ध्वनेरङ्गित्वं तथालङ्कारगुणवृत्तीनामङ्गत्वं सुचारुतया प्रतिपादितमस्ति, 'तस्मान्न ध्वनेरन्यत्रान्तर्भावः। इतश्च नान्तर्भावः, यतः काव्यविशेषोऽङ्गी ध्वनिरिति कथितः। तस्य पुनरङ्गानि अलङ्कारा गुणाः वृत्तयश्चेति प्रतिपादयिष्यन्ते। न चावयव एव पृथग्भूतोऽवयवीति प्रसिद्धः। (ध्वन्यालोकः, १।१३ वृत्तौ)

५.१० ध्वनेर्भेदद्वयकथनम्

वाच्यात् पृथग्भूतस्य ध्वनेर्द्वैविध्यं सोदाहरणं यथा प्रस्तौति वृत्तिकारः—

अस्ति ध्वनिः। स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन। तत्राद्यस्योदाहरणम्—

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ (ध्वन्यालोकः, १।१३ वृत्तौ)

द्वितीयस्यापि—

शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
सुमुखि येन तवाधरपाटलं दशति विम्बफलं शुकशावकः॥ (ध्वन्यालोकः, १।१३ वृत्तौ)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५.११ ध्वनेर्भक्तितः पार्थक्यनिरूपणम्

भज्यते सेव्यते प्राज्ञेन प्रसिद्धतया उद्बोध्यत इति भक्तिर्धर्मोऽभिधेयेन सारूप्यादिः। सा च प्रतिपाद्ये सामीप्यादौ श्रद्धातिशयः। मुख्यार्थस्य भङ्गोऽपि भक्तिरथवा लक्षणा, सैव ध्वनितत्त्वमर्थाद् या भक्तिः स ध्वनिर्यश्च ध्वनिः सैव भक्तिरिति वदतां भाक्तवादिनां मतमपि ग्रन्थकारो यथा दूषयति–

भक्त्या विभर्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया॥ (ध्वन्यालोकः, १।१४)

५.१२ ध्वनेः प्राचीनसम्मतत्त्वकथनम्

ध्वनिर्न नवीनो मार्गः अपितु पूर्वैरप्याचार्यैः स्वस्वग्रन्थेषु बहु प्रयुक्तो दृश्यते। इममेवाशयं निम्नकारिकांशो यथा पुरस्करोति–

लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः॥ (ध्वन्यालोकः, १।१९)

६. द्वितीयोद्योतगतवैशिष्ट्यानुशीलनम्

ध्वनिस्थापने प्रथमोद्योतस्य विशेषप्रयोजनं दृश्यते चेद् द्वितीयोद्योते तु वाच्यात् पृथग्भूतस्य ध्वनेर्द्वैविध्यकथनपूर्वकम् असंलक्ष्यक्रमव्यङ्ग्यध्वनि–रसवदलङ्कार – गुणालङ्कारस्वरूप –शब्दशक्त्युद्भव-अर्थशक्त्युद्भवादिविषये सुसूक्ष्मं समीक्षणं लभ्यते। अतोऽस्मिन्नुद्योतेऽपि निम्नाङ्कितानि वैशिष्ट्यानि सन्ति –

६.१ रसवदलङ्काररसध्वनेः पार्थक्यकथनम्

काव्ये रसस्य प्रधानतायामर्थाद् अन्येषामङ्गानां रसादिपरतायामेव रसध्वनित्वं भवति, यदि अङ्गिनो रसस्यैव प्रधानेऽन्यस्मिन् वाक्यार्थेऽङ्गत्वं भवति चेत्तदा तु रसादयो रसवदलङ्कारा भवन्ति। अयमेवाशयो निम्नकारिकाभ्यां यथाभिव्यज्यते–

वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।
रसादिपरता यत्र स ध्वनेर्विषयो मतः॥

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥ (ध्वन्यालोकः, २।४,५)

६.२ गुणालङ्कारस्वरूपकथनम्

काव्ये गुणानामलङ्काराणाञ्च कीदृशं स्थानं भवतीति विषये ग्रन्थेऽस्मिन् सुस्पष्टीकृतमस्ति। अनेन स्पष्टीकरणेन पूर्ववर्तिनां पश्चवर्तिनाञ्च समेषां काव्यशास्त्रिणां गुणालङ्कारसंवन्धिविविधमतानां खण्डनं मण्डनञ्च भवति। अत्र प्रस्तुतं गुणालङ्कारस्वरूपं यथास्ति–

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलङ्कारा विज्ञेयाः कटकादिवत्॥ (ध्वन्यालोकः,२।६)

६.३ रसादिध्वनेर्भेदानामानन्त्यकथनम्

वाक्यार्थीभूतरसादिध्वनेरवयवभूतानाम् उपमाद्यलङ्काराणाम् आत्मसम्बद्धानां रसभावादीनाम् अन्योन्यसम्बन्धपरिकल्पने एकस्यैव रसादिध्वनेरपि अनन्तता भवतीति यथा प्रतिपादितम् –

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्याङ्गानां प्रभेदा ये प्रभेदाः स्वगताश्च ये।
तेषामानन्त्यमन्योन्यसम्बन्धपरिकल्पने॥ (ध्वन्यालोकः,२।१२)

६.४ ध्वनावलङ्कारविचारः

ध्वनौ कीदृशोऽलङ्कारो ग्राह्यो भवतीति विषये नैकाभिः कारिकाभिः ग्रन्थकारेण सुस्पष्टीकृतमस्ति। तद्यथा प्रदर्श्यते—

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः॥ (ध्वन्यालोकः,२।१६)

अर्थाद् वाक्यार्थीभूतरसादौ स एवालङ्कारो मुख्यो मत उपस्कारकत्वेन यो रससमवधानेन सहैव विना पृथक्प्रयत्नेन निर्वर्त्यो भवति यश्च रसैकतानतया स्थितो भवति। तेन रसनिबन्धनानुकूलतयानुषङ्गिकरूपेण स्वतःस्फूर्त एवालङ्कारो रसध्वनौ तस्याङ्गत्वेन प्राधान्यं भजते।

तथैव अन्याभिः कारिकाभिरपि विषयोऽयं सुस्पष्टीकृतः—

ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः।
रूपकादिरलङ्कारवर्ग एति यथार्थताम्॥

विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता॥

निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्।
रूपकादिरलङ्कारवर्गस्याङ्गत्वसाधनम्॥ (ध्वन्यालोकः, २।१७,१८,१९)

६.५ रूपकादीनां ध्वनित्वम्

वाच्यार्थसौन्दर्यभूतानां रूपकादीनामलङ्काराणामपि व्यङ्ग्यपरत्वेनैव यत्र व्यवस्थानं भवति तत्र व्यङ्ग्यमुखेनैव व्यपदेशो युक्तो भवति। रूपकालङ्कारस्य ध्वनित्वं निम्नश्लोके यथा निरूपितमस्ति—

प्राप्तश्रीरेष कस्मात्पुनरपि मयि तं मन्थखेदं विदध्यान्
निद्रामप्यस्य पूर्वामनलसमनसो नैव सम्भावयामि।

सेतुं बध्नामि भूयः किमिति च सकलद्विपनाथानुयातः
त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः॥ (ध्वन्यालोकः, २।२७ वृत्तौ)

अत्र सन्देहोत्प्रेक्षितत्त्वात्सन्देहोत्प्रेक्षयोः सङ्करात्सङ्रालङ्कारो वाच्यः। तेन च तस्य विष्णुरूपता ध्वन्यत इति शब्दव्यापारं विनैव अर्थसौन्दर्यबलाद्रूपणप्रतिपत्तेः।

६.६ प्रतीयमानार्थस्य स्फुटत्वास्फुटत्वविवेकः

प्रतीयमानार्थः स्फुटास्फुटभेदेन द्विविधः। स्फुटः सहृदयसुखगोचरः अस्फुटश्च सहृदयेनापि कष्टेन लभ्यः। शब्दार्थशक्त्या प्रकाशितः स्फुटः प्रतीयमानार्थ एव ध्वनेर्विषयः, अस्फुटत्वेन वाच्योपस्कारकत्वेन वा भासमानस्तु प्रतीयमानार्थः काव्यात्मभूतस्य ध्वनेर्विषयो नेति कारिकायां यथा प्रस्तुतमस्ति—

यत्र प्रतीयमानोऽर्थः प्रम्लिष्टत्वेन भासते।
वाच्यस्याङ्गतया वापि नास्यासौ गोचरो ध्वनेः॥ (ध्वन्यालोकः, २।३१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६.७ अविवक्षितवाच्यस्य ध्वन्यभावविवेचना

विषयनैपुण्याभावात् कविना यदनुप्रासादिनिबन्धनतात्पर्यप्रवृत्तिरवलम्ब्यते यच्च कवित्वसामर्थ्याभावाद् वृत्तपरिपूरणार्थमेव शब्दः प्रयुज्यते स अविवक्षितवाच्यध्वनेर्विषयो नैव भवतीति यथा निरूप्यते-

अव्युत्पत्तेरशक्तेर्वा निबन्धो यः स्खलद्गतेः।
शब्दस्य स च न ज्ञेयः सूरिभिर्विषयो ध्वनेः॥ (ध्वन्यालोकः, २।३२)

६.८ ध्वनेरक्लिष्यवभासनसमर्थनम्

चारुत्वपर्यवसायितया वाक्यार्थीभूतस्य प्रतीयमानार्थस्य सर्वेष्वेव प्रभेदेषु अक्लिष्टत्वेनावभासनमेव ध्वनेः पूर्णं लक्षणमिति द्वितीयोद्योतस्य चरमायां कारिकायां यथा प्रस्तुतमस्ति-

सर्वेष्वेव प्रभेदेषु स्फुटत्वेनावभासनम्।
यद्व्यङ्गस्याङ्गिभूतस्य तत्पूर्णं ध्वनिलक्षणम्॥ (ध्वन्यालोकः, २।३३)

७. निष्कर्षः

भरतादारभ्य जगन्नाथपर्यन्तं विविधकाव्यशास्त्रमर्मज्ञैः संवर्धितायाः काव्यशास्त्रपरम्पराया मेरुदण्डायमानेन तत्रभवता आनन्दवर्धनेन विरचितेऽस्मिन् ध्वन्यालोके नैकेषां वैशिष्ट्यानां स्थितिर्दृश्यते। एतेषां सम्यक् समीक्षणेन रसध्वन्यालङ्कारगुणादिविषये विवदतां विदुषां मतभिन्नता शान्तिमधिगच्छति। अत्र ध्वनिविरोधिमतानां स्थापनापूर्वकं तन्मतखण्डनमपि सयुक्तिपूर्वकं कृतं दृश्यते। एवञ्चालङ्कार एव सर्वस्वमिति वदतां भामहादीनां मतानामपि यथोचितव्यवस्थापनं विहितमस्ति। पश्चवर्तिभिः मम्मटविश्वनाथादिभिरपि ध्वन्यालोककारसरणिमेव स्वीक्रियमाणत्वाद् अस्याध्ययनं विना न कोऽपि काव्यशास्त्रज्ञः, ध्वनिज्ञः, अलङ्कारज्ञश्च भवतीति सकलसाहित्यिकैरयमेव भूयो भूयः पेय इति निष्कर्षः।

सन्दर्भग्रन्थसूची-

अमरसिंहः(सन्१९७०). अमरकोषः, वाराणसी : चौखम्बा सीरिज आफीस।

आनन्दवर्धनः (सन्१९९१). ध्वन्यालोकः (व्या. लोकमणिदाहालः), वाराणसी : भारतीय विद्या प्रकाशन।

जगन्नाथः(सन्२००३). रसगङ्गाधरः(प्र.आ.),द्वि.सं., वाराणसी : चौखम्बा विद्याभवन।

पाणिनिः(सन्१९५०). अष्टाध्यायी, वाराणसी : चौखम्बा संस्कृत सीरीज आफीस।

भरतः(सन्१९९८). नाट्यशास्त्रम् (सम्पा.रविशंकरनागर), दिल्ली : परिमल पब्लिकेशन।

भर्तृहरिः(वि.सं.२०४५). वाक्यपदीयम् (तृ.सं.), वाराणसी : सं. सं. वि.।

भामहः(सन्२००२). काव्यालङ्कारः, तृ.सं., वाराणसी : चौखम्बा सुरभारती प्रकाशन।

रुय्यकः(वि.सं.२०२८). अलङ्कारसर्वस्वम्, वाराणसी : चौखम्बा संस्कृत सीरीज आफीस।

विश्वनाथः(सन्२००२). साहित्यदर्पणः, दिल्ली : मोतीलाल वनारसीदास।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बौद्धदर्शनाभिमतस्य क्षणभङ्गवादस्य विवेचनम्

उपप्रा.डा. राजनारायणठाकुरः

वाल्मीकिविद्यापीठम्

लेखसारः

बौद्धवाङ्मये वादबाहुल्यं समुपलभ्यते। क्षणभङ्गवादोऽत्र मुख्योऽस्ति। न केवलं बौद्धदर्शनेऽस्य महती प्रतिष्ठापि तु सर्वदर्शनेष्वप्यस्य महनीयं मूल्यं दृश्यते। बौद्धदर्शनस्य प्रमुखराद्धान्तोऽयं बौद्धानां सर्वस्वं किल। अत एव क्षणभङ्गतत्त्वमाश्रित्यैव बौद्धाः सर्वं बौद्धसिद्धान्तसिद्धमाचारविचारादिकं सम्पादयन्ति व्यवस्थापयन्ति च। यत्र नैयायिकवैशेषिकादयो नित्यं व्यापकमात्मतत्त्वमामनन्ति तत्रैव बौद्धाः सर्वमनित्यं क्षणिकञ्च स्वीकुर्वन्ति। बौद्धमते निखिलं चराचरमनित्यं प्रतिक्षणपरिणामशालि चास्ति। यस्मिन् क्षणे यत्किमपि वस्तु समुत्पद्यते तस्मिन्नेव क्षणे तद्वस्तु परिवर्तते। यस्य यस्योदयो दृश्यते तस्य सर्वस्य पतनमपि स्यात्। नैतादृशं किमपि यन्न परिवर्तेत। यद् वस्तु परिवर्तनशीलं तत्तु क्षणिकमेवास्ति। यच्च क्षणिकं तत्तूत्पत्तिक्षणे केवलं दृश्यते। यतो ह्युत्पत्त्यनन्तरं समेषां भावानां विनाशो भवत्येव। यच्च क्षणभङ्गशब्देनोच्यते। एवमेवात्र जीवो जगच्चेत्युभयमेव क्षणिकम्। इदमेव क्षणभङ्गवादस्य जीवानुभूतं तत्त्वम्।

मुख्यशब्दावली– क्षणभङ्गवादः, क्षणिकवादः, सन्तानवादः, क्षणः।

विषयप्रवेशः

वादोत्तमः क्षणभङ्गवादोऽस्ति बौद्धानाम्। वादोऽयं बौद्धवाङ्मये सन्तानवाद-कालवाद-क्षणिकवाद-नाम्नापि च व्यवह्रियते। निखिलेऽपि भूमण्डले महात्मा बुद्धोऽस्ति प्रसिद्ध इत्येतत्तु सर्वविदितमेव। अनेनैव महात्मना बुद्धेन क्षणभङ्गवादः समुपदिष्टः। ततः परं नागार्जुनमैत्रेयनाथवसुबन्धुधर्मकीर्तिशान्तरक्षितादिभिः प्रकाण्डैर्बौद्धाचार्यैः स्वस्वग्रन्थेषु न केवलं वादोऽयं बहुधा प्रतिपादितोऽपि तु सैद्धान्तिकरूपेण सस्वरूपनिरूपणं स्थापितश्च। बौद्धसिद्धान्तप्रकाशकोऽयं क्षणिकवादः सर्वदर्शनप्रसिद्धोऽस्ति। अत एव बौद्धदर्शनस्य यथार्थज्ञानाय वादस्यास्य विशेषपरिशीलनमपरिहार्यमस्ति। अतोऽस्मिँल्लेखे बौद्धदर्शनाभिमतस्य क्षणभङ्गवादस्य विवेचनात्मकमनुशीलनं विहितं वर्तते।

प्रयोजनम्

बौद्धदर्शने प्रतिपादितस्य क्षणभङ्गवादनिष्ठसिद्धान्तस्य रहस्योद्घाटनपूर्वकं तदनुप्राणितदर्शनस्य विशेषज्ञानप्राप्तिश्च लेखस्यास्य प्रयोजनं वर्तते।

समस्या

बौद्धानां प्रमुखसिद्धान्तेष्वन्यतमोऽस्ति क्षणभङ्गवादः। अधुनाप्यस्य बौद्ध-तदितर-दर्शनेष्वध्ययनमध्यापनं चिन्तनं मननं दूषणं भूषणञ्च विहितं विद्वद्भिः। किञ्च बौद्धदर्शन उच्चैस्तरां महत्त्वाधायकस्याप्यस्य वादस्य विकीर्णविषयसन्दर्भमेकीकृत्य सूक्ष्मेक्षिकया समीक्षणेनैकत्रीकरणमप्यद्यावधि न कैश्चिद् विहितमिति तदनुपलब्धिर्ह्यस्य लेखस्य पुरतो विद्यमाना महती समस्या। तस्मादस्याभावस्य परिपूर्तये लेखेऽस्मिन् क्षणभङ्गवादस्य विशेषानुशीलनं विशेषप्रतिपादनञ्च क्रियते। बौद्धदर्शनाभिमतस्य क्षणभङ्गवादस्य विवेचनमिति शीर्षकमधिकृत्य कृतेऽस्मिँल्लेखे समस्याद्वयं विद्यते।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(१) क्षणिकवादिनां नये क्षणभङ्गवादस्य स्वरूपं किम्? सर्वं संस्कृतं क्षणिकं कथम्? क्षणिकत्वाभावे को दोषः समापतति?

(२) क्षणभङ्गसिद्धान्तः किमर्थं स्थापितः? तस्य सिद्धिः कथं भवति? क्षणभङ्गवादस्य ज्ञानेन को लाभः?

उद्देश्यम्

उपरि समस्याकथनप्रसङ्ग उत्थापितयोः समस्ययोः समाधानमेवास्य लेखस्य प्रमुखमुद्देश्यमस्ति। अतश्चात्र तत्समस्याद्वयमधिकृत्योद्देश्यद्वयं निम्नाङ्कितं निर्धारितं विद्यते–

(१) क्षणिकवादसम्मतस्य क्षणस्वरूपस्य निर्धारणम्, तदनुसारेण सर्वं संस्कृतं क्षणिकमिति विवेचनपुरःसरं क्षणिकत्वाभावे भावानां विनाशस्याभाव इति प्रतिपादनम्।

(२) बौद्धदर्शनाभिमतस्य क्षणभङ्गसिद्धान्तस्य प्रयोजनप्रतिपादनेन नित्यतत्त्वस्य खण्डनपूर्वकं क्षणभङ्गवादस्य यथार्थज्ञानादेव निर्वाणं प्राप्यत इति विवेचनम्।

अध्ययनविधिः

अस्य लेखस्योपस्थापने सामग्रीसङ्कलनाय पुस्तकालयविधिः प्राधान्येनानुसृतः। तत्र क्षणभङ्गवादसम्बद्धो ग्रन्थः प्राथमिकस्रोतःसामग्रीरूपेण, चतुःशतकमित्याख्ये ग्रन्थे लिखिता भूमिका द्वितीयस्रोतःसामग्रीरूपेण समाश्रिता। सर्वाश्चैताः सामग्र्यः पुस्तकालयेभ्यः, विद्युत्सञ्जालादपि सङ्गृहीताः सन्ति। तास्ताः सामग्रीः समुपयुज्य विवेचनात्मको विश्लेषणात्मकश्च विधिः समाश्रितोऽस्ति। अत्र पादटिप्पण्यां सन्दर्भसूच्याञ्चैकरूपतायै सर्वत्र सिकागोपद्धतिरेव गृहीता विद्यते। पूर्वोक्तविधिभिरेवात्र क्षणिकवादस्य रहस्यं वैशिष्ट्यञ्च प्रकटितं वर्तते।

क्षणभङ्गवादस्वरूपम्

क्षणतत्त्वविषये बौद्धग्रन्थेष्वनेकाः परिभाषाः समुपलभ्यन्ते। तासु प्रमुखाः परिभाषाः प्रस्तूयन्तेऽत्र। व्याकरणशास्त्रानुसारेण **क्षणु हिंसायाम्, क्षिणु**[1] चेत्युभाभ्यां धातुभ्यामचि कृते निष्पद्यते क्षणशब्दः। हिंसनं नाश इत्यर्थः। फलतश्च वस्तूनां स क्षयः क्षणः, यः स्वतः परतो वा निष्पद्यते। यद्योगेन घटादिवस्तूनामस्तित्त्वं निरवच्छिन्नतयाऽव्यवधानेन स्वतो विनश्यति, स हि क्षण इत्यर्थः। फलतश्च क्षणाख्यः कालः, सर्वभूतानां पाचकः, सर्वजगत उपसंहारकोऽभिधीयते।[२]

अभिधर्मकोशकारेण वसुबन्धुना यथोक्तं वर्तते क्षणतत्त्वस्वरूपम्- परमाण्वक्षरक्षणाः।[३] अर्थात् सर्वसूक्ष्मो ह्यविभाज्यः कालांशः क्षणः प्रोच्यते। कालस्य पर्यन्तः क्षण इत्यर्थः। पुनश्चोक्तं तत्रैव वसुबन्धुना समग्रेषु प्रत्ययेषु यावता धर्मस्यात्मलाभः, गच्छन् वा धर्मो यावता परमाणोः परमाण्वन्तरं गच्छति स एव कालः क्षणः कथ्यते।[४] अर्थाद् गमनशीलः कश्चन पदार्थो यावता कालेनैकस्मात् परमाणुसकाशादन्यं परमाणुं समनुगच्छति, स कालः क्षणः।

---

१ वरदराजभट्टाचार्यः, **लघुसिद्धान्तकौमुदी**, सं. धरानन्दशास्त्री, वाराणसी : मोतीलाल बनारसीदास, २०००ई., पृ. ६५९, ६६०।

२ रामशङ्करत्रिपाठी, **सौत्रान्तिकदर्शनम्**, सं. समदोङ् रिनपोछे, वाराणसी : के. उ. ति. शिक्षा संस्थान, ई. १९९०, पृ.३२८।

३ वसुबन्धुः, **अभिधर्मकोशः**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई. १९९८, पृ.४२३।

४ पूर्ववत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पालिनिबद्धेऽभिधर्मे क्षणः, चित्तक्षणः, रूपक्षण इति क्षणविषयकं विविधं वर्णनमुपलभ्यते।[५] समग्रेषु प्रत्ययेषु किञ्चन चित्तमेकं समुत्पद्यते, अयं चोत्पादक्षणः। यदुत्पादानन्तरं विनाशात् पूर्वं चित्तं स्वभावेन स्थितं भवति, स चायं स्थितिक्षणः। तदनन्तरं तच्चित्तं स्वभावतो विनश्यति, अयञ्च भङ्गक्षणः। प्रत्येकस्य चित्तस्यानेन प्रकारेणावस्थात्रयं भवति। क्षणत्रयस्योत्पादस्थितिभङ्गात्मकस्य सम्मिलितं नाम एकचित्तक्षण इति।[६] एवं विधाः सप्तदश चित्तक्षणा एको रूपक्षण इत्युच्यते।[७]

सर्वास्तिवादिनामाभिधार्मिकाणां मतेन बलवत्पुरुषाच्छटमात्रेण पञ्चषष्टिश्चित्तक्षणा उत्पद्य निरुध्यन्ते।[८] अर्थाद् बलवत्पुरुषाच्छटमात्रकालस्य पञ्चषष्टितमो भागः क्षण इति। एवं विधा विंशत्युत्तरशतक्षणास्तत्क्षण इत्युच्यते। तत्क्षणाः षष्टिर्लवः। त्रिंशल्लवा मुहूर्तः। त्रिंशद् मुहूर्ता अहोरात्रम्। त्रिंशदहोरात्राणि मासः। द्वादश मासाः संवत्सरः। अयं खल्वाभिधार्मिकाणां क्षणविषयकविचारः।[९]

बौद्धेषु तावत् सौत्रान्तिकाचार्यैः स्कन्धायतनधातूनां तत्कारित्रादिलक्षणानां सुसूक्ष्मं तात्विकं विवेचनं कृतम्। बाह्यार्थानां यद्धि मूलभूतं तत्त्वं परमाणुः,यच्च कालादीनामाधारभूतं तत्त्वं क्षणः, एतयोश्च यद् वास्तविकं स्वरूपम्, तत् खलु तैः सूक्ष्मतया परीक्षितम्। तेषां मतानुसारेणैकस्य परमाण्वधिष्ठितदेशस्य यावता कालेन परमाण्वन्तरेणातिक्रमणं भवति, तत् खलु कालपरिमाणं क्षणः। यथोक्तं धर्मकीर्तिना–

एकाण्वत्ययकालश्च कालोऽल्पीयान् क्षणो मतः।
बुद्धिश्च क्षणिका तस्मात् क्रमाद् वर्णान् प्रपद्यते॥[१०]

अर्थात् परमाणुश्च तद् द्रव्यम्, यस्मिन् बुद्ध्याऽपोह्यमाने यन्त्रादिनोपकरणेन वा विभज्यमाने पुनर्विभागो न भवति, यदि पुनर्विभागः स्यात् तदा तदस्तित्त्वमेव विलुप्तं स्यात्। एवंविधस्य परमाणुप्रदेशस्यातिक्रमणमिहाभीष्टम्। अनया रीत्याऽत्यन्तसूक्ष्मो विभक्तुमशक्योऽभेद्यः खलु कालबिन्दुः क्षणः। एवंविधस्य सुसूक्ष्मस्य क्षणस्य सत्त्वम्, तस्यार्थक्रियाकारित्वञ्च सौत्रान्तिकैरङ्गीक्रियते। सूक्ष्मतमं हि कालपरिमाणं क्षण इति सौत्रान्तिकसम्मतं प्रतिभाति। पुनश्च यथोक्तं भाष्यकारेण– यो ह्यात्मलाभोऽनन्तरविनाशी, स क्षणशब्देनाभिधीयते।[११] एवंविधः स्वभावो यस्य स क्षणिकः। क्षणस्वरूपमाविष्कुर्वतोक्तं शान्तरक्षितेन–

उत्पादानन्तरास्थायि स्वरूपं यच्च वस्तुनः।
तदुच्यते क्षणः सोऽस्ति यस्य तत् क्षणिकं मतम्॥[१२]

अर्थादुत्पादानन्तरविनाशस्वभावो वस्तुनः क्षण इत्युच्यते। स यस्यास्त्यसौ क्षणिको निगद्यते। पुनश्च तत्रैवोल्लिखितं वर्तते–

---

५ पूर्ववत्।

६ रामशङ्करत्रिपाठी, **सौत्रान्तिकदर्शनम्**, सं. समदोङ् रिनपोछे, वाराणसी : के.उ.त. शिक्षा संस्थान,१९९०ई.,पृ.३२९,उद्धृतम्।

७ पूर्ववत्।

८ वसुबन्धुः, **अभिधर्मकोशः**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई. १९९८, पृ.४२३।

९ पूर्ववत् पृ. ४२४।

१० धर्मकीर्तिः, **प्रमाणवार्तिकम्**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई. १९६८, श्लो. ४९६।

११ वसुबन्धुः, **अभिधर्मकोशः**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई. १९९८, पृ.४२३।

१२ शान्तरक्षितः, **तत्त्वसङ्ग्रहः**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई. १९८८, श्लो.३८८।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षणावस्थितरूपं हि वस्तु क्षणिकमुच्यते।
स्थिररूपसमाक्रान्तं वस्त्वेवाक्षणिकं पुनः ॥[१३]

अयं भावः- क्षणस्थितिकालाः क्षणिकाः, सर्वान्त्यो हि कालः क्षणः, तं येऽवतिष्ठन्ते ते क्षणिकाः। अस्मिन् सन्दर्भ उल्लिखितं वर्तते-

यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा अमी।[१४]

अर्थाद् यः सत्तावान् पदार्थः स क्षणिको भण्यते, यथा- मेघाः सत्तासम्पन्नभावाः पदार्था वा।

क्षणिकविषये यथोच्यते चन्द्रकीर्तिना- रूपादिनेव स संस्कारानुपादाय प्रज्ञप्तः कालः क्षणादिवाच्यो भवति।[१५] क्षणतत्त्वमधिकृत्य बुद्धेन समुपदिष्टं वर्तते-

अनित्याः सर्वसंस्कारा अध्रुवाः क्षणभङ्गुराः।
अतश्च परमार्थज्ञो वर्जयेत् संवृतेः पदम् ॥[१६]

अथात् सर्वे भावाः पदार्था वा अनित्या अध्रुवा क्षणिका विद्यन्ते। अत एव यः परमार्थवेत्ता सः संवृतेः पदमवश्यमेव वर्जयेत्। सारतः क्षणतत्त्वस्य स्वरूपमिदमेवास्ति।

इतः पूर्वं क्षणभङ्गवादस्य स्वरूपं निरूपितम्। इदानीं सर्वं संस्कृतं क्षणिकमिति व्युत्पाद्यते। समेत्य= सम्भूय हेतुप्रत्ययैः कृतं वस्तुजातं संस्कृतम्।[१७] सर्वं तावद् घटादिवस्तु मुद्गरादिसन्निधौ नाशं गच्छत् दृश्यते। तत्र येन स्वरूपेणान्त्यावस्थायां घटादिकं विनश्यति तच्चेत् स्वरूपमुत्पन्नमात्रस्य विद्यते तदानीमुत्पादानन्तरमेव तेन विनष्टव्यम्। अतः सर्वं संस्कृतं क्षणिकमिति निश्चप्रचम्। यतो हि तेषामवश्यं विनाशो भवति। विनाशो नूनमहेतुकः। अतः स यद्युत्पन्नमात्रस्य भावस्य न स्यात्, तदा कदापि न स्यात्, भावस्य सर्वदा तुल्यत्वात्। अतोऽहेतुको विनाश इति सौत्रान्तिकोऽभ्युपगमः। नास्ति वस्तुषु तथाविधः स्वभावः, येन स उत्पत्त्यनन्तरं स्थातुमवकाशं लभेत। अतः सर्वे संस्कृताः क्षणिकाः, उत्पत्यनन्तरविनाशिरूपत्वात्, चित्तचैत्तवदिति।[१८] एवमेव हेतुप्रत्ययजनिता रूपादयः पञ्चस्कन्धा अपि संस्कृताः सन्ति। अत एव तेऽपि क्षणिकाः, अनित्याः, विनाशशीलाश्च विद्यन्ते। प्रतिक्षणं ह्यन्थाभावात् क्षणिकं वस्तु प्रसिद्ध्यति। क्षणिकस्य वस्तुन उत्पादका हेतवोऽपि क्षणिकाः। न हि तावदक्षणिकात् क्षणिकं भवितुमर्हति, नित्याच्चानित्यम्। अतश्च हेतुफलभावात् परिणामोपलब्धेश्च सर्वं संस्कृतं क्षणिकमिति सिद्धम्।

बौद्धदर्शनाभिमतं जगदिदं क्षणिकं वर्तत इत्येतत्तु सर्वविदितमेव। जगत्यस्मिन् न हि तादृशं वस्तु यत् प्रतिक्षणं न परिवर्तितं स्यात्। परिवर्तनस्य परिणाम एवायं संसारः। अस्मादेव सृष्टिप्रक्रिया निर्बाधं प्रचलति। यदि वस्तूनां क्षणिकत्वं न स्वीक्रियते तदा नात्र किमपि दृष्टिगोचरायते। सृष्टिप्रक्रियैवावरुद्धा भवति। तस्मादत्र यत्किमपि विद्यते तत्सर्वं क्षणिकं परिणामि किल। यत्र सर्वं क्षणिकं तत्र नित्यः पदार्थः कुतः, क्षणिकत्वेनैव भासमानत्वात्, जलधरपटलवत्।

---

१३ पूर्ववत् श्लो.३८७।

१४ माधवाचार्यः, **सर्वदर्शनसङ्ग्रहः**, वाराणसी : चौखम्बा विद्याभवन, २००६ई., पृ. ४८ उद्धृतम्।

१५ नागार्जुनः, **मध्यमकशास्त्रम्** (प्रसन्नपदाव्याख्यासहितम्), सं. परशुरमशर्मा, दरभङ्गा : मिथिलाविद्यापीठम्, ई.१९६०, पृ.१६५।

१६ शर्माः, चन्द्रधरः (सम्पादकः), **सौगतसिद्धान्तसारसङ्ग्रहः**, वाराणसी : चौखम्बा संस्कृत सीरीज, ई.२०१०, पृ.३३।

१७ वसुबन्धुः, **अभिधर्मकोशः**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई. १९९८, पृ.२१।

१८ रामशङ्करत्रिपाठी,**सौत्रान्तिकदर्शनम्**, सं. समदोङ् रिनपोछे, वाराणसी : के.उ.त.शिक्षा संस्थान, १९९० ई., पृ.३३३।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षणिकवादप्रसाधनम्

संक्षिप्तरूपेण क्षणस्वरूपं प्रतिपाद्येदानीं क्षणिकवादप्रसाधनाय प्रयतत एष जनः। घटाद्यर्थानुपादाय तेषां सन्तत्या क्रियानिष्पत्त्या च क्षणादयः प्रज्ञप्यन्ते। तेन खलु क्षणविशिष्टेन कालेन सम्बद्धं वस्तु क्षणिकमित्युच्यते। वस्तूनां खलु स्वभाव उत्पादसमनन्तरापवर्गी भवति। स्वभावत एव वस्तूनां नाशः। स्वहेतुप्रत्ययैस्तथास्वभावा एव पदार्थाः समुत्पद्यन्ते। तं वस्तुस्वभावमधिकृत्य सर्वे भावाः क्षणिकाः क्षणभङ्गुरा इत्यभिधीयन्ते। अयमेव च बौद्धानां प्रसिद्धः क्षणिकवादः।[१९] वस्तूनां कालिकमस्थैर्यमभिसन्धाय क्षणिकता-ऽनित्यता-क्षणभङ्गितादीनां चर्चा बौद्धशास्त्रेषु प्रायेण सर्वत्र प्राचुर्येण क्रियमाणाऽवलोक्यते। मैत्रेयनाथेन महायानसूत्रालङ्कारे,असङ्गेन च तद्भाष्ये बाह्याध्यात्मिकसंस्काराणां सर्वेषां क्षणिकत्वं विस्तरेण निरूपितं वर्तते। तत्र प्रथमं तावन्मैत्रेयनाथेन क्षणिकत्वस्याऽनित्यत्वप्रसाधनायाध उल्लिखितं श्लोकद्वयं कथितं वर्तते। तथा हि-

अयोगाद्धेतुतोत्पत्तेर्विरोधात् स्वयमस्थितेः।
अभावाल्लक्षणैकान्त्यादनुवृत्तेर्निरोधतः॥

परिणामोपलब्धेश्च तद्धेतुत्वफलत्वतः।
उपात्तत्वाधिपत्याच्च शुद्धसत्त्वानुवृत्तितः॥[२०]

अर्थात् सर्वं संस्कृतं क्षणिकं वर्तते, संस्काराणां क्षणिकत्वमन्तरेण प्रवृत्तेरयोगात्। प्रबन्धेन वृत्तिः प्रवृत्तिः। सा चान्तरेण प्रतिक्षणमुत्पादनिरोधौ न युज्यते। यदि कालान्तरं स्थित्वा पूर्वोत्तरनिरोधोत्पादतः प्रबन्धेन वृत्तिरिष्यते तर्हि तदनन्तरं प्रवृत्तिर्न स्यात्, प्रबन्धाभावात्। नैव चोत्पन्नस्य विना प्रबन्धेन कालान्तरे भावो युज्यते। हेतुतो हि सर्वं संस्कृतमुत्पद्यते। तद्यदि भूत्वा पुनरुत्तरकाले भवति, तर्हि तस्यावश्यं हेतुना भवितव्यम्। विना हेतुनाऽऽदित एवाभात्। न च तत्तेनैव हेतुना भवितुमर्हति, तस्योपभुक्तहेतुकत्वात्। न चान्यो हेतुरुपलभ्यते। तस्मात् प्रतिक्षणमवश्यं पूर्वहेतुकमन्यद् भवतीति ज्ञातव्यो भवति। एवं विना प्रबन्धेनोत्पन्नस्य कालान्तरं भावो न युज्यते। न हि विरोधयोस्तुल्यो हेतुरुपलभ्यते। यथा छायातपयोः, शीतोष्णयोश्च। कालान्तरनिरोधस्यैव च विरोधात्। केन विरोधात्? आगमेनेति च। क्षणिकं हि चित्तं प्रसिद्धम्, तस्य चान्ये संस्काराश्चक्षुरूपादयो हेतुतः। तस्मात्तेऽपि क्षणिका इति सिद्धम्। न त्वक्षणिकात् क्षणिकं भवितुमर्हति, यथा नित्यादनित्यमिति। चित्तस्य खल्वपि सर्वे संस्काराः फलम्। तथैव पापकारिषु सत्त्वेषु बाह्या भावा हीना भवन्ति, पुण्यकारिषु च प्रणीताः। अतस्तच्चित्तानुवर्तनाच् चित्तफलत्वं संस्काराणां सिद्धम्। ततश्च तेषां क्षणिकत्वम्। न हि क्षणिकस्याक्षणिकं फलं युज्यते, तदनुविधायित्वात्। अनया रीत्या द्वाभ्यां श्लोकाभ्यां संस्काराणां क्षणिकत्वं साधितं वर्तते महायानसूत्रालङ्कारकारेण। पुनश्चाध्यात्मिकक्षणिकत्वं साधनार्थं यदाह मैत्रेयनाथः-

आद्यस्तरतमेनापि चयेनाश्रयभावतः।
विकारपरिपाकाभ्यां तदा हीनविशिष्टतः॥

भास्वराभास्वरत्वेन देशान्तरगमेन च।
सबीजाबीजभावेन प्रतिबिम्बेन चोदयः॥

चतुर्दशविधोत्पत्तौ हेतुमानविशेषतः।
चयापार्थादयोगाच्च आश्रयत्व असंभवात्॥

स्थितस्यासम्भवादन्ते आद्यनाशाविकारतः।
तथा हीनविशिष्टत्वे भास्वराभास्वरेऽपि च॥[२१]

---

१९ रामशङ्करत्रिपाठी, **सौत्रान्तिकदर्शनम्**, सं. समदोङ् रिनपोछे, वाराणसी : के.उ.ति. शिक्षा संस्थान, १९९० ई., ३२७ पृ.।

२० मैत्रेयनाथः, **महायानसूत्रालङ्कारः**, सं. स्वामी द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, २००६ई., बो.प.अ. का.१-२।

२१ मैत्रेयनाथः, **महायानसूत्रालङ्कारः**, सं. स्वामी द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, २००६ई., बो.प.अ. का. ३-६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एतैः श्लोकैर्विज्ञायते सर्वसंस्कृतं क्षणिकं वर्तते। आध्यात्मिकानां संस्काराणां चतुर्दशविध उत्पादो भवति। आद्य उत्पादो यावत्प्रथमत आत्मभावाभिनिर्वृत्तिर्जायते। तरतमेन यः प्रथमजन्मक्षणादूर्ध्वम्। चयेन य आहारस्वप्नब्रह्मचर्यासमापत्त्युपचयेन। आश्रयभावतो यश्चक्षुर्विज्ञानादीनां चक्षुराभिराश्रयैः। विकारेण यो रागादिभिर्वर्णादिविपरिणामतः। परिपाकेन यो गर्भबालकुमारयुवमध्यमवृद्धावस्थासु। हीनत्वेन विशिष्टत्वने च यो दुर्गतौ चोत्पद्यमानानां यथाक्रमं ज्ञायते। पुनश्च ग्रन्थकारेणेदं प्रोक्तम्—

गत्यभावात्स्थितायोगाच्चरमत्व असंभवात्।
अनुवृत्तेश्च चित्तस्य क्षणिकं सर्वसंस्कृतम्॥[२२]

अर्थाद् देशान्तरगमनेनोत्पत्तौ गत्यभावात्। न हि संस्काराणां देशान्तरसङ्क्रान्तिलक्षणा गतिर्नाम काचित् क्रिया युज्यते। सा ह्युत्पन्ना वा संस्कारं देशान्तरं गमयेद् अनुत्पन्ना वा। यद्युत्पन्ना तर्हि तेन गतिकाले न कश्चिद् गत इति न युज्यते। सा च क्रिया यदि तद्देशस्थ एव संस्कारे कारित्रं करोति तर्हि न युज्यते, स्थितस्यान्यदेशाप्राप्तेः। अथान्यदेशस्थे? न युज्यते, विना क्रिययान्यदेशाप्राप्तेः। न च क्रिया तत्र वा अन्यत्र वा देशे स्थिता संस्कारादन्योपलभ्यते। तस्मान्नास्ति संस्काराणां देशान्तरसन्तत्युत्पादादन्या गतिः। तदभावाच्च सिद्धं क्षणिकत्वम्।

पुनश्च बाह्यक्षणिकत्वसाधनाय यदाह मैत्रेयनाथः-

भूतानां षड्विधार्थस्य क्षणिकत्वं विधीयते।
शोषवृद्धेः प्रकृत्या च चलत्वाद् वृद्धिहानितः॥

तत्सम्भवात् पृथिव्याश्च परिणामचतुष्टयात्।
वर्णगन्धरसस्पर्शतुल्यत्वाच्च तथैव तत्॥

इन्धनाधीनवृत्तित्वात् तारतम्योपलब्धितः।
चित्तानुवृत्तेः पृच्छातः क्षणिकं बाह्यमप्यतः॥[२३]

उपर्युक्तैः श्लोकैर्विज्ञायते यत् सर्वसंस्काराः क्षणिकाः सन्तीत्यत्र नास्ति विवादावसरः। क्षणतत्त्वमधिकृत्य वसुबन्धुना विशेषतस्त्रयः श्लोकाः सम्प्रदर्शिता वर्तन्ते-

जातिरादिः प्रवाहस्य व्ययश्छेदः स्थितिस्तु सः।
स्थित्यन्यथात्वं तस्यैव पूर्वापरविशिष्टता॥

जातिरपूर्वो भावः स्थितः प्रबन्धो व्ययस्तदुच्छेदः।
स्थित्यन्यथात्वमिष्टं प्रबन्धपूर्वापरविशेष इति।

क्षणिकस्य हि धर्मस्य विना स्थित्या व्ययो भवेत्।
स च व्येत्येव तेनास्य वृथा तत्परिकल्पना॥[२४]

क्षणस्तु क्षणमात्रमपि नैव स्थितो भवति, अपि तु स्वकीयैः कारणैः स्वभावेन नश्वर एव समुत्पद्य स्थितिं विनैव विनश्यति। अत एव क्षणस्वभावे कालभेदकल्पनाया अवकाशो नास्ति। शान्तरक्षितेन क्षणभङ्गप्रसाधनायोक्तं वर्तते-

---

२२ पूर्ववत्, बो.प.अ. का. ७।

२३ पूर्ववत्, बो.प.अ. का. ८-१०।

२४ रामशङ्करत्रिपाठी, **सौत्रान्तिकदर्शनम्**, सं.समदोङ् रिनपोछे, वाराणसी : के.उ.ति. शिक्षा संस्थान, ई.१९९०, पृ.३४८ (उद्धृतम्)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृतकाकृतकत्वेन द्वैराश्यं कैश्चिदिष्यते।
क्षणिकाक्षणिकत्वेन भावानामपरैर्मतम्॥

तत्र ये कृतका भावास्ते सर्वे क्षणभङ्गिनः।
विनाशं प्रति सर्वेषामनपेक्षतया स्थितेः॥[२५]

अर्थाद् घटादयो भावा ये विद्यन्ते ते सर्वे क्षणभङ्गिनः सन्ति, यतो हि सर्वेषामपेक्षां विनैव ते विनश्यन्ति। पुनश्च तत्रैव यथोक्तं शान्तरक्षितेन–

सर्वत्रैवानपेक्षाश्च विनाशे जन्मिनोऽखिलाः।
सर्वथा नाशहेतूनां तत्राकिञ्चित्करत्वतः॥[२६]

यो हि भावः क्षणस्थायी विनाश इति गीयते।
तं हेतुमन्तमिच्छामः पराभावात् त्वहेतुकम्॥[२७]

अतो विनाशसद्भावान्न नित्याः सर्वसंस्कृताः।
न विनाशीति बुद्धिश्च निर्निमित्ता प्रसज्यते॥[२८]

वस्त्वनन्तरभावित्वं न तत्र त्वस्ति तादृशि।
चलभावस्वरूपस्य भावेनैव सहोदयात्॥[२९]

उत्पादानन्तरास्थायि स्वरूपं यच्च वस्तुनः।
तदुच्यते क्षणः सोऽस्ति यस्य तत् क्षणिकं मतम्॥[३०]

अर्थादुत्पादानन्तरविनाशस्वभावो वस्तुनः क्षण उच्यते, असौ यस्यास्ति स क्षणिको भण्यते। अनया रीत्या शान्तरक्षितेन सयुक्तिकं क्षणिकवादः प्रसाधितो वर्तते। क्षणिकवादविषये माधवाचार्येण सर्वदर्शनसङ्ग्रहे किञ्चिद् व्याख्यानं विहितं वर्तते। तत्रानेनोक्तं यत् क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यम्। अस्याः क्षणिकभावनायाः साधकमनुमानवाक्यञ्च यथा अस्ति–

यत्सत्तत्क्षणिकं, यथा जलधरपटलम्, सन्तश्चामी भावा इति।[३१]

अस्येदं तात्पर्यम्– यद् यद् वस्तु सदस्ति तत्तत्तु क्षणिकमेव, जलधरपटलवत्।

नैयायिकवैशेषिकादयस्तावच्छरीरेन्द्रियबुद्धिव्यतिरिक्तमात्माख्यं द्रव्यमिच्छाद्वेषप्रयत्नसुख–दुःखादीनां समवायिकारणमविनाशि सर्वगतं कर्तृ भोक्तृ विभु चेति नित्यं तत्त्वं समभ्युपगच्छन्ति। किन्तु यदीच्छाबुद्धिसुखदुःखादीनां कश्चिदाश्रय आवश्यकस्तर्हि नित्यगतिशून्यात्मन आश्रयस्वीकरणं वृथैव प्रतिभाति। अहङ्काराश्रयत्वाच्चित्तमात्मोच्यते। किन्त्वयं व्यावहारिक एव न तु पारमार्थिकः। परमार्थतः कश्चिन्नित्यात्मा नैवोपलभ्यते। स्वसंवेदनमात्मानं प्रत्यक्षं मन्यमानेऽपि तस्य नित्यत्वं विभुत्वञ्च स्वीकर्तुं न युक्तियुक्तम्। एवमेव नित्यत्वाभावे जगत् सर्वं क्षणिकमेव विराजते। अस्यैव क्षणभङ्गतत्त्वस्य यथार्थज्ञानादेव निर्वाणं जायते। अनया

---

२५ शान्तरक्षितः, तत्त्वसङ्ग्रहः, सं. द्वरिकादासशास्त्री, वाराणसी : बौद्धभारती, १९८८, का. ८। ३५२,३५३।

२६ पूर्ववत्, ८।३५७।

२७ पूर्ववत्, ८।३७५।

२८ पूर्ववत्, ८।३७७।

२९ पूर्ववत्, ८।३७६।

३० पूर्ववत्, ८।३८८।

३१ माधवाचार्यः, सर्वदर्शनसङ्ग्रहः, वाराणसी : चौखम्बा विद्याभवन, ई.२००६,पृ. ३३ उद्धृतम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रीत्या नित्यपदार्थस्य खण्डनाय क्षणभङ्गसिद्धान्तः स्थापितो बौद्धैः। यश्च स्थिरवस्तुवादिनां नित्यवस्तुवादिनाञ्च वस्तुगतं स्थिरत्वं नित्यत्वञ्च निराकरोति।

विवेचनम्

आलेखेऽस्मिन् तावद् बौद्धदर्शनाभिमतक्षणभङ्गवादस्य विवेचनमिति शीर्षकमाश्रित्य क्षणिकवादस्य सोपपत्तिकं विवेचनं प्रस्तुतमस्ति। समस्तबौद्धदर्शनस्य राद्धान्तोऽस्ति यन्निखिलं चराचरं नैरात्म्यं दुःखमयमनित्यं क्षणिकं वा वर्तते। अत एव बौद्धदर्शनं तावत् क्षणभङ्गवादिदर्शननाम्ना परिकीर्त्यते। बौद्धनये नित्यपदार्थस्यास्तित्त्वं सर्वथा अवैज्ञानिकमव्यावहारिकमपारमार्थिकं वा विद्यते। अत एव यत्रोपनिषदो नित्यं ध्रुवं विभुरूपमात्मतत्त्वं प्रतिपादयन्ति तत्र बौद्धा अनित्यमशाश्वतमध्रुवमनात्मानं निगदन्ति। एवमेव बौद्धदर्शनाभिमतं क्षणभङ्गुरं सकलं जगत्। संसारेऽस्मिन्नखिलं वस्तु प्रतिक्षणं परिवर्तनशीलमस्ति। परिवर्तनस्य सार एव संसारः। अस्मादेव सृष्टिप्रक्रिया निर्बाधं चलति। यदि प्रतिक्षणं वस्तु न परिवर्तते तदा सृष्टिप्रक्रियैवावरुद्धा भवति। तस्मादत्र यत्किमपि विद्यते तत्सर्वं क्षणिकं परिणामि किल। यत्र सर्वं क्षणिकं तत्र नित्यपदार्थः कुतः, क्षणिकत्वेनैव भासमानत्वात्, जलधरपटलवत्। अनेन विवेचनेनेदं निष्कृष्यते बौद्धाः सर्वं चराचरं क्षणिकमेव प्रतिष्ठापयितुमीहन्ते।

निष्कर्षः

बौद्धमते तु कोऽपि नित्यः, शुद्धः, चेतनशीलः, कूटस्थो नित्यपदार्थः स्वरूपतो न लभ्यते। तन्नये संस्कृतधर्माणां ये हि स्वभावभूता उदयव्ययादयस्तानाश्रित्य सूक्ष्मतमा याऽवस्था, सा क्षण इति निष्कर्षः समुपजायते। सर्वं संस्कृतं क्षणिकम्, यत् सत् तत् क्षणिकमित्यादीनि सुप्रसिद्धवचनान्यस्यैव निदर्शकानि। एतावता विज्ञायते यच्चराचरं जगदिदं क्षणिकं वर्तते। अत एव सिद्धोऽयं क्षणिकवादः। एवमेव बौद्धानां क्षणभङ्गसिद्धान्तो वैज्ञानिको विलक्षणः समीचीन एव प्रतिभाति। अनेन विवेचनेन नूनमेव क्षणभङ्गवादस्य रहस्यं प्रकटितं भवति।

सन्दर्भसूची

१. त्रिपाठी, रामशङ्करः, **सौत्रान्तिकदर्शनम्**, सं. समदोङ् रिनपोछे, वाराणसी : के. उ. शिक्षा संस्थान, ई.१९९०।

२. धर्मकीर्तिः, **प्रमाणवार्तिकम्**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई.१९६८।

३. नागार्जुनः, **मध्यमकशास्त्रम्** (प्रसन्नपदा व्याख्यासहिता), सं. परशुरमशर्मा, दरभङ्गा : मिथिलाविद्यापीठम्, ई.१९६०।

४. भट्टाचार्यः, वरदराजः, **लघुसिद्धान्तकौमुदी**, सं. धरानन्दशास्त्री, वाराणसी : मोतीलाल बनारसीदास, २००० ई.।

५. माधवाचार्यः, **सर्वदर्शनसङ्ग्रहः**, वाराणसी : चौखम्बा विद्याभवन, ई.२००६।

६. मैत्रेयनाथः,**महायानसूत्रालङ्कारः**, सं. स्वामी द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई.२००६।

७. वसुबन्धुः, **अभिधर्मकोशः**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई.१९९८।

८. शर्मा, चन्द्रधरः (सम्पादकः), **सौगतसिद्धान्तसारसङ्ग्रहः**, वाराणसी : चौखम्बा संस्कृत सीरीज, ई. २०१०।

९. शान्तरक्षितः, **तत्त्वसङ्ग्रहः**, सं. द्वारिकादासशास्त्री, वाराणसी : बौद्धभारती, ई. १९८८।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भीष्मप्रकृतिप्रयोगदृष्ट्या ऋतुसंहारखण्डकाव्यस्य वर्षावर्णनम्

मुकुन्द घिमिरे

आंशिकशिक्षकः, साहित्यविभागः, या.ल.ना.विद्यापीठम्

लेखसारः

कालिदासो भारतीयसाहित्यदृष्ट्या पाश्चात्त्यसाहित्यदृष्ट्या च संस्कृतस्य सर्वमान्यः कविर्मन्यते। कालिदासस्य काव्यप्रतिभायां सर्वविधोत्कृष्टताया दर्शनादयं काव्यरचनायां सातिशयं प्रथितो वर्तत इति नास्ति संशीतिगन्धः।

प्रकृतेः मनोरममूर्तिं प्रतिपादयितुं महाकविः सफलोऽस्ति। प्रकृतेः बाह्यजगतः अन्तर्जगतश्च चरमप्रदर्शनमेव एतस्य लक्ष्यमासीत्। केवलं पौरस्त्यसाहित्याकाशे एव न पाश्चात्यसाहित्ये ऽपि खण्डकाव्यस्य सिद्धान्तानाम्, तत्त्वानाम्, परिभाषाणाम्, भाषाणाम्, शैलीनां यानि वैशिष्ट्यानि सन्ति तैर्युक्तेषु खण्डकाव्येषु मनोरमं शिरोरत्नमिव पौरस्त्यसाहित्यस्य एतनृतुसंहारं मनोग्राहि वर्तते। तेन हेतुना प्रकृतिगतपात्राणि यानि सन्ति तानि मानवसहयोगीनि अवचेतनमूलकानि सन्ति। तथा च कालिदास न केवलं सौम्यप्रकृतेरुपासकः भीष्मप्रकृतेरप्युपासको ऽपि। ऋतुसंहारे वर्षावर्णने ख्यापनाय महद्योगदानं प्रापितं वर्तते।

शब्दकुञ्जी : ऋतुसंहारः, वर्षावर्णनम्, भीष्मप्रकृतिः, उपस्थापनम्, मधुकरः, आल्हादः

विषयप्रवेशः

कालिदासनाम्ना विरचितानि नैकानि काव्यानि प्राप्यन्ते तथापि इतिहासप्रसिद्धस्य महाकवेः कालिदासस्य निःसन्दिग्धरूपेण यानि काव्यानि स्वीकृतानि तेषु 'रघुवंशमहाकाव्यम्', 'कुमारसम्भवमहाकाव्यम्'चेति महाकाव्यद्वयम्, 'अभिज्ञानशाकुन्तलम्', 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्' चेति नाटकत्रयम्, 'ऋतुसंहारः', 'मेघदूतम्' चेति खण्डकाव्यद्वयं च विलसन्ति। अत्र खण्डकाव्यकारेण कालिदासेन विरचितस्यर्तुसंहार-खण्डकाव्यस्य वर्षावर्णने भीष्मप्रकृतेः सौन्दर्यमिति विषयो विविच्यते।

रघुवंशादिमहाकाव्यानाम्, अभिज्ञानशाकुन्तलादिनाटकानाञ्च समालोचनाः, तदधिकृत्य निर्मिता ग्रन्थाश्च बहुभिर्विद्वद्भिः कृताः प्राप्यन्ते। तथैव मेघदूतखण्डकाव्ये प्रकृतिविषये ऽपि टीकाटिप्पणी-समालोचना-संक्षिप्तलेख-ग्रन्थादय एव प्राप्यन्ते। ऋतुसंहारखण्डकाव्ये भीष्मप्रकृतिप्रयोगे किमपि विशेषग्रन्थाः न प्राप्यन्ते, किमपि सम्यक् तोषप्रदं कार्यं न प्राप्यते। अत एवास्मिन्नालेखें महाकविकालिदासकृतौ ऋतुसंहारखण्डकाव्ये वर्षावर्णने विहितस्य भीष्मप्रकृतिचित्रणस्य विषये गहनमध्ययनं विहितमस्ति।

लेखसमस्याः

संस्कृतसाहित्याकाशे महाकविः कालिदासः सर्वोपरि विद्यते। कालिदासग्रन्थाः विश्वब्रह्माण्डे सुप्रसिद्धा एव। समालोचकैः टिप्पणीकारैश्च ग्रन्थाधारेणसर्वेषां विषयाणां विवेचना कृता। प्रकृतिप्रयोगदृष्ट्याऽपि अनुसन्धानकारैः शोधप्रबन्धा अपि रचिताः परं प्रकृतेः सिद्धान्ताधारेण भीष्मप्रकृतिदृष्ट्या ऋतुसंहारस्य विवेचनं केनापि न कृतम्।

प्रस्तुतेऽस्मिन् लेखनकार्ये समनुभूयमाने प्रमुखे समस्ये अधोनिर्दिष्टे स्तः–

(१) प्रकृतेः सिद्धान्तं स्वरूपञ्च किम्?

(२) ऋतुसंहारे वर्षावर्णने भीष्मप्रकृतेः सौन्दर्यं किदृशम्?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लेखस्योद्देश्यम्

प्रस्तुतस्य लेखस्योद्देश्ये प्रमुखतया निम्नलिखिते स्तः-

(क) प्रकृतेः स्वरूपप्रकाशनम्।

(ख) भीष्मप्रकृतिप्रयोगदृष्ट्या ऋतुसंहारे वर्षावर्णने सौन्दर्यवर्णनम्।

पूर्वकार्यस्य समीक्षा

संस्कृतसाहित्ये सन्ति विविधान्यलङ्कारशास्त्राणि। तत्र काव्याङ्गतया यत्र तत्र काव्येषु, खण्डकाव्येषु, महाकाव्येषु, नाटकेष्वपि प्रकृतेः सौन्दर्यपक्षस्य, विरहोद्दीपकपक्षस्य, भयात्मकस्वरूपस्य च प्रयोगः कविभिर्विहित उपलभ्यते। तथैव कालिदासेनापि तदीयखण्डकाव्ये ऋतुसंहारे भीष्मप्रकृतिप्रयोगो कृतो दृश्यते। ऋतुसंहार-काव्यगतप्रकृतिचित्रणस्य विषये चर्चा विविधेष्वितिहासविवेचनग्रन्थेषु कतिपयैर्विद्वद्भिर्विहिता दृश्यते। तच्च निम्नानुसारेण निरूप्यते-

(१) ग्रन्थकारश्चन्द्रबली पाँडे (चन्द्रबली पाण्डे, कालिदास, भारत :मोतीलाल बनारसीदास, वि.सं. २०११, पृ. १०६) "कालिदास" इति नामके ग्रन्थे ऋतुसंहारप्रसङ्गे लिखति- "अवश्यमेव ऋतुसंहारः कालिदासस्य रचनाऽस्ति। काव्ये कालिदासस्य प्रकृतिचित्रणगता निपुणता प्रकाशिता दृश्यते।"

(२) भोलाशङ्कर-व्यासः (भोलाशङ्कर-व्यासः, संस्कृत-कवि-दर्शन, द्वि.सं., वाराणसी : चौखम्बा विद्याभवन, वि.सं. २०१७, पृ. ८३।) "संस्कृत-कवि-दर्शन" नामके पुस्तके कालिदासस्य ऋतुसंहारस्य परिचयप्रसङ्गे लिखति- "ऋतुसंहारस्य प्रकृतिः वाल्मीकेरिवालम्बनप्रधाना नास्ति, अपि तु उद्दीपनप्रधाना विद्यते।"

(३) बलदेवोपाध्यायः (बलदेवोपाध्यायः, संस्कृत साहित्य का इतिहास, ष.सं., बनारस : शारदा मन्दिर, सन् १९६०, पृ. १६९-१७०) "संस्कृत साहित्य का इतिहास" इति नामके ग्रन्थे कालिदासस्य परिचयप्रसङ्गे ऋतुसंहारविषये लिखति- "ऋतुसंहारः कालिदासस्य प्रथमा काव्यकृतिरस्ति। विदुषां मते बालकविना कालिदासेन काव्यकलायाः प्रयोग एतस्मादृतुवर्णनात्मकाल्लघुकाव्यात् प्रारब्धोऽस्ति।"

(४) ग्रन्थकारः श्रीरामचन्द्रमिश्रः (रामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, वाराणसी : चौखम्बा विद्याभवन, सन् १९६०, पृ. ८४) "संस्कृतसाहित्येतिहासः" इति नामके ग्रन्थे कालिदासस्य, ऋतुसंहारस्य च परिचयप्रसङ्गे लिखति- "अत्र काव्ये लघुकायात्मकाः षट्सर्गाः सन्ति, यत्र संहत्य १५३ श्लोकाः षड्तुवर्णने निबद्धाः। प्रकृतेः सर्वास्ववस्थासु परिवर्तितानि तानि तानि चित्राण्यत्र प्रस्तुतानि यानि प्रत्यक्षदृष्टानीव हृदयं रञ्जयन्ति। कालिदासीयमेवेदमपि काव्यम्।"

(५) ग्रन्थकारः रमाशङ्कर तिवारीः (रमाशङ्कर तिवारीः, महाकवि कालिदास, वाराणसी : चौखम्बा विद्याभवन, वि.सं. २०१८, पृ. १२५-१२६) "महाकवि कालिदास" इति नामके ग्रन्थे कालिदासस्य ऋतुसंहारस्य वर्णनप्रसङ्गे लिखति- "ऋतुसंहारः महाकविकालिदासस्य प्रथमं काव्यरचनारूपमस्ति। यद्यपि काव्येऽस्मिन् अन्यकाव्यचतुष्टयगतचारुतेव चारुता नोपलभ्यते तथापि खण्डकाव्यमेतत् सहृदयरसिकानां हृदयावर्जनाय सर्वथा समर्थमस्ति। संस्कृतकाव्ये केवलमृतुवर्णनात्मकं काव्यमृतुसंहारमेव।"

(६) रचनाकारेण घटराजभट्टराईमहोदयेन (घटराजभट्टराई, संस्कृतका अमर साहित्यकार, काठमाडौं : साझा प्रकाशन, वि.सं. २०३४, पृ. ४६, ५३) 'संस्कृतका अमर साहित्यकार' इत्यभिधानायां कृतौ ऋतुसंहार-रचयितुर्महाकवेः कालिदासस्य प्रसङ्गे लिखितम्- "काव्यमिदं खण्डकाव्यमस्ति। काव्ये ग्रीष्मर्तोरारभ्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
वसन्तर्तुपर्यन्तानामृतूनां सजीवं मनोहरञ्च वर्णनमस्ति। षट्सु सर्गेषु रचितमिदं काव्यं कालिदासस्य प्रथमा रचना। अत्र प्रकृतिवर्णनस्य हृदयस्पर्शिता प्राप्यते। प्रकृतिचित्रणे कालिदासः कुशलोऽस्ति। कालिदासस्याऽधिकासु कवितासु यथा तथा वा भवतु कलात्मकशैल्या प्रकृतेः चित्रं चित्रितमेव।"

(७) लेखककेन हंसपुरे-सुवेदिना (हंसपुरे-सुवेदीः, संस्कृत वाङ्मयः संक्षिप्त अध्ययन, काठमाडौं : पाठ्यक्रम विकास केन्द्रः, वि.सं. २०३७, पृ. ११९) 'संस्कृत वाङ्मय : संक्षिप्त अध्ययन' इति नामके पुस्तके ऋतुसंहारगतप्रकृति–विषयेलिखितम्- "खण्डकाव्येऽस्मिन् कालिदासेन प्रतिसर्गमृतोः चित्रणं तात्कालिकप्रकृतेः वर्णनञ्चाऽतीव कुशलतया सूक्ष्मतया च कृतम्।"

(८) पुस्तककारः टीकारामोऽधिकारीः (टीकारामोऽधिकारीः, महाकवि कालिदासः, द्वि.सं., ललितपुर : साझा प्रकाशन, वि.सं. २०५०, पृ. ५२, २४४)"महाकवि कालिदास" इति नामके पुस्तके लिखति- "ऋतुसंहारे षट् सर्गाः सन्ति। काव्येऽस्मिन् ग्रीष्मादारभ्य वसन्तर्तुपर्यन्तानां षड्तूनां यथार्थवर्णनं कृतमस्ति। कालिदासः प्रकृतेः स्नेहसिक्तः पुत्र एव। भारतवर्षस्य मनोरमेऽङ्के प्राप्तजीवनेन कविना प्रकृतेः सौन्दर्यस्य माधुर्यवर्णने समग्रमपि जीवनं व्यतीतम्।"

(९) सम्पादको ब्रह्मानन्दत्रिपाठी (ब्रह्मानन्द त्रिपाठीः, कालिदास-ग्रन्थावली, प्र.सं., वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९६, पृ. ६५६) "कालिदास-ग्रन्थावली" इति नामके ग्रन्थे महाकवेः कालिदासस्य संक्षिप्तपरिचयप्रसङ्गे ऋतुसंहारस्य परिचयं प्रस्तुवँल्लिखति- "ऋतुसंहारः कालिदासस्य प्रथमा काव्यकृतिर्मन्यते परमस्य क्रमसम्बन्धे मतैक्यं न प्राप्यते। खण्डकाव्ये ग्रीष्मादारभ्य षड्तुवर्णनं कृतमस्ति। अत ऋतुसंहारः कालिदासस्यैव कृतिरस्ति। समग्रैर्विद्वद्भिर्ग्रीष्मर्तोः सन्ध्याकालवर्णनमभिज्ञानशाकुन्तलेऽपि कृतमस्तीति मन्यते।"

(१०) पुस्तककारः प्रीतिप्रभागोयलः (प्रीतिप्रभा गोयलः, संस्कृत साहित्य का इतिहास, जोधपुर : राजस्थानी ग्रन्थागार, सन् १९९८, पृ. १५६)"संस्कृत साहित्य का इतिहास" इति नामके पुस्तकेसंस्कृतगीतिकाव्यप्रसङ्गे ऋतुसंहारस्य चर्चायां लिखति- "ऋतुसंहारः षट्सर्गात्मकं काव्यम्। अस्य चतुश्चत्वारिंशदधिकशतपद्येषु पूर्णवर्षस्य षड्तोः सुन्दरं शृङ्गारिकवर्णनमस्ति। प्रारम्भे कैश्चन विद्वद्भिः काव्ये काव्यकलायाः परिष्कारगतन्यूनताप्रदर्शनेन काव्यमिदं कालिदासस्य रचनेति न स्वीकृतं परमधुना समालोचकाः काव्यमिदं कालिदासस्य प्रारम्भिकरचनारूपमिति स्वीकुर्वन्ति।"

इत्थं कालिदासस्य ऋतुसंहारस्य प्रकृतिचित्रणस्य चर्चा काव्य–नाटक–सिद्धान्त–ग्रन्थ–समालोचनां कुर्वद्भिर्विवेचनकारैः कृता प्राप्यते तथापि तेषां काव्यशास्त्रिणां मतविवेचनपूर्वकं सैद्धान्तिकस्वरूपनिर्धारणम्, तदुदाहरणानां सङ्गतिप्रदर्शनेन सह सविशदं विवेचनञ्च कैश्चिदपीतःपूर्वं विहितं न लभ्यते। तस्मादस्य लेखनकार्यस्य पूर्वनिरूपितसमस्यायाः समाधानं प्रत्युन्मुखताऽस्य महत्त्वमपि ख्यापयति।

लेखस्य सीमाङ्कनम्

महाकवि–कालिदासविरचितस्य ऋतुसंहार–खण्डकाव्यस्य वर्षावर्णने भीष्मप्रकृतेः गभीरममध्ययनं विधाय तत्कृतिमाध्यमेन कालिदासस्य प्रकृतिचित्रणस्य सौन्दर्यप्रकाशनमत्र क्रियते। अत एव प्रकृतेर्सामान्यपरिचयमुपस्थाप्य भीष्मप्रकृतेपरिचयः, ऋतुसंहार–खण्डकाव्यस्य वर्षावर्णने भीष्मप्रकृतिवर्णनस्य समग्रं विवेचनमध्ययनस्यास्य विषयक्षेत्रं वर्तते। ततो नाधिकमत्राऽन्विष्यते। प्रकृतिवर्णनबहुले ऋतुसंहारखण्डकाव्ये वर्णिताः प्रकृतेतरे विषया अन्येऽपि बहवः सन्ति कथावस्तु–चरित्रादिप्रकाशनपराः परमत्र तेषां विवेचनं नैव विहितमस्ति। इयमस्यलेखनकार्यस्य सीमाऽप्यस्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतेः स्वरूपविवेचनम्

संस्कृत-आङ्ग्ल-नैपालीय-रोम-ग्रीकादिषु पौरस्त्य-पाश्चात्यसाहित्येषु समुपलभ्यते प्रकृतेर्व्यापक-रूपेण कविभिःकृतः प्रयोगः। पौरस्त्य-ग्रन्थानुसारेण, आद्यशक्ति-दैवीशक्ति-भगवतीत्यादिरूपाः प्रकृतिर्वर्तते चित्रिता चेत् पाश्चात्य-ग्रन्थानुसारेण आद्यशक्ति-पर्यावरण-नदी-शैलादयः प्रकृत्यन्तर्गततत्त्वेन प्रतिपाद्यन्ते। एतेषां विषयाणां सङ्क्षिप्ततयाध्ययनमत्र विहितमस्ति।

प्रकृतिशब्दस्य व्युत्पत्तिस्तात्पर्यञ्च

प्रकृतेः शब्दार्थ-विषये अनेकानि मतानि प्राप्यन्ते। तेषां मध्येऽत्र संस्कृत-व्याकरण-पुराणसम्बद्धानि मतानि तथा आङ्ग्ल-नैपालीय-व्याकरणसम्बद्धानि मतानि च प्रस्तूयन्ते।

व्याकरणमतम् - (क) संस्कृतव्याकरणमतम् - 'प्र' - उपसर्ग–पूर्वकात् कृ-धातोः क्तिन्-प्रत्यये कृते सति 'प्रकृतिः' इति रूपं सिद्ध्यति। अस्य शब्दस्य प्रक्रियते कार्यादिकम् अनयेतिविग्रहः। अस्यार्थाः- स्वभावजन्यो विषयः, सृष्टेः कारणम् इत्यादयः सन्ति (प्रभाकरः, सन् १९८३, पृ. ३२४)।

(ख) नैपालीयव्याकरणमतम् - 'प्र + कृति= प्रकृति।' व्याकरणे 'प्र' इत्यस्योपसर्गस्यार्थः प्रकृष्ट इति वर्तते। कृति इत्यस्यार्थः जगत आधारः, ईश्वरी इति वर्तते (पराजुली, २०४०, पृ. ५६३)।

(ग) आङ्ग्लभाषाव्याकरणमतम् - प्रकृतिः= NA + TURE, अस्यार्थाश्चस्वभावजन्या शक्तिः, संसारस्य समग्रं दृश्यमानं वस्तु, वननदीहिमशैलशिलाजलसागरादयः (Mclntosh, सन् २०१०, पृ. १०१६)।

कोशः- एकस्य शब्दस्य बहुविधा अर्था भवन्ति। 'प्रकृतिः' इति शब्दोऽपि तादृशोऽर्थबहुलः शब्दः। संस्कृत-कोशानां मध्ये अमरकोशः सर्वोपरि मन्यते विद्वद्भिः। अमरकोशे कालवर्गे (४) प्रकृतिविषये इत्थं लिखितं दृश्यते-

.... प्रधानं प्रकृतिः स्त्रियाम्।
विशेषः कालिको ऽवस्था गुणाः सत्त्वंरजस्तमः॥२९॥ (शास्त्री, सन् १९५७, पृ. ४७)।

तथैव पातालभोगिवर्गे (८) -

.... संसिद्धिप्रकृती त्विमे॥३७॥
स्वरूपं च स्वभावश्च निसर्गश्चाथ .....॥ (शास्त्री, सन् १९५७, पृ. ८१)।

विश्वेऽस्मिन् प्राचीनानां ग्रन्थानां मध्ये वेदेषु ग्रन्थान्तरेषु च प्रकृतेः स्वरूपपरिभाषादि-विषयाः लभ्यन्ते। प्राचीनानां ग्रन्थानां मध्ये पुराणान्यपि गण्यन्ते। अष्टादशपुराणेष्वपि प्रकृतेर्वर्णन-प्रयोग-व्युत्पत्ति-परिचयादीनां विषयोपस्थापनं प्राप्तुं शक्यते। ब्रह्माण्डे अनेक–ग्रन्थाः प्राप्तुं शक्यन्ते। तेषां मध्ये गीता-धर्मविज्ञान-वाचस्पत्य-सत्यार्थप्रकाश-संस्कृतशब्दार्थप्रकाशादिग्रन्थेषु विविधसन्दर्भेषु प्रकृतेः वर्णनं प्राप्यते।

प्रकृतिवादस्य प्रसङ्गे सर्वप्रथमं जीन-ज्याक्स-रुस्सोमहोदयस्य नाम स्मर्तव्यं भवति। महाभागेनानेन मृत्युपूर्वं प्रकृतिरेव मूलं कारणमिति विचार्य सर्वेषामपि ध्यानं प्रकृतौ एव स्यादिति सन्देशो दत्तः।

फ्रान्सिस-वेकन-महोदयस्यानुसारेण दार्शनिक-लक्ष्यप्राप्तये प्रकृतिराधारभूता, एवं मूलं तत्त्वं च वर्तते इति सिद्ध्यति। (अर्याल, २०५७, पृ. ३३)

प्रकृतेस्तत्त्वानि

प्रकृतेस्तात्त्वानां निरूपणप्रसङ्गे आस्तिकदर्शनानुसारेण पौरस्त्यसिद्धान्तानुसारेण पुराणानुसारेण च सृष्टेः परमं तत्त्वं पुरुषो ब्रह्म वेति। सृष्टिस्तावत् पुरुषस्य प्रकृतेश्च संसर्गेण भवतीति केषाञ्चन विदुषां मतम्। त्रयाणां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
तत्त्वानां साम्यावस्थैव प्रकृतिरिति पूर्वमेवोक्तम्। तानि च त्रीणि तत्त्वानि सत्त्वरजस्तमांसि (अर्याल, २०५७, पृ. ३३)।एवञ्च पाश्चात्यसिद्धान्तावलोकनेन तु दृश्यगतपर्यावरणमेव प्रकृतेर्मूलतत्त्वमिति ज्ञायते। नदीवनपर्वतादीनां सर्वेषामपि वस्तूनां प्रकृतितत्त्व एव लयो भवतीति।

प्रकृतेर्वर्गीकरणम्

प्रकृतेर्वर्गीकरणन्तु बहुभिः सिद्धान्तकारैर्भिन्नभिन्नप्रकारेण कृतं प्राप्यते। तदाधृत्यप्रकृतेर्वर्गीकरणं क्रियते।(१) इन्द्रियसंवेद्यप्रकृतिः– नेत्रकर्णादि-पञ्चेन्द्रियेभ्योऽनुभूयमाना या प्रकृतिः सैवेन्द्रियसंवेद्यप्रकृतिर्भवति। सा च बहुविधा यथा– (क) सौम्यप्रकृतिः, (ख) भीष्मप्रकृतिः, (ग) मानवीकृतप्रकृतिः।

(क) सौम्यप्रकृतिः– प्रकृतेः सौम्य-सुष्ठु-रम्य-शोभनस्वरूपमेव सौम्यप्रकृतिः।

(ख) भीष्मप्रकृतिः– प्रकृतेरुग्र-पीडाजन्य-कठोर-निर्दयस्वरूपमेव भीष्मप्रकृतिः।

(ग) मानवीकृतप्रकृतिः– प्रकृतेर्वर्णनावसरे प्रकृतेः मानववत्त्वं परिकल्प्य मानवस्य च प्रकृतिमत्त्वं परिकल्प्य वर्णनं यत्र क्रियते तत्र मानवीकृतप्रकृतिर्भवति (घिमिरे, २०७४, पृ. २२)।

एवं प्रकारेण अन्यया रीत्या – (१) तन्मयप्रकृतिः – प्रकृतेः तद्वर्णनात्मकस्वरूपमेव तन्मयप्रकृतिः।

(२) मन्मयप्रकृतिः – स्वस्मिन् प्रकृतिं समाहूय वा स्वयमेव प्रकृतिरित्यनुभूय यत्र प्रकृतेर्वर्णनं क्रियते तत्र मन्मयप्रकृतिः (भुसाल, २०७१, पृ. २६)।

पुनरपरयारीत्या-(१) आलम्बनप्रकृतिः– रसोत्पादनाय कुत्रचिदाश्रित्य प्रकृतेर्वर्णनं क्रियते चेत् तादृशी प्रकृतिरालम्बनप्रकृतिः कथ्यते। (२) उद्दीपनप्रकृतिः– घटनया विघटिता एवं रसस्योद्दीपनकर्त्री एवोद्दीपनप्रकृतिरिति (घिमिरे, २०६८, पृ. २२)।

रुस्सो-वर्डस्वर्थ-हेगेलादिमहोदयानामनुसारेण द्वन्द्वात्मकप्रक्रिया तावत् यान्त्रिकी भौतिकी च सती जैविकस्वरूपादिं प्राप्नोति। यथा – (१) यान्त्रिकप्रकृतिः– अत्र जडतत्त्व-गतिगुरुत्वाकर्षणादीनां वर्णनं प्राप्यते।(२) भौतिकप्रकृतिः– अत्र ध्वनि-ताप-रासायनिकप्रतिक्रियादीनां वर्णनं प्राप्यते। (३) जैविकप्रकृतिः– अत्र भूगर्भ-वनस्पति-विभिन्न-जीवानाञ्चाध्ययनं प्राप्यते (घिमिरे, २०७३, पृ. २३)।

निष्कर्षः

का नाम प्रकृतिः? इतिविषये पौरस्त्यसिद्धान्ते पाश्चात्यसिद्धान्ते च विभिन्नानि मतानि प्राप्यन्ते तथापि शब्दव्यवहाराणां भिन्नत्वेऽपि मूलतत्त्वं त्वेकमेवेति नास्ति तत्र विवादः। समष्टिगतरूपेण स्वभावः, आद्या शक्तिः, पञ्चतत्त्वानि सत्त्वरजस्तमांसि एव प्रकृतिः इति कथयितुं शक्यते। साहित्ये प्रयुक्तायां प्रकृतौ पूर्वोक्तानामेतेषामेव विविधानां मौलिकानां परिवर्तितानाञ्च वस्तुतत्त्वानां वर्णनं प्राप्यते।

ऋतुसंहारस्य वर्षावर्णने भीष्मप्रकृतेः सौन्दर्यम्

अथ वर्षावर्णने प्रस्तुता भीष्मप्रकृतिप्रयोगा उल्लिख्यन्ते। यथा–

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा घनान्धकारीकृतशर्वरीष्वपि।
तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः॥ सर्गः– १, श्लो. १०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्लोकोऽयं महाकविना कालिदासेन प्रणीतस्य ऋतुसंहारखण्डकाव्यस्यादिमः श्लोको विद्यते। अनेन श्लोकेन महाकविः वर्षर्तोर्वर्णनमुपस्थापयति। अभीक्ष्णमिति ॥ अभीक्ष्णं मुहुर्मुहुः। उच्चैरुच्चस्वरेण ध्वनता शब्दं कुर्वता पयोमुचा मेघेन घनान्धकारीकृतशर्वरीप्वप्यघनान्धकारा घनान्धकारा यथा संपद्यन्ते तथा कृताश्च ताः शर्वर्यो रात्रयो यथा तथाभूतासु तडित्प्रभया विद्युत्कान्त्या दर्शिता मार्गभूमयो यासां तास्तथोक्ता अभिसारिकाः स्त्रियो रागात्कान्तानुरागेण। संकेतमिति शेषः। प्रयान्ति गच्छन्तीत्यर्थः।

अत्र प्रकृतेः सौम्यावस्याथावर्णनाद् सौम्य-प्रकृति-प्रयोगो वर्तते। तदनन्तरं घनान्धकारीकृत-प्रकृतेः भीष्म-वर्णनं प्राप्यते। अतोऽत्र भीष्मप्रकृतिप्रयोगोऽपि अस्ति। तथा च-

पयोधरैर्भीमगभीरनिःस्वनैस्तडिद्भिरुद्वेजितचेतसो भृशम्।
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम्॥ सर्गः- १, श्लो. ११

पयोधरैरिति ॥ भीमो भयानको गभीरो गम्भीरो निखनो निर्घोषो येषां तैस्तथोक्तैः। पयोधरैर्मेघैस्तडिद्भिर्विद्युद्भिश्च भृशमत्यन्तमुद्वेजितमुद्विग्नं चेतोऽन्तःकरणं यासां तास्तथोक्ता योषितो नार्यः। कृतोऽपराधोऽन्यायः परवनितानिरीक्षणादिर्यैस्तांस्तथोक्तानपि प्रियाशयने निरन्तरं निरवकाशं यथा भवति तथा परिष्वजन्त आलिङ्गन्त इत्यर्थः ॥

अत्र भीमगभीरनिःस्वनैरित्यादिभिः प्रकृतेर्भीष्मताया वर्णनं करोति कालिदासः। अतोऽत्र भीष्मप्रकृतेः प्रयोगो विराजतेतराम्। अन्यच्च-

विलोचनेन्दीवरवारिबिन्दुभिर्निषिक्तबिम्बाधरचारुपल्लवाः।
निरस्तमाल्याभरणानुलेपनाः स्थिताः निराशाः प्रमदाः प्रवासिनाम्॥ सर्गः- १, श्लो. १२

विलोचनेति ॥ विलोचनानि नेत्राणीन्दीवराणीव नीलोत्पलानीवेति विलोचनेन्दीवराणि तेषां ये वारिविन्दवो जलबिन्दवस्तैः कृत्वा निषिक्ताः संसिक्ताः बिम्बाधरा बिम्बसहशाधराश्चारुपल्लवा इवेति ते यासां तास्तथोक्ताः। बिम्बपदेनारक्तत्वं पल्लवपदेन च कोमलत्वं व्यज्यते। निरस्तानि त्यक्तानि माल्यान्याभरणानि भूषणान्यनुलेपनानि चन्दनादीनि याभिस्तास्तथोक्ताः प्रवासिनां प्रोषितानां प्रमदाः स्त्रियो निजरमणसमागमसङ्गजनितसुखे निराशा आशारहिताः स्थिता आसन्नित्यर्थः ॥

अत्र प्रवासिनं स्मृत्वा निराशाः प्रमदा वर्णिताः। अत्र भीष्मप्रकृतेः प्रयोगोऽस्ति। तथैव-

विपाण्डुरं कीटरजस्तृणान्वितं भुजङ्गवद्वक्रगतिप्रसर्पितम्।
ससाध्वसैर्भेककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकम्॥ सर्गः- १, श्लो. १३

विपाण्डुरमिति ॥ विपाण्डुरं पाण्डुरवर्णं कीटांश्च रजांसि च तृणानि च तैरन्वितं युक्तं भुजंगवत्सर्पवद्वक्रगतिस्तिर्यग्गमनं प्रसर्पितमितस्ततः संचरणशीलं ससाध्वसैः सभयैर्भेककुलैर्मण्डूकसमुदायैः। निरीक्षितं विलोकितं नवोदकं नूतनजलं निम्नस्य गम्भीरस्य देशस्याभिमुखम्। प्रयाति गच्छतीत्यर्थः ॥

अत्र वक्रगतिप्रसर्पितं निम्नाभिमुखं नवोदकं वर्णयता कालिदासेन प्रकृतेः भीष्मता प्रदर्शिता। अतोऽत्र भीष्मप्रकृतेः प्रयोगोऽस्ति। यथा वा-

जलभरविनतानामाश्रयोऽस्माकमुच्चैरयमिति जलसेकैस्तोयदास्तोयनम्राः।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः समुपजनिततापं ह्लादयन्तीव विन्ध्यम्॥ सर्गः- १, श्लो. २७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जलधरेति ॥ तोयनम्रा जलभारनतास्तोयदा मेघा जलधरेण विनतानां नम्राणामस्माकमुच्चैरुन्नतोऽयं विन्ध्याचल आश्रय आधारः। भवतीति शेषः। इतीति हेतोरतिशयमत्यन्तं परुषाः कठिनास्ताभिस्तथोक्ताभिर्ग्रीष्मवन्हेः शिखाभिः सम्यगुपजनित उत्पादितस्तापः संतापो यस्य तं तथोक्तं विन्ध्यं विन्ध्याद्रिं जलसेकैर्जलवर्षणैर्ह्लादयन्ति हर्ष प्रापयन्तीवेत्युत्प्रेक्षा। उपकृतो हि विपन्नं परमुपकरोतीति भावः।

अत्र वर्षावर्णने ग्रीष्मवह्नेः, अतिशयपरुषाभिः, शिखाभिरित्यादिना प्रकृतेः भीष्मस्वरूपं समुपन्यस्यता कालिदासेन भीष्मप्रकृतिप्रयोगो विहितः।

प्रकृतिमूलविषये सर्वाणि श्लोकानि प्रकृतिप्रयोगस्य प्रचूरतां दृश्यते। तैः पद्यैः सम्पूर्णा अत्रैषा सूक्ष्मलेखनकार्यायाः समुल्लेखैः कृतं नोचितम्। ततः भीष्मप्रकृतिप्रयोगदृष्ट्याधिकानि महत्त्वपूर्णानि पद्यानि केवलान्युपस्थितानि सन्ति।

निष्कर्षः

काव्यरचनापरम्परायां सुकुमारमार्गचूडामणेः कालिदासस्य विषयप्रस्तुत्या साकं प्रकृतेस्तथाविधः प्रयोगः सर्वथोचितः स्वाभाविकश्च दृश्यते। साररूपेण वक्तुं शक्यते यत् कालिदासः दुःखातिशयवर्णनेऽपि सौम्यप्रकृतिचित्रणे कुशलोऽस्ति चेत् सौम्यविषये च सौम्यप्रयोगस्तेन कृतः। एवमेव कठीनविषयेऽपि सौम्यप्रयोगः कृतःत्र आह्लादविषयेऽपि सौम्यप्रयोगः कृतोऽस्ति। अतश्च मेघदूतखण्डकाव्यस्य पूर्वमेघे विशेषतया सौम्यप्रकृतिप्रयोगप्रचुरं दृश्यते।

वर्षावर्णने प्रकृतेः स्वरूपत्रयमध्ये सौम्य–भीष्म–मानवीकृतप्रयोगाः समानरूपेणोपयुज्यमाना दृश्यन्ते। तत्र मुख्यरूपेण भीष्मप्रकृतिप्रयोगः पञ्चमे श्लोके एव दृश्यते।

भावाधारेणात्र सर्वत्रं मानवीकृतप्रकृतिप्रयोगमस्ति परं वस्तुस्थित्यादिनां वर्णने सौम्यप्रकृतेः वर्णनं सर्वत्रं कृतमस्ति। ततो ऽत्र सौम्यप्रकृतेः सुन्दरवर्णनं प्राप्यते। प्रकृतेः तत्त्वस्य यत्र–तत्र–सर्वत्रप्रयोगेन मेघदूतखण्डकाव्यं प्रकृतिकाव्यमपि कथयितुं शक्यते।

सन्दर्भग्रन्थसूची

अर्यालः, दुर्गाप्रसाद, *निबन्धकार देवकोटाका दार्शनिक चिन्तन,* काठमाडौं : उदय बुक्स प्रा.लि.,वि.सं. २०५७।

गिरिः,गोस्वामी प्रह्लादः (व्याख्याकारः)कालिदासः, *मेघदूतम्,* वाराणसी : भारतीय विद्या प्रकाशन, सन् १९९२।

घिमिरे, मुकुन्दः, *मुनामदनमा देवकोटाको प्रकृति प्रयोग,*शोधपत्र, शास्त्री, बाल्मीकि विद्यापीठ : नेपाल संस्कृत विश्वविद्यालय, वि.सं. २०६८।

घिमिरे, मुकुन्दः, *ऋतुसंहारखण्डकाव्ये प्रकृतिचित्रणस्य विवेचनम्,* शोधपत्र, आचार्यः, बाल्मीकि विद्यापीठ : नेपाल संस्कृत विश्वविद्यालय, वि.सं. २०७३।

घिमिरे, मुकुन्दः, *ऋतुविचार खण्डकाव्यमा प्रकृति प्रयोग,* शोधपत्र, स्नातकोत्तरः, रत्न राज्यलक्ष्मी क्याम्पस : त्रिभुवन विश्वविद्यालय, वि.सं. २०७४।

जैनः, नरेन्द्रप्रकाशः (व्याख्याकारः)कालिदासः, *रघुवंशमहाकाव्यम्,* दिल्ली : मोतीलाल बनारसीदास, सन् १९८७।

झा,तारिणीश (व्याख्याकारः)कालिदासः, *मेघदूतम्,* इलाहाबाद : रामनारायणलाल बेनीमाधव, सन् १९६६।

त्रिपाठीः,रामप्रतापः, *कालिदास के काव्य,* इलाहावाद : किताब महल प्राइवेट लिमिटेड, सन् १९६६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्रिपाठीः, कृष्णमणि (सम्पा.)कालिदासः, *रघुवंशमहाकाव्यम्,* वाराणसी : चौखम्बा सुरभारती प्रकाशन, वि.सं. २०३२।

पराजुली, कृष्णप्रसादः(सम्पा.) *नेपाली बृहत् शब्दकोशः,* प्रकाशकः नेपाल राजकीय प्रज्ञा प्रतिष्ठान, काठमाडौं, वि.सं. २०४०।

पाणिनिः, विश्वनाथशास्त्री प्रभाकरः (विवृतिकारः), *लघुसिद्धान्तकौमुदी,* पञ्चदशं संस्करणम्, मोतीलाल बनारसीदास पब्लिशर्स प्राइवेट लिमिटेड, दिल्ली, भारत, ई. १९८३।

पाण्डेयः,प्रद्युम्न (व्याख्याकारः)कालिदासः, *कुमारसम्भवम्,* च.सं., वाराणसी : चौखम्बा विद्याभवन, सन् १९८१।

भुसालः, माधवप्रसादः, *प्रकृतिप्रयोगदृष्ट्या मेघदूतखण्डकाव्यस्य परिशीलनम्,* आचार्यस्तरयाप्रकाशित-शोधप्रबन्धः, वाल्मीकि विद्यापीठम्, वि.सं. २०७१।

मिश्रः, श्रीरामचन्द्रः (व्याख्याकारः), कालिदासः, *विक्रमोर्वशीयम्,* वाराणसी : चौखम्बा संस्कृत सीरिज आफिस, सन् १९६३।

शर्मा, शेषराज (व्याख्याकारः)कालिदासः, *मेघदूतम्,* तृ.सं., वाराणसी : चौखम्बा विद्याभवन, वि.सं. २०२१।

शर्मा,केदारनाथ (व्याख्याकारः)कालिदासः, *मेघदूतम्,* अ.सं., वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं. २०३४।

शास्त्री, हरगोविन्द (सम्पा.)अमरसिंह, *अमरकोश,* वाराणसी : चौखम्बा संस्कृत सीरिज आफिस, १९५७।

शास्त्री, सूर्यनारायण, *संस्कृतकविजीवितम्,* (प्रथमो भागः), भारतः : उस्मानियाविश्वविद्यालयस्य संस्कृतपरिषदा प्रकाशितम्, सन् १९६०।

Mclntosh, Colin and Turnbull, Joanna (Editors)New OXFORD ADVANCED LEARNER'S Dictionary, 7th Edition, Oxrord University press, न्यूयोर्क (अमेरिका), ई. २०१०, पृ. १०१६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मशास्त्रदृष्ट्या आश्रमधर्मस्वरूपविमर्शः

विष्णुप्रसाद शर्मा

धर्मशास्त्राचार्यः

लेखसारः

धार्मिकसामाजिकदृष्ट्या धर्मस्य धर्मशास्त्रविषयाणाञ्च समीक्षात्मकमध्ययनं तस्य विश्लेषणं, विवेचनमस्य लेखस्य प्रतिपाद्यविषयो वर्तते। धर्मतत्त्वज्ञानायेतरशास्त्रापेक्षया धर्मशास्त्रस्य भूमिका महती वर्तते। धर्मतत्त्वं, धर्मशास्त्रीयमान्यतां ये न स्वीकुर्वन्ति ते धर्मशास्त्रविदो न कदापि भवितुमर्हन्ति। धर्मशास्त्रपारङ्गता अपि ये तन्मान्यतां नाङ्गीकुर्वन्ति ते शास्त्रीयाः न भवन्ति। आधुनिकाः केचन धर्मशास्त्रस्य वचनं न परिपालयन्ति तेषां तु शास्त्रीयदृष्ट्या समाजे ह्युपादेयता न सिद्ध्यति। तेषाञ्च कार्यमपि निरर्थकं भवतीति शास्त्रीयमान्यता वर्तते।

'धर्मशास्त्रं तु वै स्मृतिः' इत्युक्तेः मन्वत्रिविष्णुयाज्ञवल्क्यादीनां स्मृतयः धर्मशास्त्रनाम्ना प्रसिद्धाः सन्ति। तासु मनुस्मृतिः सर्वश्रेष्ठा सर्वज्येष्ठा च मन्यते। मनुस्मृतिग्रन्थानुसारेणात्राश्रमधर्मस्वरूपविमर्शः क्रियते। तदनु याज्ञवल्क्यस्मृतिग्रन्थस्याप्यग्रस्थानं वर्तते। अस्मिन् ग्रन्थे आचारव्यवहारप्रायश्चित्तसम्बद्धाः सर्वे विषयाः सरलया गिरा अतिविस्तरेण निरूपिताः सन्ति। धर्मशास्त्रविषयमवलम्ब्य पिपठिषूणां प्रियपाठकानां , जिज्ञासूनाम्, शास्त्रानुयायिनाञ्च कृते कुल्लुकभट्टविरचितमन्वर्थमुक्तावलीसहितायाः मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, तत्र विज्ञानेश्वरस्य मिताक्षराटीकाः प्रसिद्धाः सन्ति। तेषु ग्रन्थेषु धर्मशास्त्रविषया समाविष्टाः सन्ति।

धरति लोकान्, ध्रियते पुण्यात्मभिरिति विग्रहे धृधातोः औणादिकमन्प्रत्यये धर्मशव्दो निष्पद्यते। न्यायः, स्वभावः, आचारः, क्रतु इत्यादयोऽस्य पर्यायाः कोशादौ दृश्यन्ते। तत्रालौकिकश्रेयः साधनत्वेन च विहितक्रियात्वं वा धर्मत्वमिति स्फुटं प्रतीयते। अतो वर्णधर्मः, आश्रमधर्मो, वर्णाश्रमधर्मो, गुणधर्मो, निमित्तधर्मः, साधारणधर्मश्चेति षड्विधस्मार्तधर्मविषया एव धर्मशब्दाभिधेया अवगम्यन्ते।

एतद्गुणविशिष्टधर्मप्रतिपादकं शास्त्रमेव धर्मशास्त्रं कथ्यते।

आचारव्यवहारप्रायश्चित्तरूपस्तम्भत्रयविवेचनरहितधर्मो दुर्ज्ञेय इति विचार्य सर्वमानवप्राण्युद्दिधीर्षया स्मृतयः काले काले स्मृतिकारैः प्रणीताः सन्ति। तत्र तासु स्मृतिषु मिथिलाभिजनेन महर्षिणा याज्ञवल्क्येन प्रणीताः याज्ञवल्क्यस्मृतिः चिरं प्रख्याता वर्तत एव। ग्रन्थेऽस्मिन् आचारव्यवहारप्रायश्चित्तभेदेन त्रयोऽध्यायाः विद्यन्ते। तत्र आचारः परमो धर्मः इति मनूक्तत्वादुपर्युक्तविषयस्य निर्धारितोद्देश्यपूरणायैवासौ लेखसारः निर्दिष्टोऽस्ति।

शब्दकुञ्जी ब्रह्मचर्यः, गृहस्थः, वानप्रस्थः, संन्यासः, कर्तव्यम्, अकर्तव्यम्

१. विषयपरिचयः

धर्मस्य मूलं वेदो वर्तते। मानवानां कर्तव्याकर्तव्यादिधर्माधर्मनिरूपणार्थं महर्षिभिर्वेदस्य स्मरणानन्तरं धर्मशास्त्रग्रन्थानां रचना विहिता। तत्र ब्राह्मणादीनां चतुर्णां वर्णानां जन्मकालाद् आरभ्य अन्त्यष्टिकालपर्यन्तानां विविधानां धर्माणां विस्तृतं वर्णनमुपलभ्यते। धर्मस्य एवं धर्मशास्त्रस्य विशेषतः शिष्टाचाराचारज्ञानार्जनाय महत्त्वमधिकमस्ति।

अतः सत्यं वद। धर्मं चर। धर्मान्न प्रमदितव्यम् इत्यादिवेदवाक्यानि लभ्यन्ते। सनातनवैदिकधर्मे मानवानां हितार्थमाचारशीलशिष्टाचारादयो विषयाः सर्वजनहिताय सर्वजनसुखाय निरूपिताः सन्ति। पौरस्त्यवाङ्मयस्य सर्वाधिको महत्त्वाधायको विषयो धर्म एव। धर्मस्य मूलं वेद एव। स च वेदः सर्वासां विद्यानां मूलभूतः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
वेदवृक्षमाश्रित्य सर्वाणि शास्त्राणि प्रभवन्ति। तस्यैव वेदस्य षडङ्गानि सन्ति। तानि यथा शिक्षा, कल्पः, व्याकरणं, छन्दः,निरुक्तं, ज्योतिषञ्चेति। एतेषु वेदाङ्गेषु कल्पभागे एव धर्मशास्त्रस्यान्तर्भावः। अतः कल्पभागादेव धर्मशास्त्रस्योद्भवः समभूत्। कल्पभागः वेदपुरुषस्य हस्ततुल्यो भवति। प्राचीनशास्त्रवत् कल्पभागोऽपि सूत्रमय आसीत्। कल्पसूत्रं चतुर्विधं भवति। श्रौतसूत्रं, शुल्वसूत्रं, धर्मसूत्रं, गृह्यसूत्रश्चेति। तत्र श्रौतसूत्रेषु यागानुष्ठानविधयः, शुल्वसूत्रेषु यागवेदि–यागपात्रकुण्डादीना निर्माणविधयः, धर्मसूत्रेषु धर्मशास्त्रीयविषयाणां विचाराः, गृह्यसूत्रेषु च कर्मकाण्डीयविषयाणां संस्कारादीनामनुष्ठानविधयः प्रतिपादिताः सन्ति।

मानवविकासस्य प्रारम्भे मानवा अपि पशुवत् व्यवहारं कुर्वन्ति स्म। मनोबुद्धिविवेकसौन्दर्यज्ञानादीनां प्रादुर्भावेन तेषु प्राणिषु मानवाः पृथक् पृथक् वैशिष्ट्ययुक्ताः सञ्जाताः। अस्य मूलकारणमेव धर्म इति प्रमाणीक्रियते।

२. समस्याकथनम्

धर्मशास्त्रदृष्ट्या आश्रमधर्मस्वरूपविमर्शःइति शीर्षकोपरि लिखितेऽस्मिन् लेखे विविधाः समस्याः सन्ति। तासु काश्चन समस्या निम्नलिखिताः सन्ति।

१. किन्नाम आश्रमः? ब्रह्मचर्याश्रमगृहस्थाश्रमवानप्रस्थाश्रमसंन्यासाश्रमाणां स्वरूपं कीदृशमस्ति? सैद्धान्तिकाधारश्च कीदृशः?

२. धर्मशास्त्रदृष्ट्या ब्रह्मचर्याश्रमगृहस्थाश्रमवानप्रस्थाश्रमसंन्यासाश्रमाणां कर्तव्याकर्तव्यविषयेस्य विधिः नियमाः के सन्ति? इत्यादिजिज्ञासा समस्यारूपेण समुद्भवन्ति। तासु धर्मस्य एवं धर्मशास्त्रस्य मुख्यविमर्शादयो विषयाश्चात्र शोधलेखने उद्देश्यरूपेण निर्धारिताः सन्ति।

३. उद्देश्यकथनम्

आर्यावर्तान्तर्गतानां मानवानां जीवनं वर्णाश्रमव्यवस्थायाः आधारेण सञ्चालितमस्ति। तत्रोक्तेषु वर्णाश्रमेषु मानवजीवनस्य कृते गृहस्थाश्रमव्यवस्थाया महत्त्वमपि सर्वाधिकं वर्तते। परन्तु सर्वे आश्रमाः धर्मशास्त्रदृष्ट्या महत्त्वपूर्णाः सन्ति। तथापि विद्वद्भिस्तद्सम्बद्धविविधविषयाणां सम्यगध्ययनं विहितं दृश्यते। परन्तु समग्रधर्मशास्त्रदृष्ट्या आश्रमधर्मस्वरूपं तथा तस्य कर्तव्याकर्तव्यविषयश्च विशिष्य न केनाऽपि अधीतो दृश्यते, यच्चात्र नितान्तमपेक्षितमासीत्। विशिष्टमध्ययनमद्यापि केनापि पूर्णरूपेण नैव विहितम्। तेन धर्मशास्त्र–व्यवस्थायामस्य विषयस्याध्ययनाभावेन उपरि निर्दिष्टा समस्याः समागताः। अत्र समुपस्थापितसमस्यानां समाधानाय वक्ष्यमाणक्रमेण उद्देश्यानि च निरूपितानि सन्ति।

१. आश्रमपरिचयपूर्वकब्रह्मचर्याश्रमगृहस्थाश्रमवानप्रस्थाश्रमसंन्यासाश्रमाणां पृष्ठभूमिः सैद्धान्तिकाधार–समुपस्थापनम्।।

२. धर्मशास्त्रदृष्ट्या ब्रह्मचर्याश्रमगृहस्थाश्रमवानप्रस्थाश्रमसंन्यासाश्रमस्य कर्तव्याऽकर्तव्य–विषयक–विधिनियमनिरूपणम्।

४. शोधविधिः

शोधसामाग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगः कृतो वर्तते। तेषु प्रामुख्येन पुस्तकालयविधिरेवात्र सामग्रीसङ्कलने प्रयुक्तः। तत्र चास्मिन् लेखे धर्मशास्त्रविषयप्रतिपादकाः संस्कृतमूलाकरग्रन्थाः प्राथमिकसामग्रीत्वेन गृहीताः सन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५. शोधसीमाङ्कनम्

धर्मशास्त्रदृष्ट्या आश्रमस्वरूपविमर्शसन्दर्भे अस्याः व्यवस्थाया उत्पत्तिनिरूपणपूर्वकं ब्रह्मचर्याश्रम-गृहस्थाश्रम-वानप्रस्थाश्रमसंन्यासाश्रमाणां परिभाषा, तेषां कर्तव्याकर्तव्ये, तद्ज्ञानविषये व्यापकं व्याख्यानञ्चा-ऽस्यानुसन्धानकार्यस्य क्षेत्रमस्ति। शास्त्रानुसारेण विदुषां मतमनुसृत्य सङ्क्षेपेण धर्मशास्त्रदृष्ट्या आश्रमधर्मस्य विमर्शः, एवं धर्मशास्त्रदृष्ट्या तस्य कर्तव्याकर्तव्यविषयविवेचनं तद्भ्रान्तिनिरूपणञ्चास्य लेखस्य सीमा वर्तते।

६. सैद्धान्तिकाधारः

आश्रमशब्दार्थः-'आङ्+श्रम+घञ् इति व्युत्पत्त्या शास्त्रोक्तधर्मविशेषः तद्पदजन्यार्थः। आश्राम्यन्ति स्वं स्वं तपश्चरन्त्यत्र।इति आश्रमः। एष आश्रमो ब्रह्मचर्यगृहस्थवानप्रस्थसन्यासाख्येन चतुर्विधः। तत्र प्रथमाश्रमो ब्रह्मचर्याश्रमः, द्वितीयाश्रमो गृहस्थाश्रमः, तृतीयाश्रमो वानप्रस्थाश्रमः, चतुर्थाश्रमश्च सन्न्यासाख्य आश्रम इति।। ऋग्वेदे चतुर्णामाश्रमाणां स्पष्टमुल्लेखो नैव प्राप्यते तथापि ब्रह्मचारी, गृहपतिः यतिर्मुनिर्वा शब्दः प्रयोगविधया प्राप्यते। ऐतरेयब्राह्मणे तैत्तिरीयसंहितायां शतपथब्राह्मणे च स्पष्टरूपेण अयं विषयः प्राप्यते।

तद्यथा-

ब्रह्मचर्याश्रमं समाप्य गृही भवेत्।
गृही भूत्वा वनी भवेद् वनी भूत्वा प्रव्रजेत्॥ पुरुषार्थचिन्तामणिः,पृ.२४।

ब्रह्मचर्याश्रमः- ब्रह्मचर्याश्रमे प्रवेशाय उपनयनसंस्कारस्य विधानमस्ति। तस्य अभिप्रायोऽस्ति विद्यार्जनाय ब्रह्मचारिणा गुरुं निकषा गमनम्। उपनयनसंस्काराय या अवस्था निर्धारिता अस्ति सा एव ब्रह्मचर्याश्रमे प्रवेशस्यावस्था अस्ति। सामान्यरूपेण ब्राह्मणाय अष्टवर्षस्य, क्षत्रियाय एकादशवर्षस्य, वैश्याय द्वादशवर्षस्य अवस्था ब्रह्मचर्याश्रमे प्रवेशाय निर्धारिता सन्ति। यथा मनुः-

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥ मनुस्मृतिः २.३६।।

अस्मिन् विषये याज्ञवल्क्यः अपि उक्तवान्। तद्यथा-

गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्।
राज्ञामेकादशे सैके विशामेके यथाकुलम्॥ याज्ञवल्क्यस्मृतिः १.१४।।

ब्रह्मचर्याश्रमस्य कर्तव्याकर्तव्यविचारः-

ब्रह्मचारिणो वेशभूषायाः दण्डादीनाञ्च पर्याप्तं विवेचनमस्ति। ब्राह्मण-क्षत्रिय - वैश्यवर्णानां ब्रह्मचारिणः क्रमशः कृष्णमृगस्य, रुरुमृगस्य, अजस्य च चर्माणि वस्त्ररूपेण धारयेयुः। एतेषाम् अभावे तैः शाणस्य, क्षौमस्य, ऊर्णामयानि च वस्त्राणि प्रयोक्तव्यानि। यथा च मनुः-

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च॥ मनुस्मृतिः २.४१॥

एतत्विषये गौतमः अपि उक्तवान् - मौञ्जीज्यामौर्वीसौत्रयो मेखलाः क्रमेण। गौतमधर्मसूत्रम् १.१.१५।। वासांसि शाक्षमचीरकुतपाः सर्वेषाम्। गौतमधर्मसूत्रम् १.१.१७ -१८। कार्पासं वाऽविकृतम्। गौतमधर्मसूत्रम् १.१.१८। ब्राह्मणवर्णस्य ब्रह्मचारिणां मेखला त्रिवृत्समा श्लक्ष्णा च कार्या। क्षत्रियस्य मेखला मौर्वी वैश्यस्य शणतान्तवी च भवेताम्। एतेषाम् अभावे क्रमशः कुशाश्मन्तकवल्वजैः मेखलाः कार्याः॥ एवमेव ब्राह्मणबटोः

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्पासं यज्ञोपवीतं क्षत्रियवैश्यवर्णयोश्च यज्ञोपवीतञ्च ऊर्णामयं भवेत्। ब्राह्मणवर्णस्य ब्रह्मचारी बैल्वदण्डं, पालाशदण्डं वा अर्हति। क्षत्रियो ब्रह्मचारी वाटखदिरयोः वैश्यश्च पैल्वौदुम्बरयोश्च दण्डौ अर्हन्ति। ब्राह्मणस्य दण्डः प्रमाणतः केशान्तिकः कार्यः क्षत्रियब्रह्मचारिणः ललाटसम्मितः विशः नासान्तिकश्च स्यात्। सर्वे ब्रह्मचारिणः स्वेच्छया मुण्डिनः जटाधारिणः अर्धजटाधारिणः वा भवितुं शक्नुवन्ति।

ब्रह्मचर्याश्रमः जीवनस्य महत्वपूर्णः समयोऽस्ति। अस्मिन् समये ब्रह्मचारिणः चरित्रनिर्माणम् इन्द्रियनिग्रहश्च अतीव आवश्यको भवति। भगवतः मनोः मतमस्ति यत् गुरोः समीपं निवसन् ब्रह्मचारी स्वानि इन्द्रियानि वशीकुर्यात्। स्वतपसः वृद्ध्यै समस्तान् पालयेत्। वेदाध्ययन-दान-यज्ञ-नियमतपांसि भोगादिविषयसेवासंकल्पशालिनो न कदाचित्फलसिद्धये प्रभवन्ति। स्तुतिवाक्यम्, निन्दावाक्यं च श्रुत्वा, सुखस्पर्शं दुकूलादि, दुःखस्पर्शं मेषकम्बलादि स्पृष्ट्वा, सुरूपं कुरूपं च दृष्ट्वा, स्वादु अस्वादु च भुक्त्वा, सुरभिमसुरभिं च घ्रात्वा यस्य न हर्षविषादौ, स जितेन्द्रियो ज्ञातव्यः। यथा च मनुः-

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा, स विज्ञेयो जितेन्द्रियः॥ मनुस्मृतिः २.९८।

एतत् इन्द्रियनिग्रहविषये गौतमधर्मसूत्रे गौतमः अनेन प्रकारेण कथितवान्। द्यूतं वर्जयेदिति। द्विविधं (द्यूतम्) प्राण्यप्राणिभेदात्। प्राणिद्यूतं मेषयुद्धाद्यप्राणिद्यूतमक्षक्रीडादि हीनसेवां हीनस्य सेवामधोजातिप्रभृतेः। हीना चासौ सेवा च शौचादिजलाहरणम्। अदत्तादानं केनाप्यदत्तस्योत्सृष्टस्याप्यस्वामिकस्याऽऽदानम्। हिंसा प्राणिपीडा। यथा **द्यूतं हीनसेवामदत्तादानं हिंसाम्॥** गौतमधर्मसूत्रम् १.२.२३॥

मध्वादीनि वर्जयेत्। मधु माक्षिकम्। मांस मृगादेः॥ गन्धश्चन्दनादिः॥ माल्यानि पुष्पाणि॥ दिवास्वप्नो दिवानिद्रा॥ अञ्जनमक्ष्णोः॥ अभ्यञ्जनं तैलाभ्यङ्गः॥ यानं शकटादि॥ उपानच्छत्रे प्रसिद्धे॥ कामः स्त्रीसङ्गः।। क्रोधः कोपः॥ लोभो द्रव्याभिलाषः॥ मोहो विवेकशून्यता॥ वादो बहुजल्पः॥ वादनं वीणादीनाम्॥ स्नानं सुखार्थमुष्णतोयादिना कण्ठादधः प्रक्षालनम्। दन्तधावनं दन्तमलापकर्षणम्॥ हर्षोऽभिमतलाभाच्चित्तोद्रेकः।। नृत्यगीते प्रसिद्धे॥ परिवादः परदोषकथनम्॥ भयं भयहेतुः कान्तारप्रवेशादिः॥ इदं हर्षेऽपि द्रष्टव्यम्॥ यथा-

वर्जयेन् मधु-मांस-गन्ध-माल्य-दिवास्वप्नाञ्जनाभ्यञ्जन-यानोपानच्छत्र-काम-क्रोध-लोभ-मोह-वाद्यवादन-स्नान-दन्तधावन-हर्ष-नृत्य-गीत-परिवादभयानि॥ गौतमधर्मसूत्रम् १.२.१९ ॥

स्त्रीणां प्रेक्षणमवयवशो निरूपणं न यादृच्छिकं दर्शनम्॥ आलम्भनं स्पर्शनं ते अपि वर्जयेत्॥ मैथुनशंङ्कायामिति वचनाद्बालवृद्धातुरासु स्वयं च तथाविधस्य न दोषः॥ **स्त्रीप्रेक्षणालम्भने मैथुनशंङ्कायाम्॥ गौतमधर्मसूत्रम् १.२.२२॥** आचार्यस्य तत्पुत्रस्य तत्स्त्रिया दीक्षितस्य नामानि वर्जयेत्। परोक्षेऽप्यौपाधिकनामग्रहणं कर्तव्यमिति। **आचार्यतत्पुत्रस्त्रीदीक्षितनामानि॥ गौतमधर्मसूत्रम् १.२.२४॥**

मधुमांसाद्येतत्पर्यन्तं वर्जयेदिति क्रियान्वयोऽस्यापि ब्राह्मणः ब्राह्मण इति वचनात् क्षत्रियवैश्ययोर्गृहस्थयोः पैष्टीव्यतिरिक्तमद्यापयोगेन प्रत्यवायः॥ **शुक्लवाचो मद्यं नित्यं ब्राह्मणः॥ गौतमधर्मसूत्रम् १.२.२५॥** वाक्यसंयमो बहुप्रलापविरहः॥ बाहुसंयमो लोष्टमर्दनाद्यभावः॥ उदरसंयमो मितभोजनम्॥ **वाग्बाहूदरसंयतः॥॥ गौतमधर्मसूत्रम् १.२.२७॥** इन्द्रियाणामधीनो भूत्वा विषयेषु आसक्तो जनः वेदाध्ययनं, यज्ञानुष्ठानं नियमानां पालनं कर्तुं समर्थो न भवति॥ इन्द्रियनिग्रहविषये मानवोऽपि उक्तवान्॥ यथा क्षौद्रं मांसं च न खादेत्॥ गन्धं च कर्पूरचन्दनकस्तूरिकादि वर्जयेत्॥ एषां च गन्धानां यथासम्भवं भक्षणमनुलेपनं च निषिद्धम्॥ माल्यं च न धारयेत्॥ उद्रिक्तरसांश्च गुडादीन्न खादेत्॥ स्त्रियश्च नोपेयात्॥ यानि स्वभावतो मधुरादिरसानि कालवशेनोदकवासादिना चाम्लयन्ति तानि शुक्तानि च खादेत्॥ प्राणिनां हिंसां न कुर्यात्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्जयेन्मधु मांसं च गन्धं माल्यं रसान्स्त्रियः।
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम्॥। मनुस्मृतिः २.१७७॥

तथा च याज्ञवल्क्यः-

मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्।
भास्करालोकनाश्लीलपरिवादादि वर्जयेत्॥ याज्ञवल्क्यस्मृतिः १.३३॥

मधु क्षौद्रं, मद्यम्, तस्य नित्यं मद्यं ब्राह्मणो वर्जयेत् इति निषेधात्॥ मांसं छागादेरपि॥ अञ्जनं घृतादिना गात्रस्य, कज्जलादिना चाक्ष्णोः॥ उच्छिष्टमगुरोः॥ शुक्तं निष्ठुरवाक्यं, नान्नरसः तस्य भक्ष्यप्रकरणे निषेधात्॥ स्त्रियमुपभोगे॥ प्राणिहिंसनं जीववधः॥ भास्करस्योदयास्तमयावलोकनम्॥ अश्लीलमसत्यभाषणम्॥ परिवादः सदसद्रूपस्य परदोषस्य ख्यापनम्॥ आदि शब्दात् स्मृत्यन्तरोक्तं गन्धमाल्यादि गृह्यते॥ एतानि ब्रह्मचारी वर्जयेत्॥

गृहस्थाश्रमः- 'गृह+स्था+सुपि स्थः इति गृहस्थशब्दस्य निष्पत्तिर्भवति॥ ब्रह्मचर्यव्रतस्य समापनानन्तरं समावर्तनसंस्कारानन्तरं स्नातको विधिना विवाहादिकसंस्कारं सम्पादयित्वा गृहस्थाश्रमं प्रविशति॥

वेदानधीत्य, वेदौ वा वेदं वाऽपि यथाक्रमम्।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्॥ मनुस्मृतिः,३.२॥

वेदशब्दोऽयं भिन्नवेदशाखापरः॥ स्वशाखाध्ययनपूर्वकवेदशाखात्रयं द्वयमेकां वा शाखां मन्त्र-ब्राह्मण-क्रमेणाधीत्य, गृहस्थाश्रमं गृहस्थविहितकर्मकलापरूपमनुतिष्ठेत्॥ कृतदारपरिग्रहो गृहस्थः, गृहशब्दस्य दारवचनत्वात्॥ अविप्लुतब्रह्मचर्यः इति पूर्वविहितस्त्रीसंयोगमधुमांसभक्षण- वर्जनरूपब्रह्मचर्यानुवादोऽयं प्रकृष्टाध्ययनङ्गत्वख्यापनार्थः पुरुषशक्त्यपेक्षश्चायमेकद्वित्रिशाखाध्ययनविकल्पः॥ यद्यपि व्रतानि, वेदाध्ययनं च नित्यवदुपदिशता मनुनोभयस्नातक एव श्रेष्ठत्वादभिहितः, तथापि स्मृत्यन्तरादन्यतरः स्नातकोऽपि बोद्धव्यः॥ तदाह हारीतः- "त्रयः स्नातका भवन्ति विद्यास्नातकः, व्रतस्नातकः, विद्याव्रतस्नातकश्च" यः समाप्य वेदम्, असमाप्य व्रतानि समावर्तते स विद्यास्नातकः॥ यः समाप्य व्रतानि असमाप्य वेदं समावर्तते स व्रतस्नातकः॥ उभयं समाप्य समावर्तते यः, स विद्याव्रतस्नातकः॥

गृहस्थाश्रमस्य कर्त्तव्याकर्त्तव्यविचारः

श्रौतस्मार्तानि कर्माणि अग्निसाध्यानि दर्शयिष्यन् कस्मिन्नग्नौ किं कर्तव्यमित्याह- मृत्युक्तं वैश्वदेवादिकं कर्म लौकिकं च यत्प्रतिदिनं पाकलक्षणं तदपि, गृहस्थो विवाहाग्नौ विवाहसंस्कृते कुर्वीत॥ दायकाले विभागकाल आहृते वा वैश्यकुलादग्निमानीय इत्यादिनोक्तसंस्कारसंस्कृते॥ अपि शब्दात्प्रेते वा गृहपतावाहृते संस्कृते एव॥ ततश्च कालत्रयातिक्रमे प्रायश्चित्तीयते। श्रुत्युक्तमग्निहोत्रादिकं कर्म वैतानिकाग्निषु आहवनीयादिषु कुर्वीत॥ यथा-

कर्म स्मार्तं विवाहाग्नौ कुर्वीतप्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु॥ याज्ञवल्क्यस्मृतिः,१.९७।।

अपि च-

दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः॥ याज्ञवल्क्यस्मृतिः, १.१६॥

शरीरचिन्तां निर्वत्य कृतशौचविधिर्द्विजः।। प्रातः संध्यामुपासीत दन्तधावनपूर्वकम्॥। याज्ञवल्क्यस्मृतिः, १.९८।।

शरीरचिन्तामावश्यकादिकं, कर्णस्थं ब्रह्मसूत्रं यस्य स तथोक्तः॥ कर्णश्च दक्षिणः पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत् इति लिङ्गात्। असावहनि संध्ययोश्च उदङ्मुखो मूत्रपुरीषे कुर्यात्॥ चकाराद्भस्मादिरहिते देशे॥ रात्रौ तु दक्षिणामुखः॥ इत्यादिनोक्तेन विधिना कृतशौचविधिर्द्विजः दन्तधावनपूर्वकं प्रातः सन्ध्यामुपासीत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दन्तधावनविधिश्च कण्टकिक्षीरवृक्षोत्थं द्वादशाङ्गुलसम्मितम्॥ कनिष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्चकम्। दन्तधावनमुद्दिष्टं जिव्होल्लेखनिका तथा॥ अत्र 'वृक्षोत्थम् इत्यनेन तृणलोष्टाङ्गुल्यादिनिषेधः। पलाशाश्वत्थादिनिषेधश्च स्मृत्यन्तरोक्तोऽष्टव्यः॥ दन्तधावनमन्त्रश्च- **आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च॥ ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते॥॥**

ततो मध्याह्ने शास्त्रोक्तविधिना नद्यादिषु स्नात्वा देवान् स्वगृहोक्तान् पितृंश्च चकारादृषींश्च, देवादितीर्थेन तर्पयेत्॥ तदनन्तरं गन्धपुष्पाक्षतैः हरिहरहिरण्यगर्भप्रभृतीनामन्यतमं यथावासनमृग्यजुःसाममन्त्रैस्तत्प्रकाशकैः स्वनामभिर्वा चतुर्थ्यन्तैर्नमस्कारयुक्तैराराधयेद्यथोक्तविधिना॥ तथा च याज्ञवल्क्यः—

हुत्वाग्नीन्सूर्यदैवत्यान्जपेन्मन्त्रान्समाहितः॥ वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च॥॥।

उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये॥ स्नात्वा देवान्पितृंश्चैव तर्पयेदर्चयेत्तथा॥॥ याज्ञवल्क्यस्मृतिः,१.९९-१००।।

तदनन्तरं वेदाथर्वेतिहासपुराणानि समस्तानि व्यस्तानि वा आध्यात्मिकीं च विद्यां जपयज्ञसिद्ध्यर्थम् उक्तविधिना यथाशक्तिं जपेत्॥ बलिकर्म भूतयज्ञः, स्वधा पितृयज्ञः, होम देवयज्ञः, स्वाध्यायो ब्रह्मयज्ञः, अतिथिसत्क्रिया मनुष्ययज्ञः॥ एते पञ्च महायज्ञा अहरहः कर्तव्याः नित्यत्वात्॥ यत्पुनरेषां फलश्रवणं तदेषां पावनत्वख्यापनार्थं न काम्यत्वप्रतिपादनाय।

यथा याज्ञवल्क्यः-

बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः। भूतपित्रमरब्रह्ममनुष्याणां महामखाः॥॥ याज्ञवल्क्यस्मृतिः, १०२।

तथा च बृहत्पराशरः-

गृहस्थो हि चतुर्भेदो वार्ताशालीनवृत्तिकौ। यायावरस्तथा वान्यो घोरसन्यासिकस्तथा॥॥।

कृषि-गोरक्ष वाणिज्यैः कुर्वन् सर्वाः क्रिया द्विजः॥ विहितैरात्मविद्यैश्च वार्ता वृत्तिः स उच्यते॥॥

ददात्यध्येति यजते याजयेन्न च पाठयेत्॥ कुर्यात्कर्म प्रतिग्राही शालीनो ध्यानकृद्द्विजः॥॥।

उक्तः सन् कारयेदन्यां क्रियां कुर्यात्प्रतिग्रहम्।। पाठयेच्च तथात्मानं यायावरः स उच्यते॥॥।

तिष्ठेद्याच्च शिलोञ्च्छाम्यामुद्घृताग्निश्च उच्यते।। आत्मविच्च क्रियाः कुर्यात् धीरसंन्यासिकः स्मृतः॥॥

बृहत्पराशरस्मृतिः, १२.१४३ – १४७।

वानप्रस्थाश्रमः-

वने प्रकर्षेण नियमेन च तिष्ठति चरतीति वनप्रस्थः वनप्रस्थ एव वानप्रस्थः॥ संज्ञाया दैर्घ्यम्॥ यः वने नियमपूर्वकेन निवासं करोति तदा वानप्रस्थः॥ किन्तु एतत् विषये क्षीरस्वामी अनेन प्रकारेण व्युत्पत्तिः कृतवान्॥ "प्रतिष्ठन्ते अस्मिन् प्रस्थः, वनप्रस्थे भावो वानप्रस्थः वैखानसाख्यः" बृहत्पराशरस्मृतौ वैखानसः वानप्रस्थाश्रमस्य एकः प्रकारः वर्तते॥ अस्यां स्मृतौ वानप्रस्थस्य चतुष्प्रकाराः उद्धृता आसन्।। यथा-

वानप्रस्थश्चतुर्भेदो वैखानस उदुम्बरः॥ वालखिल्यो वनेवासी तल्लक्षणमथोच्यते॥ बृहत्पराशरस्मृतिः,१२.१५८॥

ग्राम्यं व्रीहियवादिकं भक्ष्यं सर्वं च गवाश्वशय्यादिपरिच्छदं परित्यज्य विद्यमानभार्यश्च वनवासमनिच्छन्तीं भार्यां पुत्रेषु समर्प्य इच्छन्त्या सहैव वनं गच्छेत्॥ यथा च मनुः –

सन्त्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम्॥ पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा॥॥ मनुस्मृतिः,६.३।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गृहस्थो यदाऽऽत्मदेहस्य त्वक्शैथिल्यं पुत्रस्य पुत्रं च पश्यति, तथाविधवयोऽवस्थया विगतविषयरागतया वनमाश्रयेत्॥ यथा मनुः-

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः॥ अपत्यस्यैव चापत्यं तदाऽरण्यं समाश्रयेत्॥। मनुस्मृतिः,६.२॥

तथा च उक्तवान् याज्ञवल्क्यः-

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम्।। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्॥।

याज्ञवल्क्यस्मृतिः,३.४५॥

वानप्रस्थाश्रमस्य कर्तव्याकर्तव्यविचारः

वानप्रस्थो जटिलश्चीराजिनवासा न फालकृष्टमधितिष्ठेत्, आकृष्टं मूलफलं संचिन्वीत ऊर्ध्वरेताः क्ष्माशयो दद्यादेव न प्रतिगृह्णीयादूर्ध्वं पञ्चभ्यो मासेभ्यः श्रावणिकेनाग्नीनाधायाहिताग्निर्वृक्षमूलको दद्याद् देवपितृमनुष्येभ्यः स गच्छेत्स्वर्गमानन्त्यम् इति वसिष्ठस्मरणात्॥ चीरं वस्त्रखण्डो वल्कलं वा॥ न फालकृष्टमधितिष्ठेत् कृष्ट-क्षेत्रस्योपरि न निवसेत्॥ श्रावणिकेन वैदिकेन मार्गेण न लौकिकेनेत्यर्थः॥ पुष्पमूलफलैरेव वा कालपक्वैः नाग्निपक्वैः स्वयंपतितैर्जीवेत्॥ वैखानस्य शास्त्रोक्तं धर्ममनुतिष्ठेत्॥

तथा च मनुः-

पुष्पमूलफलैर्वाऽपि केवलैर्वर्तयेत्सदा॥ कालपक्वैः स्वयंशीर्णैर्वैखानसमते स्थितः॥। मनुस्मृतिः,६.२१॥

इति विहितत्त्वात्। आश्रमागताञ्जलफलमूलभिक्षादानेन पूजयेत्। यथा-

यद्भक्ष्यं स्यात्ततो दद्याद् बलिं भिक्षां च शक्तितः॥ अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान्॥ मनुस्मृतिः, ६.७॥

अत एवोक्तं मनुः-

वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः॥ पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक्।॥ मनुस्मृतिः, ६.११॥

भोज्यविषये गौतमः अनेन प्रकारेण उक्तवान् फलमूलान्यपि ग्राम्याणि न भुञ्जीत॥ "अग्राम्यभोजी" गौतमधर्मसूत्रम्,१.३.१७॥ पुष्पमूलफलैरेव वा कालपक्वैः वा नाग्निपक्वैः स्वयंपतितैर्जीवेत्॥ वैखानसशास्त्रोक्तं धर्ममनुतिष्ठेत्।। यथा मनुः-

पुष्पमूलफलैर्वाऽपि केवलैर्वर्तयेत्सदा॥ कालपक्वैः स्वयंशीर्णैर्वैखानसमते स्थितः॥। मनुस्मृतिः, ६.२१॥

पुरुषार्थतया विहितद्विर्भोजननिवृत्यर्थचान्द्रायणैर्वक्ष्यमाणलक्षणैः कालं नयेत्॥ कृच्छैर्वा प्राजापत्यादिभिः कालं वर्तयेत्॥ यद्वा- पक्षे पञ्चदशदिनात्मकेऽतीतेऽश्नीयात्॥ मासे वाऽहनि गते वा नक्तमश्नीयात्॥ 'अपि शब्दाच्चतुर्थकालिकत्वादिनापि॥ यथा याज्ञवल्क्यः-

चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा। पक्षे गते वाप्यश्नीयान्मासे वाऽहनि वा गते॥।। याज्ञवल्क्यस्मृतिः, ३.४०॥

यथा सामर्थ्यमन्नमाहृत्य प्रदोषे भुञ्जीत॥ अहन्येव वा चतुर्थकालाशनो वा स्यात्॥ "सायं प्रातर्मनुष्याणामशनं देवनिर्मितम्" इति विहितं तत्रैकस्मिन्नहन्युपोष्यापरेद्युः सायं भुञ्जीत॥ अष्टमकालिको वा भवेत्॥ त्रिरात्रमुपोष्य चतुर्थस्याह्नो रात्रौ भुञ्जीत॥ तद्यथा-

नक्तं चान्नं समश्नीयाद्दिवा वाऽऽहृत्य शक्तितः।। चतुर्थकालिको वा स्यात्स्याद्वाष्टमकालिकः॥। मनुस्मृतिः, ६.१९॥

आहारविहारावसरवर्ज्यं रात्रौ शुचिः प्रयतः स्वप्यात् नोपविशेन्नापि तिष्ठेत्॥ दिवास्वप्नस्य पुरुषमात्रार्थतया प्रतिषिद्धत्वान्न तन्निवृत्तिपरम्॥ तथा भूमावेव स्वप्यात्॥ तच्च भूमावेव न शय्यान्तरितायां मञ्चकादौ वा॥ दिनं तु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संप्रपदैरटनैर्नयेत्॥ स्थानासनरूपैर्वा विहारैः संचारैः कंचित्कालं स्थानं कंचिच्चोपवेशनमित्येवं वा दिनं नयेत्।। योगाभ्यासने वा॥ तथा च याज्ञवल्क्यः-

स्वप्याद्भूमौ शुची रात्रौ दिवा संप्रपदैर्नयेत्॥ स्थानासनविहारैर्वा योगाभ्यासेन वा तथा॥ याज्ञवल्क्यस्मृतिः, ३.५१॥

वानप्रस्थ एता दीक्षा एतान्नियमानन्यांश्च वानप्रस्थशास्त्रोक्तानभ्यसेत्॥ औपनिषदींश्च श्रुतीरुपनिषत्पठितब्रह्मप्रतिपादकवाक्यानि विविधान्यस्यात्मनो ब्रह्मसिद्धये ग्रन्थतोऽर्थतश्चाभ्यसेत्।

यथा मनुः—

एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन्॥ विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः॥॥ मनुस्मृतिः, ६.२९॥

आत्मनः संसिद्धये ब्रह्मत्वप्राप्तये॥ तथा शब्दात्क्षितिपरिलोडनाद्वा नयेत्॥ केवलायां भूमौ लुण्ठनगतागतानि कुर्यात्॥ स्थानासनादावुपविशेत्॥ उत्तिष्ठेत्पर्यटेदित्यर्थः॥ आवश्यकं स्नानभोजनादिकालं विहाय चायं नियमः, एवमुत्तरत्रापि॥ पदाग्राभ्यां वा दिनं तिष्ठेत्कञ्चित्कालं स्थित एव स्यात् कञ्चिच्चोपविष्ट एव न त्वन्तरा पर्यटेत्॥ सवनेषु सायंप्रातर्मध्याह्नेषु स्नायात्॥ सायं प्रगे तथेत्युक्तं तेन सहास्य नियमातिशयापेक्षो विकल्पः॥ यथा—

भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम्॥ स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः॥॥ मनुस्मृतिः, ६.२२।।

ऋयर्तुः संवत्सरो ग्रीष्मो वर्षा हेमन्तः इति दर्शनात् ग्रीष्मे चैत्रादिमासचतुष्टये चतसृषु दिक्षु चत्वारोग्नयः उपरिष्यदादित्य इत्येवं पञ्चानामग्नीनां मध्ये तिष्ठेत्॥ तथा वर्षासु श्रावणादिमासचतुष्टये स्थण्डिलेशयः वर्षाधाराविनिवारणविरहिणि भूतले निवसेत्। हेमन्ते मार्गशीर्षादिमासचतुष्टये क्लिन्नं वासो वसीत्॥ एवं विधतपश्चरणे असमर्थः स्वशक्त्यनुरूपं वा तपश्चरेत्॥ तथा याज्ञवल्क्यः-

ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः॥

आर्द्रवासास्तु हेमन्ते शक्त्या वापि तपश्चरेत्॥।

याज्ञवल्क्यस्मृतिः, ३.४२।

विहितमपि त्रिषवणं स्नानं देवर्षिपितृतर्पणविधानार्थमनुद्यते॥ प्रातर्मध्यंदिनंसायंसवनेषु त्रिष्वपि देवर्षिपितृतर्पणं कुर्वीत॥ अन्यदपि पक्षमासोपवासादिकं तीव्रव्रतं तपोऽनुतिष्ठेत्॥ यथा-

उपस्पृशंस्त्रिषवणं पितृन्देवांश्च तर्पयेत्॥ तपश्चिरंश्चोग्रतरं शोषयेद् देहमात्मनः॥॥ मनुस्मृतिः, ६.२४॥

तथा च यमेन –

पक्षोपवासिनः केचित्केचिन्मासोपवासिनः॥ मन्वर्थमुक्तावली, पृष्ठ २८७॥

इति स्वशरीरं शोषयेत्॥ यदा तु तदसंभवो व्याध्यभिभवो वा तदा किं कार्यमित्यत आह-ग्रामाद्वा भैक्षमाहृत्य वाग्यतो मौनी भूत्वा अष्टौ ग्रासान्भुञ्जीत॥ ग्राम्यभैक्षविधानान्मुन्यन्ननियमोऽर्थलुप्तः॥ यदा पुनरष्टभिर्ग्रासैः प्राणधारणं न संभवति तदा॥ 'अष्टौ ग्रासा मुनेर्भक्ष्याः वानप्रस्थस्य षोडशेति स्मृत्यन्तरोक्तं द्रष्टव्यम्॥ यथा-ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जीत वाग्यतः॥ याज्ञवल्क्यस्मृतिः,३.५५॥

सकलानुष्ठानासमर्थं प्रत्याह अथवा वायुरेव भक्षो यस्यासौ वायुभक्षः प्रागुदीचीमैशानीं दिशं गच्छेत्॥ आ वर्ष्मसंक्षयात् वर्ष्म वपुस्तस्य निपातपर्यन्तमकुटिलगतिर्गच्छेत्॥

वायुभक्षः प्रागुदीचीं गच्छे द्वाऽऽवर्ष्मसंक्षयात्॥॥ याज्ञवल्क्यस्मृतिः, ३.५५॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संन्यासाश्रमः-

यावताऽकालेन तीव्रतपः शोषितवपुषो विषयकषायपरिपाको भवति पुनश्च मदोद्भवाशङ्का नोद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्यात्॥ वन-गृह- शब्दाभ्यां तत्संबन्ध्याश्रमो लक्ष्यते॥ मोक्ष शब्देन च मोक्षैकफलकश्चतुर्थाश्रमः॥ अनियतपरिमाणत्वादायुषस्तृतीयभागस्य दुर्विज्ञानात्तृतीयमायुषो भागमिति रागक्षयावधिवानप्रस्थकालोपक्षणार्थम्॥ अत एव शङ्खलिखितौ - "वनवासादूर्ध्वं शान्तस्य गतवयसः पारिव्राज्यम्"॥ एवं वनेषु विहृत्यैव विधिवद् दुश्चरतपोऽनुष्ठानप्रकारेण वानप्रस्थाश्रमं विषयरागोपशमनाय कञ्चित्कालमनुष्ठाय "चतुर्थमायुषो भागम्" इति शेषायुः काले सर्वथा विषयसङ्गान्त्यक्त्वा परिव्राजकाश्रममनुतिष्ठेत्॥ यथा मनुः-

वनेषु च विहृत्यैवं तृतीयं भागमायुषः॥ चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत्॥ मनुस्मृतिः, ६.३३॥

संन्यासाश्रमस्य कर्तव्याकर्तव्यविचारः-

सर्वभूतेभ्यः प्रियाप्रियकारिभ्यो हित उदासीनो, न पुनर्हिताचरणः॥ हिंसायामनुग्रहे च भूतेषु समो यो हिनस्ति यो वाऽनुगृह्णाति तत्र तत्र निर्विकारः॥ यथा- "समो भूतेषु हिंसानुग्रहयोः गौतमधर्मसूत्रम् १.३.२३॥ ऐहिकं पारत्रिकं च न कंचिदारम्भं कुर्यात्॥ "अनारम्भी गौतमधर्मसूत्रम् १.३.२४॥ शान्तो बाह्यान्तःकरणोपरतः त्रयो दण्डा अस्य सन्तीति त्रिदण्डी॥ ते च दण्डा वैणवा ग्राह्याः॥ प्राजापत्येष्ट्यनन्तरं त्रीन्वैणवान्दण्डान्मूर्धप्रमाणान्दक्षिणेन पाणिना धारयेत्सव्येन सोदकं कमण्डलुम् इति स्मृत्यन्तरदर्शनात्॥ एकं वा दण्डं धारयेत् "एकदण्डी त्रिदण्डी वा" इति बौधायनवचनात्॥ 'चतुर्थमाश्रमं गच्छेद् ब्रह्मविद्यापरायणः॥ एकदण्डी त्रिदण्डी वा सर्वसंगविवर्जितः॥ इति चतुर्विंशतिमते दर्शनाच्च॥ तथा शिखाधारणमपि वैकल्पिकम्॥ सर्वानेव केशान्सह शिखया वापयेत् शिखावर्जं वापयेद्वा॥ मुण्डः शिखी वेति विकल्पेनैक- दण्डत्रिदण्डग्रहणविकल्पोऽप्युक्तः॥ यथा- "मुण्डः शिखी वा गौतमधर्मसूत्रम् १.३.२१।। अत्र श्रुतिस्मृती-

अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा॥ सशिखीत्युच्यते विद्वान्नेतरे केशधारिणः॥

सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः॥ एकदण्डं गृहीत्वा च भिक्षुधर्मं समाचरेत्॥

शिखी यज्ञोपवीती च यद्वा सम्यक्प्रबोधितः। त्रिदण्डग्रहणं कृत्वा भिक्षुधर्मं समाचरेत्॥ गौतमधर्मसूत्रम्,मिताक्षरा पृ. ३४

"मुण्डोऽममोऽक्रोधोऽपरिग्रहः" इति वसिष्ठस्मरणात्॥ तथा यज्ञोपवीतधारणमपि वैकल्पिकमेव॥ सशिखान् केशान् निकृन्त्य विसृज्य यज्ञोपवीतम् इति काठकश्रुतिदर्शनात् कुटुम्बं पुत्रदारांश्च वेदाङ्गाानि च सर्वशः॥ केशान् यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः॥ इति बाष्कलवचनात्॥ काषायो मुण्डस्त्रिदण्डी सकमण्डलु-पवित्र-पादुकासनकन्थामात्रः इति देवलस्मरणात्॥ शौचाद्यर्थं कमण्डलुसहितश्च भवेत्॥

एकरात्रं वसेद् ग्रामे नगरे रात्रिपञ्चकम्॥ वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत्॥। याज्ञवल्क्यस्मृ., मिता., पृ.४४५॥

तथा च याज्ञवल्क्यः-

सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः॥ एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्॥ याज्ञवल्क्यस्मृतिः, ३.५८।

भिक्षाकाल एव ग्रामं प्रविशेत्॥ शेषकालं देवालयादौ वृक्षमूलेषु वा वसेत्॥ भिक्षार्थी ग्राममियात्॥ गौतमधर्मसूत्रम् १.३.१३॥ अप्रमत्तो वाक्चक्षुरादिचापलरहितो भैक्षं चरेत्॥ आत्मानमेव ध्यात्वाऽनपेक्षमाणः प्राचीनमुदीचीं वा दिशं प्रव्रजेत् चतुर्षु वर्णेषु भैक्षचर्यां चरेत्॥ पाणिपात्रेणाऽशनं कुर्यात्॥ औषधवदशनमाचरेत्॥ औषधवदशनं प्राश्नीयात्॥ यथालाभमश्नीयात्॥ प्राणसन्धारणार्थं यथा मेदोवृद्धिर्न जायते, कृशी भूत्वा ग्रामे एकरात्रं, नगरे पञ्चरात्रं, चतुरो मासान् वार्षिकान् ग्रामे वा नगरे वापि वसेत्॥ "पक्षो वै मासा" इति द्वौ मासौ वा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
वसेत्॥ विशीर्णं वस्त्रं वल्कलं प्रतिगृह्णीयात् नान्यत् प्रतिगृह्णीयात् यद्यशक्तो भवति॥ यतिधर्मदर्शिनी, पृष्ठसंख्या ७, अनुसारेण।यथा –

संन्यासाश्रमे सततयोगाभ्यासो भ्रमणशीलजीवनयापनञ्च विहितं शास्त्रे॥ तद्यथा–

यतमानो यतिः साधुः स्मृतो योगस्य साधनात्॥ संन्यासाश्रमस्य जीवनमादर्शमयं जीवनं भवति॥ इत्थं चतुर्ष्वपि आश्रमेषु वासं विधाय परमपुरुषार्थस्य मोक्षस्य सम्प्राप्तिं मानवः करोति॥ अयमेव मोक्षाख्यः परमपुरुषार्थोऽस्ति॥

स्वकीयकर्तव्यस्य फलप्राप्तुं विचारं न कृत्वा यो विचरणं करोति सः संन्यासी भवति॥ तद्यथा भगवद्गीतायाम् उल्लेखोऽस्ति॥ यत्–

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः॥ स संन्यासी च योगी च न निरग्निः न चाक्रियः॥ भगवद्गीता, ६।१।

निष्कर्षः

सनातनवैदिकधर्मे मानवानां संरक्षणार्थं व्यवस्था विहिता वर्तते॥ तत्र ब्राह्मणक्षत्रियवैश्यशूद्रादीनां वर्णानां ब्रह्मचर्यादयश्चत्वार आश्रमाः प्रतिपादिताः सन्ति॥ यथा विष्णुपुराणे–

वर्णाऽऽश्रमविरुद्धं च कर्म कुर्वन्ति ये नराः॥ कर्मणा मनसा वाचा निरयेषु पतन्ति ते॥

सनातनवैदिकपरम्परायां सामान्यरूपेण ब्राह्मणस्य अष्टमवर्षे, क्षत्रियस्य एकादशवर्षे, एवं वैश्यस्य द्वादशवर्षे उपनयनसंस्कारस्य नियमो वर्तते॥ उपनयनसंस्कारः पश्चात् पञ्चविंशतिवर्षपर्यन्तं ब्रह्मचर्याश्रमस्य नियमो विद्यते॥ तत्र व्रतोपासनादिं कृत्वा, वेदवेदाङ्गस्य सम्यगध्ययनस्यविधानं वर्तते॥ वेदाध्ययने समाप्ते जाते ब्रह्मचर्याश्रमस्य नियमाः पूर्णरूपेण समाप्यन्ते॥ तत्पश्चात् गृहस्थाश्रमप्रवेशो भवति॥ तदनन्तरं वानप्रस्थाश्रमे तदनु सन्न्यासाश्रमे प्रवेश व्यवस्था शास्त्रेषु दृश्यते॥ चतुर्णामाश्रमाणां सेवन नियमाः वेदे, स्मृतिग्रन्थे,पुराणशास्त्रे च दृश्यन्ते॥

ब्रह्मचर्याश्रमस्य नियमपरिपूर्णं कृत्वा आवश्यकं ज्ञानम्, आचरणञ्च प्राप्य विधिनियम पालने समर्थपुरुषो विवाहं विधाय गृहस्थाश्रमस्य आस्वादं ग्रहीतुं शक्नोतीति चर्चा शास्त्रेषु प्राप्यते॥ स्वाध्यायनं,धर्मानुकूलाचरणं सन्तानोत्पादनं, यजनं, याजनं, जीवनसंचालनं चेत्यादीनि कर्माणि गृहस्था श्रमेणः कृते शास्त्रेषु निर्दिष्यानि सन्ति॥

आदर्शरूपेण गृहस्थाश्रमस्य नियमे पालने सति द्विजातीनां धर्मादिपुरुषार्थचतुष्टयं हस्तगतं भवतीति समुल्लेखस्पष्टवचनं शास्त्रेषु समालोक्यते॥ अतश्च ज्ञायते गृहस्थाश्रमस्य भोगं कृत्वापि मोक्षपदविं प्राप्तुं शक्यतइति सर्वेषां वैदिकादिशास्त्राणां ऐक्यमतं दृष्टिगोचरी भवति॥

वेदाध्ययनस्यकृते सम्पूर्णनियमाः ब्रह्मचर्याश्रमः सर्वे अधिकारीणां नित्यं भवति॥ अतिथिसत्कारः

विष्णुपुराणानुसारं गृहस्थः मधुरवचनैः अतिथिसत्कारं कुर्यात्॥ अस्मिन्नेव सन्दर्भे पुराणस्य निर्देशोऽस्ति यद, यदि अतिथिः गृहस्थस्य गृहाद् असन्तुष्टः प्रतिनिवर्तते, तदा सः स्वदुष्कृत गृहस्थाय प्रदाय तस्य समस्तं पुण्यमादाय गच्छति॥ तद्यथा–

तेषां स्वागतदानादि वक्तव्यं मधुरं नृप॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते॥
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥ विष्णुपुराणम्,३.९.१५।।

वायुब्रह्माण्डपुराणयोः आतिथेयः गृहस्थस्य परमो धर्मः कथितोऽस्ति॥ यथोक्तम्–

दाराऽग्नयोऽथातिथेय इज्याश्राद्धक्रियाः प्रजाः॥ वायु,८.१७३। ब्रह्माण्ड,२.७.१७४।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मत्स्यपुराणे निर्देशितमस्ति यद् गृहस्थस्य धर्मः अतिथिं भोजनेन सन्तुष्टीकरणमपि भवेत् – दद्यात् सदैवातिथीन् भोजयेच्च॥ मत्स्यपुराणम्,४०.३॥ एषा निर्देशानां समर्थनं गौतमधर्मसूत्रस्य– भोजयेत् पूर्वमतिथिम्। गौतमधर्मसूत्रम्, ५.२६।।

सुवासिनीःकुमारीश् च रोगिणो गर्भिणीः स्त्रियः। अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्॥। मनुस्मृतिः, ३.११४।

अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः। अप्रणोऽतिथिः सायमपि वाग्भूतृणोदकैः॥॥

याज्ञवल्क्यस्मृतिः गृहस्थधर्मप्रकरणम् श्लो. १०७।

यश्चोद्धरणैरपि भवति, यत्र अतिथिसत्कारः गृहस्थस्य परिधेरन्तर्गतं कृतमस्ति विवेचितः॥

पितृतर्पणम्

विष्णुपुराणानुसारं गृहस्थः पितृन् निवापनेन (पिण्डदानेन) अर्चेत्॥ वायुब्रह्माण्डपुराणयोः गृहस्थस्य धर्मेषु श्राद्धक्रियोपरि विशेषरूपेण ध्यानाकर्षणं कृतमस्ति॥ एवमेव मत्स्यपुराणेऽपि गृहस्थाय पितृतर्पणमावश्यकं मन्यते॥

यज्ञः

विष्णुपुराणे निरूपितमस्ति यद् देवानां प्रसादनार्थं गृहस्थः यज्ञं कुर्यात्॥ यथोक्तम्– निवापनेन पितृनर्चन् यज्ञैर्देवांस्तथातिथीन्॥। विष्णुपुराणम् ३.९.९॥

वायुब्रह्माण्डपुराणयोः याज्ञिकानुष्ठानं गृहस्थस्योपेक्षितकर्तव्यान्तर्गतं विहितमस्ति॥ मत्स्यपुराणानुसारं गृहस्थाय याज्ञिकक्रियायां समुपार्जितधनस्य यथोचितः व्ययः आवश्यकमस्ति॥ मत्स्यपुराणम्, ४०.३।।

बलिकर्म

विष्णुपुराणस्य कथनमस्ति यद् भूतानां सन्तुष्ट्यै गृहस्थः बलिकर्म निष्पादयेत् – भूतानि बलिभिश्चैव॥ विष्णुपुराणम्,३.९.१०॥ मत्स्यपुराणानुसारं गृहस्थः बलिकर्मणा भूतानामर्चनक्रियायाः समाचरणं करोति॥

स्वाध्यायः

विष्णुपुराणानुसारं गृहस्थः स्वाध्यायेन ऋषीन् पूजयति॥ मत्स्यपुराणे कथितमस्ति यद् मुनीनामर्चनार्थं गृहस्थः स्वाध्यायरतो भवेत्॥

स्वाध्यायैरर्चयेच्चर्षीन् होमैर्विद्वान् यथाविधि।। पितॄन् श्राद्धैरन्नदानैर्भूतानि बलिकर्मभिः॥। मत्स्यपुराणम्,५३.१६।

पञ्चमहायज्ञः

मत्स्यपुराणे स्पष्टं वर्णितमस्ति यद् अतिथिसत्कारादयः पञ्चमहायज्ञाः सन्ति॥ ये पञ्चविधदैनिकहिंसाया अपनोदनार्थं विहिताः सन्ति॥ याः पञ्च हिंसाः सन्ति–कण्डनी, चुल्ली, पेषणी, जलकुम्भी, प्रमार्जनी च याः नित्यप्रतिभवन्ति॥

पञ्चैते विहिता यज्ञाः पञ्चसूनापनुत्तये॥ कण्डनी पेषणी चुल्लीजलकुम्भीप्रमार्जनी॥॥
पञ्च सूना गृहस्थस्य तेन स्वर्गे न गच्छति॥॥

एषां पञ्च महायज्ञानां प्रतिपादनं वैदिककाले एवाभवत्॥ शतपथब्राह्मणे एषां पञ्चानां क्रमशः भूतयज्ञः (बलिकर्म), मनुष्ययज्ञः (अतिथिसत्कारः), पितृयज्ञः (पितृतर्पणम्), ब्रह्मयज्ञः इति नामानि दत्तानि॥ यथोक्तम्–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्चैव महायज्ञाः॥ तान्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो ब्रह्मयज्ञ इति॥ शतपथब्राह्मणम्,११.५.६.१॥ कालान्तरस्यान्यग्रन्थैरपि अस्य परम्परानिर्वाहस्य सूचनाप्राप्यते॥ उदाहराणार्थं मनुस्मृतौ वर्णितमस्ति यद् गृहस्थः नित्यं प्रतिचुल्ली- पेषणी उपस्कर कण्डनी जलकुम्भी इत्येभिः पञ्चपापानि करोति॥ येषां निवारणार्थं पञ्च महायज्ञाः विहिताः सन्ति॥ एते पञ्चमहायज्ञः सन्ति- ब्रह्मयज्ञः, पितृयज्ञः, देवयज्ञः, भूतयज्ञः नृयज्ञश्च।

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः॥ कण्डनी चोदकुम्भश्च वध्यते यस्तु वाहयन्॥॥

तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः॥॥ पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥॥ मनुस्मृतिः, ३.६८,७०।

तत्र ऐतादृशं निरूपितमस्ति यद् ब्रह्मयज्ञस्य स्वाध्यायः, पितृयज्ञस्य तर्पणम्, देवयज्ञस्य होमः, भूतयज्ञस्य बलिकर्म, नृयज्ञस्यातिथिसत्कारः द्योतनार्थं विहिताः सन्ति॥ यथाह भगवान् मनुः-

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्॥ होमो दैवो बलिर्भौतो नृपज्ञोऽतिथिपूजनम्॥। मनुस्मृतिः,३.७०॥

एवं यः गृहस्थः स्वकीयान् परमान् धर्मान् पूर्णतया पालयति, सः समस्तबन्धनाद् विमुच्य अत्युत्तमान् लोकान् प्राप्नोति॥ यथाह विष्णुपुराणे-

यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम्॥ सर्वबन्धविनिर्मुक्तो लोकानाप्नोत्यनुत्तमान्॥॥

कृतज्ञताज्ञापनम्

अस्मिन् आलेखे धर्मशास्त्रे धर्मशास्त्रदृष्ट्या आश्रमधर्मस्वरूपविमर्शः इति विश्लेषणक्रमे, सैद्धान्तिकविषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विषयविज्ञेभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् हार्दिकीं कृतज्ञतां व्यनज्मि।

सन्दर्भसूची-

१. गौतमधर्मसूत्र, (वि सं २०६९), प्रमोदवर्धन कौण्डिन्न्यायन, भावमीमांसा नेपाली व्याख्या, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं।

२. गौतमधर्मसूत्राणि, (२०२३),चौखम्वा संस्कृतसिरीज अफिस वाराणसी।

३. दैवज्ञवाचस्पति श्रीवासुदेवः, पराशरस्मृति, (१९८३), चौखम्बा अमरभारती प्रकाशन, वाराणसी।

४. दैवज्ञनारायण विरचित, मुहूर्तचिन्तामणि, (ई.२०००)पीयुषधारा व्याख्याः चौखम्वा सुरभारती प्रकाशन वाराणसी।

५. दैवज्ञनारायण विरचित, मुहूर्तमार्तण्डः,(२००९),चौखम्वा विद्याभवन, वाराणसी।

६. पराशरस्मृति माधवचार्यकृता पराशरमाधवीय संहिता, चौखम्बा संस्कृत सिरीज अफिस वाराणसी, २०२३

७. पराशर, पराशरस्मृति, (वि.सं.२०७८), अनु.वासुदेव खनाल, शारदा खनाल।

८. पुरुषार्थचिन्तामणिः (२००६),आठवले इत्युपाह्वविष्णुभट्ट विरचितः, संम्पादक डाँ व्यासमिश्रः, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः वाराणसी।

९. मनु (सन् २००७), *मनुस्मृति.*, शिवराज आचार्य कौण्डिन्न्यायन, अनु. वाराणसी : चौखम्बा संस्कृत संस्थान।

१०. याज्ञवल्क्यः, (सन् २०६५), *याज्ञवल्क्यस्मृतिः*, (मिताक्षरा). वाराणसी : चौखम्बा संस्कृत संस्थान।

११. विष्णुपुराणम्, वेदव्यास, गिताप्रेस गोरखपुर।

१२. मत्स्यपुराणम्, वेदव्यास, गिताप्रेस गोरखपुर।

१३. श्रीमद्भगवत्गीता, विष्णुसहस्रनामसहित, दुर्गा साहित्य भण्डार, वाराणसी।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शुक्लयजुर्वेदको प्रकृति–विकृतिपाठ विमर्श

सहप्रा. तेजप्रकाश पौडेल

वेदविभाग, वाल्मीकि विद्यापीठ

लेखसार :

'वेद' मानव सभ्यताको सबैभन्दा पुरानो तथा आर्यसभ्यता र संस्कृतिको महत्त्वपूर्ण धर्मग्रन्थ हो– यसलाई बुझाउन आम्नाय, आगम, श्रुति, वेद जस्ता शब्दहरुको प्रयोग गरिएको पाइन्छ। यसको धार्मिक मात्र नभएर ऐतिहासिक दृष्टिले पनि असाधारण महत्त्व छ। मानवजाति र विशेष गरेर आर्य जातिले आफ्नो धर्म र समाजको कुन कुन प्रकारले विकास गरे भन्ने कुराको ज्ञान पनि वेदबाट थाहा पाउँन सकिन्छ। यो सनातन धर्मावलम्बीहरुको सबैभन्दा पुरानो धर्मग्रन्थ मात्र नभएर विश्वसभ्यताकै सबैभन्दा प्राचीन धर्मग्रन्थ पनि हो। यसको निर्माण 'विद्' धातुबाट भएको छ। यसको अर्थ जान्नु वा जान्ने हुन्छ यसलाई श्रुति पनि भनिन्छ।'श्रु' धातुबाट श्रुति बनेको छ। यसको अर्थ 'श्रु' अर्थात् सुन्नु भन्ने हुन्छ। प्राचीन तपस्वी महर्षिहरूलाई गहिरो तपस्यामा लीन भइरहेको समयमा वैदिकमन्त्रहरू स्वयं ईश्वरले अप्रत्यक्ष रूपमा सुनाएको हो भनिन्छ। त्यसैले 'वेद अपौरुषेय ग्रन्थ हो। यसका रचनाकार वा लेखक पाईंदैनन्। यिनै वैदिक मन्त्रहरूको पाठमा हुने अशुद्धिबाट जोगिएर वेदोक्त धर्म प्राप्त गर्न र यस्तो अमूल्य ग्रन्थलाई अक्षुण्ण राख्नका लागि वेदमन्त्रद्रष्ट्य महर्षिहरुले व्यवस्था गरेको संहिता, पद र क्रमपाठ तथा जटादि आठ प्रकृति–विकृतिपाठहरुलाई पुस्तकालयीय अध्ययन पद्धतिबाट अध्ययन गरी सजिलैसँग बुझ्न र पाठगर्न सक्नेगरी लक्षण र उदाहरणसहित प्रस्तुत गर्नु नै यस आलेखको सार रहेको छ।

शब्दकुञ्जी : संहिता, पद, क्रम, प्रकृति, विकृति, जटा, ध्वज, दण्ड, घन, लक्षण, पाठ, शिखा, परिचय।

समस्या, उद्देश्य तथा अध्ययनविधि :

शुक्लयजुर्वेद माध्यन्दिन संहिताका मन्त्रहरुको संहितादि एघार प्रकारका प्रकृति–विकृति पाठहरु के कसरी सजिलैसँग अध्ययन गर्न सकिन्छ भन्ने नै यो आलेखको समस्या हो। यस समस्याको सजिलो समाधान खोज्नु यस अनुसन्धानात्मक आलेखको उद्देश्य हो। यसमा गुरुपरम्पराबाट प्राप्त भएका वेदका मन्त्रहरूको शुद्ध उच्चारण गर्न, पाठमा हुने अशुद्धिबाट जोगिएर वेदोक्त धर्म प्राप्त गर्न र यस्तो अमूल्य ग्रन्थलाई अक्षुण्ण राख्नका लागि वेदमन्त्रद्रष्ट्य महर्षिहरुले व्यवस्था गरेको संहितापाठ, पदपाठ, क्रमपाठ, जटापाठ, मालापाठ, शिखापाठ, रेखापाठ, ध्वजपाठ, दण्डपाठ, रथपाठ र घनपाठ आदि एघार किसिमका प्रकृति–विकृति पाठहरुको एपिए अध्ययन पद्धतिलाई आत्मसात् गर्दै पुस्तकालयीय अध्ययनविधि अवलम्बन गरी अध्ययन र विश्लेषण गरिएको छ।

विषय परिचय :

'वेद' आर्य सभ्यता र संस्कृतिको महत्त्वपूर्ण विशाल धर्मग्रन्थ हो। यसमा ज्ञान–विज्ञान, धर्म–दर्शन, सदाचार–संस्कृति, नैतिक, सामाजिक, राजनीतिक, धार्मिक आदि मूल्य मान्यताका विभिन्न जीवनोपयोगी विषयहरूको उल्लेख गरिएको छ। श्रुति, पुराण, श्रेयमार्ग, प्रेयमार्ग, प्राचीन धर्म, समाज र व्यवहार आदिको समेत उल्लेख भएको आर्य सनातनीहरुको ठुलो अपौरुषेय धर्म ग्रन्थ हो। आचार्य मनुले पनि मनुस्मृतिमा वेद सम्पूर्ण धर्मको मूल भएको कुराको उल्लेख गरेका छन्। **'वेदोऽखिलो धर्मूलम् ' वा 'वेदाद्धर्मोहि निर्बभौ' तथा 'सर्वज्ञानमयो हि सः' (मनुस्मृति)** 'वेद' शब्दले ऋग्यजुसामाथर्वादि मन्त्रसंहितालाई बुझाउँछ। यस शब्दलाई बुझाउँन श्रुति, निगम, आगम, त्रयी, छन्दस्, आम्नाय र स्वाध्याय आदि शब्दहरुको पनि प्रयोग भएको पाइन्छ। वैदिक शब्दले

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदविषयसँग सम्बन्धी सम्पूर्ण वेद, वेदाङ्ग, ब्राह्मण, आरण्यक, उपनिषद्, सूत्रसाहित्य आदि वैदिक वाङ्मयलाई बुझाउँछ। वेदमा ब्रह्मा, देवता, ब्रह्माण्ड, ज्योतिष, गणित, रसायन, औषधी, प्रकृति, खगोल, भूगोल, धार्मिक नियम, इतिहास, रीति–रिवाज आदि सबै विषय संग्रहित छन्। वेदका विषयमा महर्षिहरुबाट गरिएको सत् प्रयासले नै धेरै लामो समयदेखि आजसम्म 'वेद' अविच्छिन्नरूपमा प्राप्त भइरहेको छ। यस्तो अविच्छिन्न ज्ञानराशि वेदका एक–एक अक्षर अपरिवर्तनीय छन्। गुरु परम्पराबाट प्राप्त भएका वेदका मन्त्रहरूको शुद्ध उच्चारण गर्न, पाठमा हुने अशुद्धिबाट जोगिन, वेदोक्त धर्म प्राप्त गर्न र यस्तो अमूल्य ग्रन्थलाई अक्षुण्ण राख्नका लागि वेदमन्त्रद्रष्टा महर्षिहरुले संहिता, पद, क्रम,जटा, माला, शिखा, रेखा, ध्वज, दण्ड, रथ र घन आदि एघार किसिमका प्रकृति–विकृति पाठहरुको व्यवस्था गरेका छन्। त्यो व्यवस्थालाई याज्ञवल्क्यशिक्षा स्वर प्रकरण तथा शुक्लयजुर्वेद वाजसनेय प्रातिशाख्यको परिशिष्टमा उल्लेख गरिएको छ :

संहितासारबहुलः पदसंज्ञासमाकुलः।

क्रमसन्धिसमाकीर्णो दुस्तरो मन्त्रसागरः॥ (या. शि. स्व. प्रकरणम् ३०)

जय माला शिखा रेखा ध्वजो दण्डो रथो घनः।

अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः॥ (शु. प्रा. ज. वि. ल. भाष्यम्)

यिनै एघार किसिमका प्रकृति–विकृति पाठकहरुको पहिले प्रकृतिपाठ अन्तर्गतका संहितापाठ, पदपाठ र क्रमपाठको त्यसपछि विकृतिपाठ अन्तर्गतका जटा, माला, शिखा, रेखा, ध्वज, दण्ड, रथ र घन आदि विकृति पाठहरूको संक्षिप्त परिचय, लक्षण र उदाहरण यहाँ प्रस्तुत गरिएको छ।

संहितापाठ :

प्राचीन ऋषि वा आचार्यहरूले आफ्ना शिष्यलाई पढाउदा वा प्रश्नकर्तालाई सुनाउदा रचना हुन गएको धार्मिक विषय वा वेदको मन्त्रभाग संहिता हो। निर्धारित स्थान वा पद, पाद, आधामन्त्र र मन्त्रान्त आदिबाहेक अन्यत्र कतै पनि नरोकिइकन एकै श्वासमा पाठ गर्नु संहितापाठ हो। यो संहिता पाठलाई वेदको प्रकृतिपाठ मानिन्छ। शुक्लयजुर्वेद प्रातिशाख्यमा संहितापाठलाई यसरी प्रष्ट पारिएको छ : **'वर्णानामेकप्राणयोगः संहिता'** (शु.वा.प्रा. १।१५८) अर्थात् **वर्णानां एकोच्छासोच्चारणप्रयोगः पदे वा वाक्ये विश्रामः सा प्राणः संहिता भवति।** अथवा **मन्त्राणां प्रकृतोपलब्धः पाठः संहितापाठः इत्युच्यते।** संहितापाठको उदाहरण यस्तो हुन्छ :

हरिः ॐ इषेत्त्वा।इषेत्त्वोर्ज्जेत्त्वाव्वायवस्त्थदेवोव्वःसविताप्प्रार्प्पयतुश्श्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्ममामावस्तेनऽईशतमाघशछसोद्ध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्य पशून्पाहि। (शुक्लयजुर्वेद १।१)

पदपाठ :

शुक्लयजुर्वेद प्रातिशाख्यको सूत्र **'अर्थ पदम्'** (३ / २) अनुसार अर्थ लाग्ने अक्षर वा अक्षर समुदायलाई पद भनिन्छ। पद–पद छुट्याएर वा समास, प्रकृति–प्रत्यय आदि भएको र नभएको पदको स्वरूपसमेत बेग्लाबेग्लै देखाएर गरिने वेदपाठ नै पदपाठ हो। यस पाठलाई क्रमपाठादि अन्यपाठहरुको प्रकृतिपाठ मानिन्छ। शुक्लयजुर्वेद प्रातिशाख्यमा **'पदच्छेदपूर्वक पाठः पदपाठः इत्युच्यते'** भनिएको छ। पदपाठको उदाहरण यस्तो हुन्छ :

हरिः ॐ। इषे। त्त्वा। ऊर्ज्जे। त्त्वा। वायवः। स्थ। देवः। व्वः। सविता। प्र। अर्प्पयतु। श्रेष्ठतमायेति श्रेष्ठ तमाय। कर्म्मणे। आ। प्यायद्ध्वम्। अग्घ्न्याः। इन्द्राय। भागम्। प्प्रजावतीरिति प्प्रजा व्वतीः। अनमीवाः। अयक्ष्माः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मा। व्वः। स्तेनः। ईशत। मा। अघशꣳसः। सऽइत्यघ शꣳसः। ध्रुवाः। अस्मिन्। गोपताविति गो पतौ। स्यात। बह्वीः। यजमानस्य। पशून्। पाहि॥ (शुक्लयजुर्वेद १।१)

क्रमपाठ :

जटादि विकृतिपाठहरुको प्रकृतिपाठ क्रमपाठ हो। दुई–दुई पदहरूको पाठगर्दै पछाडिको पदलाई त्यसअघिको पदसँग जोडेर त्यही क्रमले अन्तिमसम्म पाठ गर्नु नै क्रमपाठ हो। **'द्वे द्वे पदे सन्दधाति उत्तरेण उत्तरं अवसानात् अपृक्तवर्जं क्रमलक्षणं अपृक्तमध्यानि त्रीणि स क्रमः'। (शु.वा.प्रा. ४।१८१–१८२)** यस पाठमा अपृक्त संज्ञा भएका पदका बिचमा भएका तीन पदहरूको क्रम संहिता गर्नुपर्छ तर प्लूतलाई छुट्टै पाठ गर्नु पर्दैन। समास, प्रकृति–प्रत्यय, उपसर्ग वा उपपदको प्रकृतिप्रदर्शनात्मक नियमहरू क्रमपाठमा पनि पदपाठमा जस्तै हुन्छन्। क्रमपाठ गर्दा दुई–दुई पदको पाठ गरेर उत्तरोत्तर जोडिने भएकाले यसलाई क्रम संहिता पनि भनिन्छ। **'पदपाठगतं प्रतिपदं पूर्वोत्तरपदाभ्यां सङ्क्रमय्य द्विरुच्चार्यते सः क्रमपाठ भवति'।** क्रमपाठको उदाहरण यस्तो हुन्छ :

हरिः ॐ। इषे त्त्वा। त्वोर्ज्जे। ऊर्ज्जे त्त्वा। त्त्वा वायवः। व्वायवस्त्थ। स्थदेवः। देवो व्वः। व्वः सविता। सविता प्प्र। प्रार्प्पयतु। अर्प्पयतु श्रेष्ठतमाय। श्रेष्ठतमाय कर्म्मणे। श्रेष्ठतमायेति श्रेष्ठ तमाय। कर्मणऽआ। आऽप्यायद्ध्वम्। प्यायद्ध्वमघ्न्याः। अघ्न्याइन्द्राय। इन्द्राय भागम्। भागं प्प्रजावतीः। प्प्रजाव्वतीरनमीवाः। प्रजावतीरिति प्प्रजा व्वतीः। अनमीवाऽअयक्ष्माः अयक्ष्मा मा। मा व्वः। व्वस्तेनः। स्तेनऽईशत। ईशत मा। माघशꣳसः। अघशꣳसोद्ध्रुवाः। अघशꣳसइत्यघ शꣳसः। ध्रुवाऽअस्मिन्। अस्म्मिन्गोपतौ। गोपतौ स्यात। गोपताविति गो पतौ। स्यात बह्वीः। बह्वीर्यजमानस्य। यजमानस्य पशून्। पशून्पाहि। पाहीतिपाहि। (शुक्लयजुर्वेद १/१)।

जटापाठ :

लक्षण अनुसार सबै सन्धिसहित पहिले क्रमपाठ पढेर त्यसलाई उल्टोपाठ (व्युत्क्रम) पढी पुनः सुल्टोपाठ (क्रम) पढिने वेदपाठ प्रकारलाई विद्वान्हरुले जटापाठ भनेका छन्। जटापाठको लक्षण शुक्लयजुर्वेद वाजसनेय प्रातिशाख्य परिशिष्टमा यसरी प्रस्तुत गरिएको छ :

क्रमं यथोक्तं प्रब्रूयात् व्युत्क्रमेण क्रमेण च।

सलक्षणं सर्वसन्धौ जय सा प्रोच्यते बुधैः॥ (शु.प्रा.ज.वि.ल.श्लो. १)

अर्थात् **'क्रमं यथोक्तं द्वित्रिचतुष्क्रमात्मकं पुनश्च तमेव वैपरीत्येन पुनश्च क्रमेण एवं त्रिवारं त्रिवारं सर्वसन्धिषु लक्षणयुक्तं पठेत्सा जय तत्त्वज्ञैरुच्यते'।** जटापाठको उदाहरण यस्तो हुन्छ :

हरिः ॐ त्र्यम्बकं यजामहे यजामहेत्र्यम्बकंत्र्यम्बकंयजामहे। त्र्यम्बकमितित्रीऽअम्बकम्। यजामहेसुगन्धिं सुगन्धिंयजामहेयजामहेसुगन्धिम्। सुगन्धिंपुष्टिवर्द्धनं पुष्टिवर्द्धनंसुगन्धिं सुगन्धिं पुष्टिवर्द्धनम्। सुगन्धिमितिसुऽगन्धिम्।पुष्टिवर्द्धनमितिपुष्टिऽव्वर्द्धनम्।उर्व्वारुकमिवबन्धनात्बन्धनादुर्व्वारुकमिवोर्व्वारुकमिवबन्धनात्।उर्व्वारुकमिवेत्युर्व्वारुकम्ऽइव।बन्धनान्मृत्योर्मृत्योबन्धनाद्बन्धनान्मृत्योः। मृत्योर्मुक्षीयमुक्षीयमृत्योर्मृत्योमुक्षीय। मुक्षीयमामामुक्षीयमुक्षीयमा। मामृतादमृतान्मामामृतात्। अमृतादित्यमृतात्॥ पतिवेदनमितऽइतःपति वेदनंपतिवेदनमितः। पतिवेदनमितिपतिऽव्वेदनम्। इतोमुक्षीयमुक्षीयेतऽइतोमुक्षीय। मुक्षीयमामामुक्षीयमुक्षीयमा। मामुतोमुतोमामामुतः। अमुतऽइत्यमुतः॥ (शुक्लयजुर्वेद ३। ६०)।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सु. आ अगाडिको अंश भएको पदमा र **सु. आ** भित्र रहेको त्रिपद वा चतुष्पदको क्रममा भएको पुनरुच्चारणको भ्रम हटाउनका लागि मात्र भएको हो त्यसैले यस्ता पदहरुको बेग्लै जटापाठ गर्नु पर्दैन। जस्तैः- **मोषूणः** (शुक्ल य.सं. ३ । ४६) **सोमेनातनच्मि** (शुक्ल य.सं. ७ । ४) **गोमदूषुणासत्याः** (शुक्ल य. सं. २० । ८१) जस्तैः- **'उदुत्यम्'** यो पदमा दुई पदको भ्रम हटाउनका लागि **'ऊँइत्यूँ'** इति विचमा राखिएको छ। यो यसको क्रम होइन। अतः यस्ता पदहरुको छुट्टै जटापाठ गर्नु पर्दैन।

स्वापूर्वांशं पदद्वन्दं स्वागर्भे त्रिचतुष्क्रमे।

पुनरुक्तमसन्देहार्थं जयत्वं न चार्हति॥ (पूर्ववत् श्लो. २)

जटापाठ गर्दा अनुक्रम, उत्क्रम, व्युत्क्रम, अभिक्रम र संक्रम गरी पाँच प्रकारका क्रम सन्धिहरु पढिन्छन्। ती यसप्रकार छन् :-

अनुक्रम— त्र्यम्बकंयजामहे। **उत्क्रम**— यजामहेयजामहे। **व्युत्क्रम**— यजामहेत्र्यम्बकम्। **अभिक्रम**— त्र्यम्बकंत्र्यम्बकम्। **संक्रम**— त्र्यम्बकंयजामहे।

अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोकभिक्रमस्तथा।

सङ्क्रमश्चेति पञ्चैते जटयां कथिताः क्रममाः॥ (पूर्ववत् श्लो. ३)

अनुक्रम, उत्क्रम, व्युत्क्रम, अभिक्रम, संक्रमादि विधिहरू स्थितोपस्थितमा हुँदैनन्। जटापाठमा व्युत्क्रम पाठ पढिँदैन। जस्तैः "जास्पत्त्यं सुयमं सुयमं जाः पत्त्यं जास्पत्त्यं सुयमम्" यहाँ व्युत्क्रम पाठगर्दा "सुयमं जाः पत्यम्" भएको छ।

न स्थितोपस्थिते ये स्युर्जटयां व्युत्क्रमेन ते॥ (पूर्ववत् श्लो. ४)

'न स्थितोपस्थिते ये स्युर्जटयां व्युत्क्रमे न ते' भन्ने नियम **'व्विश्प्यतीव'** पद र प्रातिशाख्य ग्रन्थमा उल्लेख गरिएका पद सम्वन्धी विशेष नियमहरूलाई छोडेर अन्य ठाउँमा मात्र लागु हुन्छ। जस्तैः- **'व्विश्प्यतीव वीरिटे वीरिटे व्विश्प्यतीव व्विश्प्यतीव वीरिटे'** यो उदाहरणमा स्थितोपस्थितमा फरक देखिएपनि व्युत्क्रम पाठमा **'व्विश्प्यतीव वीरिटे'को 'वीरिटे व्विश्प्यतीव'** नै भएको देखिन्छ।

वर्ज्जयित्वा 'व्विश्प्यती'। विशेषविषयान्विधीन्। (पूर्ववत् श्लो. ४)

जटापाठमा पढिने उत्क्रम, व्युत्क्रम र अभिक्रममा हुने सन्धिकार्य व्याकरण शास्त्रको प्रमाण अनुसार हुन्छ।अनुक्रम, संक्रम र अन्य सबै स्वरविधानमा चाँहि प्रातिशाख्यशास्त्रको प्रमाण अनुसार गर्नुपर्छ।

वैकल्पिकान्व्याकरणम्। प्रमाण मध्यगत्रये सन्धौ॥

आद्यान्तयो प्रातिशाख्यम् मानम्। सर्वस्वरेषु तु॥। (पूर्ववत् श्लो. ५)

जटापाठमा सवर्ण स्वर परभएमा स्पर्श व्यञ्जनभन्दा पररहेको अपृक्त वर्ण **'उ'**, **'ब'** वर्णको रूपमा परिवर्तन हुन्छ। जस्तैः- **'उदुत्यन्त्यम्बुदुत्यम्'। (शुक्लयजुर्वेद ७ । ४१)** यहाँ व्याकरणको **'मय उञो वो वा'**को विकल्प हुन सक्दैन। सन्धिविधायक शास्त्रअनुसार अरु पदसँग सन्धिभएर अर्को रूपमा देखिएको भएपनि प्रगृह्य नै हुन्छ। जस्तैः- **'उर्ध्वऽऊषुणो नः सू उर्ध्वऽऊषुणः' (शुक्लयजुर्वेद ११ । ४२)**।

सवर्ण्णेऽपृक्त उः स्पर्शात्स्वरे याति वतामिह॥

स एव सन्धिनान्यैक्यमापन्नोऽपि प्रगृह्यकः॥। (पूर्ववत् श्लो. ६)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ओकारान्त निपातको व्युत्क्रमपाठमा प्रगृह्य संज्ञा हुन्छ। जस्तैः **'उपो ते नऽउपोऽउपो ते। अथो ये येऽथोऽअथो ये'**।यहाँ **'ओ'** को प्रगृह्य संज्ञा नभएको भए बेग्लै पद मानेर व्युत्क्रम पाठ हुने थियो। अगाडिपट्टि अकार छ भने त्यो प्रगृह्य ओकार व्युत्क्रम पाठमा ओम्भावमा परिणत हुन्छ। जस्तैः– **'ओम्प्रप्रोमोम्प्र'** यहाँ **'ओमाङ्गोर्a'** भन्ने सूत्रले पररूप भएको छ।

ओकारान्तनिपातानां व्युत्क्रमेऽस्ति प्रगृह्यता॥

सपूर्व्वाकारओङ्कारः प्रयात्योम्भावमत्र हि॥। (पूर्ववत् श्लो. ७)

यसरी जटापाठ अनुरूप नै अन्य मालादिविकृति पाठहरु पनि यही शास्त्रअनुसार गर्नुपर्छ॥

अयमेव हि शास्त्रार्थः सर्वासु विकृतिष्वपि॥ (पूर्ववत् श्लो. ७)

मालापाठ :

मालापाठ दुई किसिमको हुन्छ :– **(क) क्रममालापाठ (ख) पुष्पमालापाठ।**

(क) क्रममालापाठ :

आधा ऋचाको सुरुबाट क्रमपाठ पढ्दै अन्तिमसम्म र अन्तिमबाट विपर्यास (व्युत्क्रम) उल्टो पढ्दै आदिसम्म क्रमैसँग पाठगर्नुलाई ऋषिहरूले क्रममालापाठ भनेका छन्। क्रममालापाठको लक्षण शुक्लयजुर्वेद प्रातिशाख्यपरिशिष्टमा यसरी प्रस्तुत गरिएको छ :

ब्रूयात्क्रमविपर्य्यासावर्द्धर्च्चस्यादितोऽन्ततः।
अन्तं चादिन्नयेदेवं क्रममालेति गीयते॥ (पूर्ववत् श्लो. ९)

